63.	*रामकथा पर आधारित तुलनात्मक अध्ययन* (अप्र.)	डॉ. पूर्णिमा कुकरेती	गढ़वाल विश्वविद्यालय, शोधप्रबंध 1986

स्वातन्त्र्योत्तरे मध्यप्रदेशे प्रणीतानि संस्कृतमहाकाव्यानि

रहसविहारी द्विवेदी

मध्यप्रदेशो भारतराष्ट्रस्यान्वर्थनामाऽयं प्रदेशो मध्येदेशं विलसति। गोदावर्या उत्तरे चर्मण्वत्याश्चदक्षिणे स्थितोऽयं प्रदेश आङ्ग्लशर्मण्यजापानादिदेशतो भूभागदिशा विशालो जनपदं चास्य जगदलपुरं केरलराज्यादपि विशालं क्षेत्रं बिभर्ति। संस्कृतजगति प्रथितयशसां कालिदास-भवभूति-राजशेखर-भोजराजप्रभृतीनां साधनाभूमिरियमेवासीदिति विपचित्पश्चिमा जानन्त्येव। शङ्कराचार्यमण्डनमिश्रयोः सुप्रसिद्धः शास्त्रार्थोऽप्यत्रैव सम्पन्नः। स्वतन्त्रताप्राप्तेः प्रागपि प्रदेशेऽस्मिन् वहवः संस्कृतसाहित्यसाधका अभवन्। उर्वीदत्तशास्त्रि—श्रीपादशास्त्रिहसूरकर—सदाशिवसीतारामुसलगाँवकर- लोकनाथ-शास्त्रि — गजाननरामचन्द्रकरमरकरशास्त्रि — प्रीतमलाल — नृसिंहला — लकच्छि-प्रभृतीनां विविधविधासु प्रणीता रचना राराज्यन्ते। स्वतन्त्रता- प्राप्त्यनन्तरमपि संस्कृतसाहित्यसाधनायाः प्रवाहोऽविरलोदृश्यते। प्रायशः संस्कृतसाहित्यस्य सर्वास्वेव विधासु कविभिरत्र रचनाः कृता दृश्यन्ते। सुधारकरशुक्ल—श्रीनिवासरथ—रुद्रदेवत्रिपाठि—रामजी—उपाध्याय—गणपति-शङ्करशुक्ल—राधा वल्लभत्रिपाठि—बच्चूलाल अवस्थी—श्रीनाथ हसूरकर— प्रेमनारायणद्विवेदि—रेवाप्रसादद्विवेदि — श्रीमती वनमालाभवालकर — शिवशरणशर्म — भास्कराचार्य-त्रिपाठि—श्रीमतीपुष्पादीक्षित मिथिला प्रसाद त्रिपाठि— विन्ध्येश्वरीप्रसादमिश्र—मोतीरामशास्त्रि—प्रभाकरनारायणकण्ठेकर—प्रभुदयालुअग्निहोत्रि कामताप्रसाद त्रिपाठि—रामभद्राचार्य— भगवतीलालराज-पुरोहित — हरिहरत्रिवेदि — हजारीलाल-शास्त्रि—हीरालालशुक्ल—विष्णुदत्तशुक्ल—विष्णुदत्त-त्रिपाठि-प्रभुत्योऽनेके कवयः स्वातन्त्र्योन्तरं स्वसंस्कृतरचनाभिः प्राप्तयशसो विद्यन्ते एतेषु महाकाव्यकारास्तेषां कृतयश्चैवं विलसन्ति—

महाकाव्यकराः	तत्कृतानि च महाकाव्यानि
1. स्वर्गीय (विष्णुदत्त शुक्लः)	1. *गङ्गासागरीयम्*
	2. *सौलोचनीयम्*
2. स्व. सुधाकर शुक्लः	1. *श्रीस्वामिचरितचिन्तामणिः*
	2. *गान्धिसौगन्धिकम्*
	3. *भारती स्वयंवरम्*
3. आचार्य रेवाप्रसाद द्विवेदी	1. *उत्तरसीताचरितम्*
	2. *स्वातन्त्र्यसंभवम्*
4. आचार्य श्री निवासरथः	1. *बलदेवचरितम्*
5. स्व. लोकनाथशास्त्री	1. *गान्धिविजयम्*
6. स्व. वीरेन्द्रगोविन्द राजवैद्य	1. *महात्मगान्धिचरितम्*
7. आचार्य मिथिला प्रसाद त्रिपाठी	1. *सतनामिगौरवम्*
	2. *भार्गवीयम्*
8. आचार्ये हीरालाल शुक्लः	1. *दलितोदयम्*
9. पण्डित मोतीराम शास्त्री	1. *पयः पानम्*
10. पण्डित हजारीलाल शास्त्री	1. *श्रीरामरसायनम्*
11. श्रीरामभद्राचार्यः	1. *राघवभार्गवीयम्*

भारतराष्ट्रस्य स्वातन्त्र्यप्राप्त्यनन्तरं त्रिंशतादप्यधिकानि महाकाव्यानि प्रकाशितानि विद्यन्ते। तेषां नामानि डॉ. रमाकान्तशुक्लभिनन्दनग्रन्थस्य देववाणीसुवास इत्यपरनामधेयस्य द्वितीयभागे (पृ 117-135) मदीये लेखेऽवलोकनीयानि सन्ति एतेषां वैशिष्ट्यमपि स्वपङ्गे च शोध ग्रन्थेऽर्वाचीनसंस्कृतमहाकाव्यानुशीलने विस्तृतरूपेण मया प्रत्यादि। अत्र केवलं मध्यप्रदेशे प्रणीतानां महाकाव्यानां संक्षिप्तः समीक्षात्मकः परिचयः प्रस्तूयते। एतानि महाकाव्यानि वस्तुनायकरसप्रकृतिचित्रण-वस्तुव्यापारवर्णनदिशा प्राचीनपद्धत्यानूतनपद्धत्या चोभयथा विविधं प्रवर्तन्ते। काव्यवस्तु न केवलं रामायाणमहाभारतपुराणादिभ्यो गृहितमपितु राष्ट्रस्वातन्त्र्यवीरान् दलितादीश्चाश्रित्य महाकाव्यानि रच्यन्ते। रसराजं शृङ्गारमतिक्रम्य सम्प्रति राष्ट्रभक्तिः प्रतिष्ठिता दृश्यते। स्वर्गादिवर्णनं विहाय सम्प्रति जनसभाऽन्दोलनादीनि प्रति कवय आकर्षिता दृश्यन्ते। साम्प्रतिकानां महाकाव्यानां शास्त्रीयस्वरूपमपि यत्किञ्चित्परिवर्तिततच्चेवं मयाऽकलितम्—

सर्गेर्वृत्तैश्च बद्धं सहृदयहृदयाह्लादिशब्दार्थरम्यं
संवादैश्चोच्चशिल्पैः सततरसमयं ग्रन्थिमुक्तं समृद्धम्
पात्रं स्याद्यस्य मुख्यं परमगुणयुतं लोकविख्यातवृत्तं
भव्यं लोकस्वभावं महदपि महतां तन्महाकाव्यमास्ते।।

(मम *काव्यतत्त्वमीमांसाग्रन्थेकृतं* लक्षणम्)

मध्यप्रदेशे प्रणीतानां महाकाव्यानां समीक्षात्मकं विवरणमेव वरीवर्ति–

गङ्गासागरीयम्–

गङ्गासागरीयमहाकाव्यप्रणेता स्वर्गीयो विष्णुदत्तशुक्लोऽस्ति। अस्य जन्म पञ्चनवत्युत्तरैकोनविंशतितमे खीस्त (1895) वर्षे उत्तरप्रदेशस्योन्नाव‌जनपदेऽभूत्। अयं हिन्दी कवि स्वतन्त्रतासंग्रामसेनानी चासीत्। महाकाव्यमिदं मध्यप्रदेशस्य सागरजनपदे विलिख्य तत्रैवाभिनवसाहित्य- प्रकाशनसंस्थानतः प्रकाशितम्। काव्यप्रकाशनात्प्राक् (5.2.1964) ई. तिथौ तस्य गोलोकवसोऽभवत्। कविवरशुक्लस्य गोलोकवासानन्तरं त्र्यशीत्युत्तरैकोनविंशे खिस्ताब्दे (सन् 1983 वर्षे) उत्तरप्रदेशसंस्कृताकादमीतो महाकाव्यमिदमाश्रित्य शुक्लमहाशयः पुरस्कारेण सम्मानितः। शुक्लमहोदयस्य प्रथमा संस्कृतरचना सौलोचनीयमासीत्। यच्च हिन्दीमहाकाव्यस्य सौलोचनीयस्य संस्कृतभाषारूपान्तरणमात्रमस्ति।

गङ्गासागरीयं संस्कृतस्य रूपकात्मकमेकं महाकाव्यमस्ति। पाश्चात्य-विचारकैरियं 'एलगरी' (Allegory) इति नाम्ना कथ्यते। अस्मिन् चैतन्य-चन्द्रोदयस्य प्राचीनरूपककथाशिल्पं नानुसृतम्। आङ्लसाहित्ये विंशशतीं यावद् रूपक–कथाया विकसितं शिल्पं वैदिकी पौराणिकीं च पद्धतिमनुसृत्य प्रवर्तितमिदं महाकाव्यम्। काव्येऽस्मिन् सर्वाणि पात्राणि प्राकृतिकानि सन्ति। यथा सागरः गङ्गा, हिमवान्, मेघश्चेत्यादयः। अत्रैतानि केवलं प्राकृतिकदृश्यानि न सन्ति, अपितु–एतेषामत्र मानवीकरणं कृतं विद्यते। काव्यप्रतिभया कविना प्राकृतिकं भौगोलिकमैतिहासिक रूपमेतेषां संरक्षित वरीवर्ति। हिमवतो गङ्गायाः सागरस्य च मानवीकरणं रामायण- महाभारत-कालिदाससाहित्येषु बहुधा विलोक्यते। अस्मिन् काव्ये मानवीकरणमिदमौचित्यसमन्वितं व्यापकं च विद्यते। अत्र तृतीयकोटिंक रूपकत्वं निभाल्यते यत्र जडपदार्था मानवीयायाश्चतेनायाः सम्बद्धास्सन्तः मानवसुलभया भाषया व्यवहरन्ति। शुद्धरूपेण न काचिच्छैली काव्येऽस्मिन् स्वीकार्या यतो हि गङ्गासागरादीनामैतिहासिकेष्वाख्यानेषु प्राचीनकालादेव रूपकस्य मिश्रणं प्राप्यते। महाकाव्यमिदं नवसर्गात्मकं, 479 (एकोनशीत्युित्तरचतुरशत) पद्यानि च

सन्ति। लघुकायात्मकमिदं महाकाव्यम्। क्रमशो वस्तुविन्यासस्तावदेवम्—हिमवतो राज्यवर्णनम्, राज्ञा हिमवता शिवस्यस्तुतिः कन्याभियाचनं च, वरप्राप्त्या गङ्गाया जन्म, गङ्गाया बाललीला, दूतानुबन्धः वरुणपुत्रेण सागरेण दूतरूपेण गङ्गासमीपं मेघस्य सम्प्रेषणम् गङ्गायाः विवाहप्रस्तावः, पतिगृहप्रस्थानम्, सागरमिलनम्।

गङ्गापिता हिमवान् तस्याः प्रस्तावितः पतिश्च सागरः कस्यचिद्राज्ञो भूभागमतिक्रमितुं न प्रयततेऽतः कन्यापितुर्वरस्य च विवाहविषयिनी चर्चा न संभाव्यते फलतः कन्या (गङ्गा) मेघतः सागरस्य गुणान् ज्ञात्वा स्वयं विवाहार्थं याति। वस्तुतः प्राकृतिकमेतत्तथ्यं कविना प्रातिभेन वस्तुविन्यासेन विश्वशान्तिसन्देशं परिणमितम्। पितुरसामर्थ्ये कन्या स्वयमपि योग्यं वरं वृणुयादिति नारीचेतनाया औचित्यमपि प्रतिपादितमिव भवति। गङ्गायाः प्राकृतिकप्रवाहदिशाऽपि कविकल्पना श्लाघ्या। अभिसरन्ती चञ्चला गङ्गा सागरसङ्गमात् प्राक् लज्जाशीला सती मन्दं चलति। योगशक्त्यां हिमवतः सुहृद कपिलो गङ्गायाः भावं ज्ञात्वा सागरमाहूय विवाहं कारयति। काव्यमिदं भाषालङ्कारादिदिशा तु सामान्यमेव किन्तु कथावस्तु परिकल्पनायां महनीयं स्थानं भजते। स्थाली पुलाकन्यान्येन कानिचित्पद्यानि प्रस्तुयन्ते—

साम्प्रतिक नारीजागरणं गङ्गावक्तव्ये निभाल्यताम्—

यतोलोकाचारो भवति हि विधानं न नियतेः।
ततोऽस्यावज्ञायां विषयइह बाधा ननु कुतः।।

(*गङ्गासागरीयं*, 7/11)

श्रमस्य महत्त्वम्—

श्रमेणैव सिद्धान्ति कार्याणि लोके
श्रमेणैव लोकोत्तरत्वं सुलभ्यम्।
श्रमेणैव चोत्कर्षतां यान्ति लोकाः
श्रमं साधयध्वं श्रमं साध्यध्वम्।।

(तत्रैव 5/28)

सागरमाध्यमेन विश्वशान्तिसन्देशं कविः प्रसारयति—

अपहरति कदासौ नैव कस्यापि राज्यं
नहि खलु निजसीमां लङ्घते राष्ट्रवृद्ध्यै।
परम निरभिमानः शीलसद्वृत्तमूर्ति-
रभवदवनिचक्रे तादृशो नैव सम्राट्।।

(तत्रैव 6 व 6/36)

सौलोचनीयम्

स्वर्गीय विष्णुदत्तशुक्लस्य सुलोचनासती हिन्दीमहाकाव्यमस्ति तस्य संस्कृतरूपान्तरणं स्वयं शुक्लः कृतवान्। अस्मिन् मेघनादस्य पत्न्याः सुलोचनायाः सत्या वर्णनमस्ति। प्रायशः काव्यमिदं हिन्दी काव्यस्यानुवादमात्रम्।

श्रीस्वामिचरितचिन्तामणिः

श्रीस्वामिचरितमणिमहाकाव्यस्य प्रणेता पंण्डितसुधाकर शुक्लस्य जन्मोत्तरप्रदेशस्य इटावाजनपदे सप्तत्युत्तरैकोनविशंति (1970) विक्रमाब्देऽभवत्। प्राच्यपद्धत्या नव्यपद्धत्या चाध्ययनं कृत्वा शिक्षकवृत्या स्वजीवनं यापयन् संस्कृतहिन्दीसाहित्यसर्जने शुक्लमहाशयः संलग्न आसीत्। साहित्यसर्जने मध्यप्रदेशशासनस्य साहित्यपरिषदोऽयं 1978 वर्षे सम्मानितः। अनेकाभिः संस्थाभिर्मुर्हुमुर्हुस्य सम्मानोऽकारि। हिन्दीकाव्योपरि—अस्मै मध्यप्रदेश शासनस्य 'ईसुरी'—पुरस्कारो लालपुरस्कारश्च प्राप्तौ। अस्य रचना एवं विद्यन्ते—संस्कृतभाषयोपनिबद्धानि त्रीणि महाकाव्यानि (*गान्धिसौगन्धिकम्, भारतीस्वयंवरम्, श्रीस्वामिचरितचिन्तामणिश्च*), देवदूत च *खण्डकाव्यमस्ति*। मुक्तककाव्यसङ्ग्रह *आचार्यसुधाकरमिति*। *सूत्रोपनिषद्* (विंशसूत्रीयकार्यक्रमाश्रिता), *दुर्गास्तवनम्* (स्रोतकाव्यम्), शृङ्गारिकमुक्तकं *केलिकलशम्*, पुराणाश्रिता नाटिका—*इन्दुमती* चान्या संस्कृतरचनाः सन्ति। वर्षद्वयात् प्राक् पण्डितसुधाकरशुक्लस्य स्वर्गवासोऽभवत्।

कविवरशुक्लस्य कृतिषु प्रायशो वर्तमान जीवनमूल्यांना ह्रसोन्मुखताया यथार्थ संवेदनात्मकं च वर्णनमस्ति। प्राचीनाया संस्कृतेर्गोवगानं राष्ट्रोत्थानाव्हानं पदे-पदे प्राप्यते। राष्ट्र-समाज-व्यक्तिविकासस्य प्रेरणात्मकं निरूपणं सर्वासु रचनासु प्राप्यते। सुधाकरशुक्लस्य जीवनं कर्तृत्वञ्चाश्रित्य जिवाजी विश्वविद्यालयस्य कलासङ्कायान्तर्गतसंस्कृतविषये शोधप्रवन्धोऽपि स्वीकृतो विद्यते।

श्रीस्वामिचरितचिन्तामणिमहाकाव्यं मध्यप्रदेशस्य दतियास्थितस्य जगदम्बायाः पीताम्बरायाः पीठस्य महतः स्वामिनः दिव्यचरितमाश्रित्य प्रणीतम्। महाकाव्यमिदं श्रद्धा-भक्ति-ज्ञानानां सहजानुभूतिप्रसूतमष्टादशसर्गात्मकं वरीवर्ति। कविश्चरितनायकं रूद्ररूपं मनुते—

स्वामिनाञ्चारुचारित्र्यञ्चर्च्यते रूद्ररूपिणम्।
सङ्कल्पः कल्पनाभूतः सरसः काव्यमव्ययम्।। (स्वा. च. चि 7/10)

काव्येऽस्मिन्—कवेरात्मनिवेदनं, स्वामिनः शिवरूपावतारः शिक्षा, ज्ञानार्जनं,

तपःसाधना संन्यासः, तीर्थयात्रा, भारतभ्रमणं, सिद्धेरनुभूतयः पीताम्वरापीठस्थापना, पीतम्वरापीठतः संचालिताः लोकमङ्गलकार्यक्रमाः, स्वामिनो वैदिक–धार्मिक–तान्त्रिक–साहित्यस्य व्याख्या तत्प्रकाशनम्, तन्त्रिकोपसनाप्रभावः अनुष्ठानानि दशमहाविद्यानिरूपणं, स्वामिनः शारीरिकी–अस्वस्थता तदुपचारः, महप्रयाणम् प्रभृति–वर्णनानि प्राप्यन्ते।

पीताम्वरापीठस्य साधनामयः परिवेश एव काव्यप्रेरक आसीदतस्तस्यैव प्राधान्यं काव्येऽस्मिन् विद्यते। काव्यमिदं महत् सर्गवद्धं वर्णनदृशा–ऋद्धिमत् पुरुषार्थचतुष्टसम्पन्नमपि मोक्षप्रेरकं नरत्वे देवत्वस्थापनपरं शान्तरसप्रधानं समलङ्कृतशव्दार्थयुतं विद्यते। काव्यमिदं राष्ट्रचेतनायाः मानवमूल्यस्थापनायाः महत्प्रेरकं विद्यते, उदात्तपात्रचित्रणे नूतनोद्भावनायां पीताम्वरा-पीठानुरूप-साधनाविधानं महत्त्वमावहति। काव्यानुशीलनेन प्रतीयते यत् कविः दर्शनशास्त्रे काव्यशास्त्रे भाषाप्रयोगे परमदक्षः सन् स्वामिविषयकेनानुरागेण समन्वितो विद्यते। स्वकाव्यास्वादविषये स वक्ति–

नीरसं नीरसः पठ्यात् सरसं रसचित्तवान्।
तस्मान्नोद्विजेद्भक्तो महाकाव्यानुशीलने।। (7/15)

कविः स्वरचनानिर्भयत्वं स्वामिनी च भक्तिं निगदन् वक्ति–

न तादृशावेव भृशं हि मादृशौ
दृशो रसक्लिन्नकथा तु यादृशी।
तथापि तच्छक्तिप्रभाप्रगल्भया
विदर्भदर्भप्रतिभाभयाऽभयः।।

एतेन कवेरलङ्कारप्रयोगनैपुण्यं वैदर्भीरीतेराश्रयणं च स्फुटी भवति।

गान्धिसौगन्धिकम्

पण्डितसुधाकरशुक्लेन प्रणीतं गान्धिसौगन्धिकं महाकाव्यं महात्मगान्धिचरित-मनुसृत्य प्रवर्तते। अस्मिन् महाकाव्ये विशंतिः सर्गा विद्यन्ते। काव्यमिदं महात्मनो जीवनदर्शनमुद्घाटयत् भारतीयजीवनमूल्यानां राष्ट्रचेतनायाश्च पोषणं करोति। अप्रकाशितमेतत्।

भारतीयस्वयंवरम्

शुक्लमहाभागेनेदमपि प्रणीतं महाकाव्यं द्वादशसर्गैरुपनिवद्धं भारतीयानां युवकयुवतीनां प्रेरकं विद्यते। काव्येऽस्मिन् प्रगतिशीततलायाः, राष्ट्रियचेतनायाः,

मानवीय-संवेदनायाश्चाभिव्यक्ति पदे-पदे प्राप्यते।

एतदपि काव्यं सम्प्रति प्रकाशितं नास्ति। प्राप्ति सङ्केतः— डॉ. रविशङ्करो दीक्षितः 12 धमतालपुरा दतिया 475661 दूरभाषसङ्केतः—33960

उत्तरसीताचरितम्

उत्तरसीताचरितमहाकाव्यस्य प्रणेतुः सनातनस्य पण्डितरेवाप्रसाद द्विवेदिनो जन्म पञ्चत्रिंशदुत्तरैकोनविंशति (1935 ई.) वर्षे रेवातटे भोपालसमीपे नादनेरग्रामेऽभवत्। बाराणस्यां काशीहिन्दूविश्वविद्यालये विशेषतो पण्डितमहादेवशास्त्रिणः साहित्य-शास्त्रमधीतवान्। अध्ययनानन्तरं मध्यप्रदेशशासनस्य महाविद्यालयशिक्षासेवायां ततश्च काशीहिन्दू- विश्वविद्यालय—प्राच्यविद्यासङ्काये साहित्यस्याचार्याध्यक्षरूपेण कार्यं कुर्वन् सम्प्रति सेवानिवृत्तः सन् वाराणस्यां महामनापुर्यां निवसति। राष्ट्रपतिपुरस्कारेणान्यैश्च बहुविधैः पुरस्कारैरयं सम्मानितः सम्पादिताः स्वोपज्ञाश्च बहवो ग्रन्था अस्य प्रतिभं ज्ञानं प्रमाणयन्ति सीताचरिते दशसर्गाः 694 पद्यानि च विद्यन्ते। रामस्य राज्यारोहणात् सीतायाः पाताल-प्रवेशं यावद् वर्णनमस्मिन् विद्यते। अस्य सर्गनामतः विषयवस्तु सङ्केतोऽपि भवति। (1) राष्ट्रपति-निर्वाचनम्, (2) जानकीकौलीनम्, (3) जानकी-परित्यागः (4) सांकेतपरित्यागः (5) कुमारप्रसवः (6) जानकीमुनिवृत्तिः, (7) विद्याधिगमः (8) कुमारायोधनम्, (9) मातृप्रत्यभिज्ञानम्, (10) समाधिमाङ्गल्यम्। शीर्षकानुरूपेण सीतायाश्चरितमंत्रवर्णितम्।

कौलीनभीतेन रामेण गर्भवत्याः सीतायाः परित्यागः शीर्षस्थैरपि कविभिर्वर्णितमस्ति। किन्तु कथां परिवर्त्य काव्येऽस्मिन् कवि सीतायाः स्वतो वनगभनप्रस्तावं प्रस्तौति।

यामि मातर इतः स्वतस्ततो यामि यामि विपिनं न मे व्यथा।
कीर्तिकायमवितुं सुमानुषा मृत्युतोऽपि नहि जातु बिभ्यति।।

(*सीता च* 3/31)

काव्येऽस्मिन् गर्भवत्याः सीताया वाल्मीकितपोवनं प्रति सम्प्रेषणस्यैको हेतुर्जन्मशुद्धसन्ततेतरूपलब्धिरपि विद्यते। लवकुशौ जन्मन्त शुद्धौ वर्तते। वाल्मीकेस्तपोवन—गताऽयोध्याया जनतैतयोर्जन्मशुद्धौ पित्रोस्तपः कारणं मनुते—

सुदक्षिणायां रघुदेव तदवच्छकुन्तलायां भरतो हि जज्ञे।
अस्यामिमौ द्वौ ननु हेतुरत्र द्वयोस्तपांसि प्रसुवः पितुश्च।।

(तत्रैव 10/54)

संस्कारसम्पन्नौ कुशलवौ विलोक्य जनता वक्ति यद् गर्भावस्थायां सीतानिर्वासने कौशल्यायाः कूटनीतिः कारणमासीत्। यस्मात् तस्याः पौत्रौ गर्भावस्थात एव संस्कारसम्पन्नौ स्याताम्—

सा कूटनीतिर्ननु राममातुः सीताप्रवादो योऽभूत् स मिथ्या।
सा यौवने नैव चकाङ्क्ष भूयः पौत्रेषु संस्कारकृते तपांसि।।

(तत्रैव 1/56)

सीताया विश्वबन्धुत्वभावना, तपस्या, कृषिविवर्धनं, योगेनान्ते तनुत्यागश्चेत्यादिकं काव्यस्यासामान्यं वैशिष्ट्यमस्ति। गङ्गातटं प्राप्यैकाकिन्याः सीताया भावा अवलोक्यन्ताम्—

धिक् कोऽयं निजरुचिनामको जनानां
विश्वस्मिन् मनसिशयोऽस्ति भेदहेतुः।
येनेदं जगदखिलं समुद्रशैल-
नद्याद्यैः शकलितमेकतां न याति।। (5/10)

सीतोर्मिलादिचित्रणे साम्प्रतिकस्य नारीजागरणस्य चित्रं प्रतिविम्बितं विलोक्यते उर्मिला सर्वाभिर्भगिनीभिः सह वनगमनायोद्यताऽस्ति, सा च सीतां वदति—

वयमप्यनिषिद्धनिर्गमा भवतीमत्र विहातुमक्षमाः।
गृहवद्धवनमप्यसौ समं निमिकन्यासमितिः सुखं व्रजेत्। (4/52)

काव्येऽस्मिन् भारतीयायाः संस्कृतेः राष्ट्रभक्तेश्चोपन्यास आद्यन्तं प्राप्यते। काव्यस्य मुखबन्धे कविना व्यलेखि 'विश्वबन्धुत्वविधृता राष्ट्रियता हि काव्यमन्दिरेऽत्र देवता' तथा च 'न यशसे न धनाय शिवेतरक्षतिकृतेऽपि नैव कृतिर्मम। इयमिमां भरतावनिसंस्कृतिं सुरगगीञ्च निवेषितुमुद्गता।' काव्यानुशीलनेन कवेः कथनं चरितार्थं दृश्यते। सीता हिमगुरुशृङ्गतोपयोधिं यावद् भारतभूमिं स्वभूदुतल्पं मनुते—

हिमगुरुशृङ्गतः पयोधेर्गहनतमावटगह्वराणि यावत्।
निखिलमपि निजार्यभूमिवक्षो निजमृदुतल्पभमंस्तभूशयाना।।

काव्येऽस्मिन् नायकस्य (प्रमुखपात्रस्य) पदं सीताऽलङ्करोति। अस्ति रामो धीरोदात्तस्तथापि सीताऽभिव्यापकत्वं नातिशेते। समग्रे काव्ये राष्ट्रभक्तिपरिमिलितो वीरोरसः प्रामुख्यं भजते किन्तु काव्यान्ते सीतायाः भूसमाधिमाङ्गल्येन परिणामे शान्तस्य परिपाको दृश्यतेऽतोऽस्याङ्गी रसः शान्त एवं स्वीकर्त्तव्यः। भूसमाधिकृते समुद्यतायाः सीतायाश्चन्द्रकेतुं प्रति वत्सलभावप्रकटनावसरे विरक्तिस्नेहयोरद्भुतं

संमिश्रणं दृश्यते। काव्यशास्त्री कविः स्वयमेवं सङ्केतं कुरुते—

वात्सल्यशान्त्योरिति मिश्रभावे
तस्यां स्थितेऽस्मिन् विदधातु धीरः।
इयं सितेदं पय एष सिन्धु –
रयं घटो वेत्ति परिच्छिदां कः।। (10/37)

काव्येऽस्मिन् प्रकृतिचित्रणादिकं कथावस्तुसम्पृक्तं विद्यते। प्रकृतेर्महत्त्वं कवि वाल्मीकि माध्यमेन निरूपयति—

विलोक्य तं क्रौञ्चवधं तदक्षिणी तथा च सीता परिक्षणं वने।
वभूवतुर्मानुषमानुषेतरद्वये विवेकद्युतिभिर्विकस्वरे।।

(तात्पर्यमिदं यद् मनुष्यो मनुष्येतरं क्रौञ्चं हतवान् किन्त्वत्र मनुष्येतरा लताः मानुषीं सीतां रक्षन्ति)

सीताचरितविषये ममाभिमतम्—

रसप्रवाहैर्मितसारवाचा नृत्लोपमार्थान्तरसंविधानैः।
सनातनीये करुणाऽपि सीता सितैव सीताचरिते चकास्ति।।

स्वातन्त्र्यसंभवम्—

आचार्यरेवाप्रसादद्विवेदिप्रणीतं स्वातन्त्र्यसंभवमहाकाव्यं 1990 ई. वर्षे वाराणसीतस्तत्पुत्रेण डॉ. सदाशिवकुमारद्विवेदिना प्रकाशितम्। 28 सर्गात्मकमिदम्। सर्गनामसु विषयवस्तुसङ्केतितम्। तद्यथा— (1) पीठिका, (2) स्वातन्त्र्य-सङ्कल्पोदय; काशीझाँसीश्वरीवर्णनम्, (3) जनविद्रोहः, भारतीया आदर्शाः, (4) प्रयागवर्णमं, जवाहरस्य कमलापरिग्रहः, (5) वसन्तवर्णनम्, सिसृक्षास्तुतिः, कमलादोहदः, (6) गर्भमङ्गलम् (7) काश्मीरगतोत्पलाद्रिवर्णनम्, शरद्वर्णनम्, (8) ग्रामटिकादर्शनम्, (9) जनान्दोलनम्, (10) इन्दिराजन्म (11) काव्यमङ्गलम् (सरसीकाव्यम्) (12) कमलामहाप्रयाणम्, (13) मोतीलालनेहरूमहाप्रयाणम् (मृत्युकविता) (14) भारतविभाजनम्, (15) नोवाखालीरक्तपाते परिदेवनम् (17) स्वाराज्यम्, सौराज्यम्, चीनपाकाभिद्रोहः, (17) जवाहरलालनेहरू परिनिर्वाणम्, (18) लालबहादुरशास्त्रियणः प्रधानमन्त्रित्वम्, भारतपाकसन्धिबन्धः, शास्त्रिणः प्राणोत्सर्गः, (19) ताशकन्दे लालबहादुरशास्त्रिणोऽन्तिमा उच्छ्वासाः, (20) विलापाः, इन्दिरायाः प्रधानमन्त्रित्वम् (21) पाकवङ्गविजय, (22) आपातकाल-घोषणापरिसंहारौ, (23) जनताशासनम्, मुरारजीदेशायिनः प्रधानमन्त्रित्वम्, (24) जनताशासनं तद्भङ्गः, कवेराक्रोशः, (25) श्रीवैष्णवीदर्शनम्, स्तोत्राणि,

(26) इन्दिरादेव्याः पुनः प्रधानमन्त्रित्वम्, (27) इन्दिरादेव्याः परिनिर्वाणम्, (28) स्वर्गेजवाहरलाल- मोक्षः जगत्स्वस्त्यनम्।

वस्तुतः काव्यमिदं भारतराष्ट्रस्य पूर्वप्रधानमन्त्रिपदमलङ्कुर्वाणायाः श्रीमत्या इन्दिरायाः जन्मनः प्राक् सन्दर्भतः तस्या महाप्रयाणं यावत्कथावस्तु क्रोडीकरोति। अल्पीयांसमपि वर्णनीयप्रसङ्गं भारतीयसंस्कृतिराष्ट्रानुराग- संवलितेन सन्दर्भेण पुरस्कृत्य कविः प्रस्तौति। अतएव दशमे सर्गे-इन्दिराया जन्म भवति। इन्दिराया इतिवृत्तमात्रवर्णने कवेरभिरुचिर्नास्ति, अपितु भारतीयायाः संस्कृते राष्ट्रचेतनायाश्च समुद्भावने सहृदयहृदयाह्लादे तस्य प्रवृत्तिर्दृश्यते स्वयंमपि स वक्ति–

ऐतिह्यमत्र नैतिह्यमात्रं गीतास्विवात्र नः।
दर्शनं साङ्ख्ययोगाद्व्यमपि सम्यक् प्रतिष्ठितम्।।

(स्वा. सं. 1/6)

भारतीयस्य धर्मशास्त्रस्य दर्शनस्य काव्यशास्त्रस्य च क्वचिदुपमानरूपेण क्वचिद् व्यङ्गयभङ्ग्या सङ्केतः प्राप्यते। राष्ट्रानुरागस्तु पदे-पदे प्राप्यते। यथा–

देशेषु सर्वेष्वपि भारताख्यो देशोऽस्यदीयो ननु देशराजः।
प्रशस्यते यत्र तथा न धातुर्यथा कवेःकश्चन सर्गबन्धः।। (4/2)

स्वातन्त्र्यान्दोलनस्य वर्णनं चारु विद्यते ततः पद्यमेकं निभाल्यताम्–

छात्राः स्म कक्षाः परितस्त्यजन्ति प्राध्यापको स्वतिवचो ब्रुवन्ति।
सरस्वती चापि विहाय वीणां तदा स्म कालीयति खड्गहस्ता।।

(9/69)

'वसुधैव कुटुम्वकमि' ति मन्त्रो जवाहरलाले स्फुरन् विद्यते–

न वर्गभेदे न च वर्णवादे न देशभेदेऽपि बभूव तस्य।
ममत्वभेदो वसुधाकुटुम्वः स वै परब्रह्मणि यद्वस्थात्।।

(90/90)

काव्येऽस्मिन् राष्ट्रनायकानां वर्णनेसर्वधर्मसमभावोऽपि समुद्भावितः–

यो वै खुदा यम इवास्ति जगन्नियन्ता
यो वै पिता परमकारुणिकश्च यीशुः।
वाणी कुराणतु च वायविलत्वथासौ
योऽर्थस्तयोरिह भिदानभसो हि वल्ली।।

(18/46)

मन्दिरमस्जिदयोर्न कश्चिद्विवादः वस्तुतो दर्पसर्प एव विवादे हेतुः–

नो मस्जिदेन कलहायति मन्दिरं ते
नो मस्जिदं च कलहायति मन्दिरेण।
यस्त्वत्र हन्त कलहायति सोऽतिमान-
नामाभिमानगरलः खलु दर्पसर्पः।।(18/50)

काव्यस्य चरमेसर्गेऽनेकैः पद्यै शान्तिपाठः कविना प्रस्तुतस्तद् यथा—

शान्तिः स्याद् दिवि शान्तिरस्तु मरुतां भार्गेस्तु शान्तिर्भुवि
स्याच्छान्तिः सलिलेषु दिक्षु च भवेच्छान्तिर्नितान्तं स्थिरा।
शान्तिः कर्मसु शश्वदस्तु करणग्रामेषु शान्तिर्भवे
च्छान्तिः स्यादभरेषुशान्तिरसुरेष्वास्ताञ् च शान्तिर्नृषु।। (28/21)

एवं राष्ट्रभावनाभरितं युगवोधसंवलितं।
सत्प्रेरणादायकमिदं महाकाव्यं स्वागतार्हतम्।।

बलदेवचरितम्—

आचार्यश्रीनिवासरथविरचितमेतन्महाकाव्यं *दूर्वा* पत्रिकायां धारावाहिकरूपेण पञ्चमसर्गं यावत् प्रकाशितम्। विद्याविनयसम्पन्ने कुल उत्कलप्रदेशे जनिं लध्वा स्वकीयं प्रारम्भिकमध्ययनं समाप्योच्चाध्ययनं काशीहिन्दूविश्वविद्यालये श्रीरथमहाश्योऽकरोत्। आचार्यबलदेवपाध्यायस्य कविः शिष्योऽस्ति स्वगुरोराचार्यबलदेवोपाध्यायस्य चरितमाश्रित्य महाकाव्यमिदं प्रणीतम। 'तदेवं गगनं सैव धरै'—ति कवितासङ्ग्रहोऽस्य प्रकाशितः यस्मिन् राष्ट्रचेतना-संवलितासुललितगितिकाः सन्ति। मध्यप्रदेशस्य गीतिकारेषु शीर्षस्थं स्थानं विभर्ति। प्राध्यापने संभाषणे, काव्यपठनेऽयं छात्रेषु सहृदयेषु चात्यन्तं प्रियोऽस्ति। सम्प्रति विक्रमविश्वविद्यालयस्य (उज्जयिनीस्थस्य) संस्कृताध्ययनशालाया आचार्याध्यक्षपदतः सेवानिवृत्तः सन् 8 कालिदासमार्गे-उज्जयिन्यां निवसन् साहित्यसेवारतो विराजते। महाकाव्यस्य सर्गनामतः कथावस्तु सङ्केतः स्वयमेव स्फुटी भवति। यथा (1) *श्रीबलदेवावतारः* (2) *कर्जनविजृंभितम्,* (3) *वाराणसीनिवर्तनम्,* (4) *मन्त्रदृष्टिः* (5) *वर्षाविलासः*। सम्प्रति समग्रतो महाकाव्यमिदं न प्रकाशितम्। अतिशोभनमेतत् काव्यस्थालीपुलाकन्यायेन कानिचिदुद्धरणानि प्रस्तूयन्ते—

कविमनसि गुरुविषयारतिराधन्तं निभाल्यते काव्यरम्भे श्रीगणेशं नमस्कृत्य स गुरुं प्रणमति—

विपदां विघ्ननिघ्नानां निवारण-विचक्षणम्।
वारणास्यं गुणोपास्यं श्रीगणेशं नमाम्यहम्।।
उपाध्यायाय वन्द्याय बलदेवाय धीमते।
कृष्णज्येष्ठाय सोल्लासं प्रणामाञ्जलिरर्प्यते।।
बलदेवपदाम्भोजमधुसञ्चयकाम्यया।
तदीयचरितोद्देशे चञ्चरीकायते मनः।।
...गुरोः श्री बलदेवस्य सद्वृत्तानि विवृण्वती।
चरितार्था भवित्रीयं श्रीनिवाससरस्वती।। (ग. च. 1/1-3,6)

चरितनायकस्य कुलजा भगवद्भक्त इत्येवं तथ्यं वर्णयन् कविः स्वकीयामपि देवभक्तिं प्रकटयति भक्तिरसस्य कण्ठतोऽपि समर्थनं करोति—'अथ तथाविधजीवनयापने भगवता विहितास्य सहायता।
जगति भक्तिरसेन समन्वितं त्यजति नैव कदापि जगत्पतिः।।(1/58)

नायकजीवनवर्णने तत्कालिकराष्ट्रपरिस्थितयोऽपि यथास्थलं निरूपितां यथा कर्जनस्य दुर्जनत्वम्—

प्रभञ्जन विजृम्भितं व्रजति कालजालाहतं
विभज्य धरणीं यथा भुवि जनं वनं वा क्षयम्,
तथैव घनगर्जितं दुरभिसन्धिबन्धार्जितं
विधाय बहुदुर्जनः सपदि कर्जनोऽस्ति गतः।। (2/56)

शास्त्रपङ्क्तयोऽपि क्वचित् रसतां नीताः—
कुर्तरीप्सिततम् विरुध्यते कर्मणैव यदि तस्य जीवने।
दोष एष ननु कस्य कुत्र वा धातुरीप्सितमपाकरोतु कः।। (3/13)

भाषाभेदो राष्ट्रभेदे कारणं स्यादित्यनुचितम्—
एकनीडमिव विश्वजीवनं वेदवाचि ऋषिभिः समर्थितम्।
भाषयैव यदि भेद इष्यते हा हतैव ननु भारतीयता।।
भारतीयजनता पदे-पदे भाषते विविधभाषया न किम्।
किं तथापि परिचीयते मनाग् भिन्नभूमिभिदुरात्मचिन्तनम्।। (3/41,42)

महाकाव्येऽस्मिन् वर्णनात्मकाः प्रसङ्गा बहुमनोहारिणो विद्यन्ते। यथा वाराणसीवर्णनम्—
काश्यां सदैव हृदयङ्गममम्बु गाङ्गं
स्नानार्थिनां करपुटैः प्रहितं प्रभाते।

अङ्गीकरोति लहरीषु परः सहस्र-
मूर्त्तिः सहस्रकिरणः स्वयमर्घ्यमेत्य।। (4/6)

अत्रचाक्षुषविम्बोत्प्रेक्षणं समधिकं मनोहारि विद्यते। प्रयागे विलुप्ता सरस्वती वाराणस्यां प्रकटितेत्युत्प्रेक्षा सहृदयहृदयसंवेद्या वरीवर्ति-

स्रोतस्विनी भुविनिपीतजला प्रयागे
या गीयते भगवती सृजती त्रिवेणीम्।
काश्यां सदा बुधसभासु सरस्वती सा
प्रस्यन्दतेऽद्भुतरसा तरसाऽनुगङ्गम्।। (4/9)

शिवेन पार्वतीपरिधानयोग्यं वासोऽत्र ससर्ज, अतः शाटिकानिर्माणकौशलमत्र व्याप्तम्-

शैलाधिराजतनया परिधानयोग्यं
वासः ससर्ज किमिहैव स कृत्तिवासाः
वाराणसीत्यनुदिनं प्रमदामनांसि
शाटीसमुत्सुकतया तरली करोति।। (4/15)

एवं श्रीनिवासरथविरचितं बलदेवचरितं महाकाव्यं सहृदयहृदयस- वेद्यवर्णनैः समृद्धं मनोहारि च विद्यतेऽस्य स्वतन्त्ररूपेण समग्रं प्रकाशनं स्यादित्युचितम्।

श्रीगान्धिविजयमहाकाव्यम्

षड्दर्शनाचार्यमहोपाध्यायपण्डितश्रीलोकनाथशास्त्रिविरचितं *श्रीगान्धिविजयमहाकाव्यम्* जाबालिपुरतः प्रकाशितायाः ऋतम्भरा- पत्रिकायाः प्रथमाङ्के प्रथमसर्गमात्रं प्रकाशितम्। प्रयासे कृतेऽपि काव्यस्यास्य समग्रा पाण्डुलिपिः क्वचिन्न प्राप्ता। पण्डितलोकनाथशास्त्री स्वजनुषा उत्कलमलङ्चकारं। नगरनिगमगायत्रीसंस्कृतमहाविद्यालये जाबालिपुरेऽयं प्रधानाचार्य आसीत्। पञ्चविंशतिवर्षात्प्राक् कवेरस्य गोलोकवासः श्रूयते। काव्यस्यास्य कथावस्तु महात्मनो गान्धिनो जीवनं भारतीयस्वतन्त्र्यान्दोलनं चाश्रित्य विन्यस्तमस्ति। काव्येऽस्मिन् राष्ट्रभक्तेरविच्छिन्नप्रवाहो दृश्यते। काव्ये कवेः पाण्डित्यप्रकर्षः पदे-पदेऽनुभूयते। स्थालीपुलाकन्यायेन कनिचिदुद्धरणानि दीयन्ते-

यत्सर्वज्ञमलक्ष्यमस्ति परमं पश्यन्ति यज्ज्ञानिनो
ये नैतत्सचराचरं जगदहो जातं स्थिरं पूर्णतः।
यस्मै योगिजनो नियच्छति मनो व्योमादिकं लीलया
तस्यात्प्रादुरभूत्कृतिस्तु महती यस्यास्ति यस्मिंल्लयः।।

मङ्गलपद्यमेतत्। काङ्ग्रेसदलविषये स वक्ति–

श्रीमद्भारतवासिलोकचरितं बीजं च यस्याङ्कुरः,
सद्बुद्धिर्ललितं बुधप्रवचनं काण्डं नवीनं दलम्।
रागः पुष्पकदम्बक जनमनोमोदोत्थकीर्तिर्भवि–
न्मत्यैऽसावपिभात्यहो इति महान् काङ्ग्रेसकल्पद्रुमः।। (1/3)

सानुप्रासभाषाप्रयोगे निपुणोऽयं कविः–

दुर्गादुर्ग्रह दुर्गतिर्हरबधूर्हाराम्बराहारिणी–
कालीकालकलापकालनकरी गौरी च गौरप्रदा।
तारातारक तारिका निजजनैर्जातस्य जन्मोदये
षष्ठीजागरवासरे गुणगणैर्जागर्त्ति युक्तायुतैः।। (1/7)

समग्रकाव्यदर्शनाभावे वस्तुविन्याससमीक्षणं न संभाव्यते।

महात्मागान्धिचरितम्–

पण्डितवीरेन्द्रकुमारगोविन्दराजवैद्यप्रणीतमिदमप्रकाशितं महाकाव्यम्। अस्य पाण्डुलिपिः तद्गृहे सुरक्षिता विद्यते तत्सङ्केतः–10 साउथ यशवन्तगंज इन्दौर (म.प्र.) अस्य महाकाव्य रचना 1973 वर्षेऽभवत् तत्सङ्केतः कविना काव्यान्ते कृतः–

अनलमुनिनवैके वत्सरे चैशवीये
त्रिशशिदिन जुलाईमासगे शुक्रवारे।
सुरपति नगरस्थोऽयं हि वीरेन्द्रनामा
क्षितिपतिगदहर्त्ता ग्रन्थपूर्तिं करोति।। (अन्तिमं पद्यम्)

काव्यादौ च–

वीरेन्द्रो राजवैद्यो निखिलगुणगणान् वीक्ष्य गान्धेः समग्रः,
सद्भक्त्या संयुतात्माऽत्र च लिखनविधौ दत्तधीरल्पबुद्धिः।
सारं-सारं गृहीत्वा ग्रथनविधिपरो युक्तियुक्तं यदत्र
संक्षिप्तं सच्चरित्रं विलिखति विदुषां ह्लादनार्थं तदस्तु।।

काव्यान्ते कविना स्वकीयवंशपरिचयोऽपि लिखितः–

स्वकाव्यस्य सारः कविनैकेन पद्येनैवं व्यलेखि–

आद्यौ काठियवाडप्रान्तजननं विद्यार्जनं लन्दने
पश्चात् स्वालयतोऽफ्रिकासुगमनं नेतृत्वसिद्धिस्ततः।
अत्रैत्याङ्ग्लविरोधनाय यतनं सत्यग्रहारम्भणं
स्वातन्त्र्याप्तिदिवङ्गती च सकलं गान्धीचरित्रं त्विदम्।।

अस्य काव्यस्य वैशिष्ट्मेतत् यत् महात्मनो जीवनक्रमस्य विशिष्टस्तिथियोऽपि निर्दिष्टाः। यथा–

स तत्र वर्षत्रयमप्यधीतिं विधाय वैरिष्टरनाम धृत्वा।
चन्द्राङ्कदिक्पालसुधांशुसङ्ख्ये संवत्सरे मातृभुवं प्रतस्थे।। (1.12)

एकस्या अकिञ्चनाया दुरवस्थां चित्रयन् कविर्वक्ति–

मृद्भाण्डमेव जलपूरितमेकमेव
तच्चापि काष्ठफलकापिहितं कथञ्चित्।
नान्यच्च भाण्डमथवांशुकमस्ति तस्याः
स्नानादिकार्यसमयेऽपि हि धारणार्थम्।। (5/11)

कविः कथयति यन्निन्दन्तु नाम केचन काङ्ग्रेसदलगतान् नायकान् किन्तु ममकृते तु ते वन्दनीयाः–

काङ्ग्रेसिनां कतिपयानवलोक्य दोषान्
तेषा कृते किमपि वा कथयन्तु लोकाः।
अस्मत्कृते तु नितरामिव वन्दनीया
गान्धींन्दिरातिलकनेहरुलालभद्राः।। (5/67)

सतनामिगौरवम्–

देवी–अहिल्याविश्वविद्यालयस्य संस्कृतविभागे सम्प्रति प्रवाचकपदभाजा डॉ. मिथिलाप्रसादेन त्रिपाठिना विरचितमिदं *सतनामिगौरवम्* महाकाव्यम्। अस्य काव्यस्या परं नाम *गुरुघासीदासमहाकाव्यमिति* विद्यते। 'चरितनायकविषये कवेः पुरोवागेवं विद्यते–'वर्णोच्चजनिरेव श्रेष्ठतायाः संसाधिका नाचारसरणिर्यदा दृष्टा घासीदासेन्, तदादलितानां सेवार्पितानां सर्वजनीनं हितमभिलषन्नेष 'सत्यनाम' (सतनामी) पन्थानमाविष्चकार। सदाचारमेव सर्वमिति प्रतिष्ठापयन् जातितो निम्नतोच्चताविधानमस्वीकृतवानयं लोकसेवकः। प्रायः तज्जातीय निरक्षरा एवाभवन्। लोकभाषासु गेयतामधिगतानि पद्यानि 'पंथी' गीताभिधानेनालङ्कृतानि। एतान्येव सतनामिमार्गानुयायिनां वेदभूतानि जातानि। मध्यप्रदेशस्य विलासपुरजनपदस्य बलौदाबाजारसमीपे गिरौदग्रामे अस्य जन्माभवत्। अस्य पितुर्नाम मँहगू आसीत् शैशवेऽस्यनाम 'घसिया' आसीत् ततः घासीदासोजातः। इमं दलितनायकमाश्रित्य महाकाव्यमिदं प्रणीतम्। एकविंशसर्गात्मकमिदं महाकाव्यम्। अस्य प्रकाशनं सप्तनवत्युत्तरैकोनविशांति (1997) वर्षे संस्कृतज्योतिषकम्प्यूटर–एकेडमी 3171 /ई. सुदामानगर– इन्दौरतः जातम्। काव्येऽस्मिन् नायकः घासीदासः यः

सतनामि—सम्प्रदायप्रवर्तकः दलितानामुद्धारकश्च विद्यते। धर्मवीरदयावीरादिरसा अत्र प्रामुख्यं भजन्ते। सामान्यजनजीवनचित्रणदिशा दलितानां वर्णनदिशा च काव्यमिदमन्यतेभ्यःकाव्येभ्यो वैशिष्ट्यंविभर्ति 'सद्वंशः क्षत्रियोवाऽपि धीरोदात्तगुणान्वितः।' नायक विषयिणीमवधारणाऽत्र—अपास्ता तथापि युगबोधसमन्वितमेतत्काव्यं स्वागतार्हमिति मन्ये। सहृदयहृदय-ऽसंवेद्यमेतन्महाकाव्यम्। कानिचिदुद्धराणान्यत्र दीयन्ते—घासीदासस्य मनोजातिवन्धनं विलोक्य भृशं दूयते—

न देवमन्दिरे स्वदेव पूजनं सुरप्रियैः
विधातुमेव पात्रता विनिश्चाताऽस्य वंशजाः
प्रवेष्टुमिष्टदेवमन्दिरं न चास्य योग्यता
यतो बभौ च कारवारवंशजन्मतो मृषा।।
जनैः श्रुतोऽयमीयवरार्चने स्वजाति विघ्नता,
कदापि देवदर्शनाय मन्दिरं जगाम नो।
न मन्यतेस्म जातिभेदनिष्ठता सुरादिके
सुराः कथं जनैरशुद्धिभावना विगर्हिता।।
न जन्मना पवित्रताऽपवित्रता सुशोभते
स्वकर्मणा कुलोच्चताऽवमानिता प्रशस्यते।
तथापि जातिबन्धनं विलोक्यते पदे-पदे
दुनोति घासिदासमानसं सदा मुहुर्मुहुः।। (22-24)

घासिदास स्वमित्राण्युपदिशन् वक्ति—

भूतरक्षा प्रवृत्तिः सदाभूतले भूतहिं साविरक्तिर्यथा संभवेत्।
चौर्यलुण्ठकवृत्तिः समाप्ता यथा स्यात्तथावर्तनं भानवैश्वेष्यते।।

न साक्षरत्वं निगमाधिबोधं
न प्राप्य सापेक्षमधीतिशीलम्।
मनः प्रसादाय प्रभोः कृतार्थं
सारल्यमेवास्ति च हेतुमिष्टम्।।
शास्त्राण्यधीत्यापि मनः प्रसादं
नोलभ्यते चेत्तदलं श्रमेण
अन्तः पवित्राचरणाद् विशुद्धं
चेदस्ति विद्याभिरलं सदैव।। (4/17,24,25)

जातिवादमधिक्षिपन् स वदति—

जननतो नहिजातिरितिस्थिता भुवि च संस्करणाद्विजता मता।
ननु दुराचरणाद् द्विजता कथं वद सदाचरणाद्वृषता कथम्।।
यदि सदाचरणादिह पूज्यता भवति नैव दुराचरणात् क्षतिः।
कथय रावणता किमुजन्मतः सुकृतजा सुरता भूवि कल्पिता।।

मद्यपाने रता मांसभोज्याश्रिताः
धर्महीना परस्त्रीषु ये लम्पटाः।
उच्च वर्णे जनित्वा च ते केवलं
श्रेष्ठता यान्ति कस्मात् समाजे मृषा।।

(5/5,6,14)

दलितानां दारिद्र्यनिरूपणं तेषां च शोषणं काव्येऽस्मिन् वहुधा वर्णितम्—

पूर्णदारिद्र्यमास्ते कुले जीवने
शत्रुवद्वस्तत्वभावः सदा चिन्त्यते।
मानवत्वेऽपि न स्पर्श योग्या जनैः
हा! कथं मानवा मानवैर्वञ्चिताः।।

भास्करेणैव सार्द्धं श्रमे लग्नता स्वेदजालैश्चिताः कर्मणि व्यापृताः।
जन्मतो वंशकृत्यं श्रमैरञ्चितं भूमिपुत्रा अहो भूमिहीनाः कथम्?

(5/20-21)

बन्धकत्वं शिशुत्वे वरीवृत्यते रक्षणं वै पशूनां च कैशोर्यगे।
नास्ति विद्यासमाराधनाजीवने भारती मातृभाषाविधौ केवलम्।।
नैव वासाय येषां गृहाः सज्जिताः लोकलज्जादिशान्त्यै न वस्त्राण्यलम्।
नोदरं पूरणायास्ति चान्नादिकं जीविताः सन्ति कारावराः भाग्यतः।।
वित्तहीनार्विवाहार्थिनीं कन्यकां स्वैरवृत्याऽन्यवृत्या गृहे पाल्यते।
येन केनापि सार्धं न वित्तेहया सङ्गतिं मन्यमानाः प्रमोदान्विताः।।

(5/20,24-25)

सतनामिमार्ग केषां कृते इदमप्यवधेयम्—

ये मारिता हिन्दूजनैरथापि
ते जातिहीनाश्च वहिष्कृताश्च।
भूत्वा बसन्तीह गुरोः समाजे
सन्नाममार्गस्य विधानमेतत्। (20/23)

भार्गवीयम्–

भार्गवीय महाकाव्यमपि डॉ. मिथिलाप्रसादत्रिपाठिनो विद्यते। अस्मिन् ब्रह्मणः पुत्राद् भृगोरारभ्य परशुरामं यावज्जातानां चरित्रवतां पराक्रमिणां भृगुवंशधराणां महर्षीणां प्रामुख्येन निरूपणमस्ति। एकत्रिंशता सर्गैः प्रायः पञ्चदशशतपद्यैर्विन्यस्तमिदं महाकाव्यं सम्प्रति-इन्दौरतः प्रकाश्यते। कविः स्वयमपि भार्गवगोत्रीयोऽतस्तस्य सहजानुरागो भृगुवशं प्रति विद्यते। अस्य महाकाव्यस्य वर्ण्यविषय एवं विद्यते–

भृगुचरितं च्यवनाख्यानं चादितश्चतुर्थसर्ग यावद् विद्यते ततः क्रमशः शुक्राचार्य-मार्कण्डेय–दधीचि-ऋचीक-जमदग्नीनां दिव्यं चरितं वर्णितम्। एकदशे सर्गे परशुरामस्यावतारो वर्णितः। अग्रिमेषु सर्गेषु परशुरामस्यैव कथा पल्लविता, स एवास्य प्रमुखो नायकः। अन्ततः परशुरामस्य श्रीविद्योपासना रामेण सह साक्षात्कारः रामस्य वन्दना चेत्यादिप्रसङ्गाः वर्णिताः। काव्येऽस्मिन् विविधानां छन्दसां प्रयोगों विहितः। उपजाति-मालिनी-शिखरिणी- द्रुतविलम्वित-वियोगिनीस्रग्विनी-भुजङ्गप्रयात पञ्चचामर स्रग्धरा- शादूलविक्रीडितप्रभृतिछन्दसां विरचने कवि पटुर्दृश्यते। रसभावरीतिवक्रोक्ति– प्रभृतिकाव्यतत्त्वानि मनोहारीणि दृश्यन्ते। भाषाछन्दसां च प्रयोगो भावानुरूपेण प्रवर्तते। माधुर्यप्रसादगुणवाहुल्यं, भाषास्वाभाविकी च दृश्यते। स्थालीपुलाकन्यायेन कनिचित्पद्यानि निभाल्यन्ताम्–

प्रमद्वरावर्णनम्–

प्रमदमदमनशीला सुन्दरी साथ मृद्वी
कृशकटितटक्रमा कन्तिमन्मध्यदेशा।
स्फुरति निखिलगात्रे यौवनं लोभनीयं
न्यपतदवनिमध्ये वर्णहीना गतश्रीः।। (5/15)

अप्सरावर्णनम्–

लटद्दृष्टेस्तस्यास्त्रुटितकचभूषाङ्किमतसुमः
कटाक्षैरीक्षन्ती ललितवदना सूक्ष्मवसना।
मुनेरग्रेवायुर्हरति वसनं बन्धरहितं
यदा तस्या जातौ गतपटकुचावेव सघनौ।। (7/24)

करुणरस–

मयि जीवति मे पिता भृतो
नहि दुःखाय ममास्ति केवलम्।
सुरभिं प्रति तैर्नृपाधमैः–
र्जनको मेऽद्य हतः प्रवाध्यते।। (22/25)

तथा च

मयि दारुणकर्मनिष्ठुर! प्रजहासि त्वमहोविधे! न माम्।
निहते जनके तपस्विनी मम माताऽपि दिवङ्गता क्षणात्।। (22/28)

देवविषयारतिरुताहो भक्तिरसः काव्ये प्रायशो विलोक्यते—

यत्र साक्षाद्धरिश्चास्ति रामः प्रभुर्यत्र संरक्षकोऽप्यस्ति रामः प्रभुः।
यत्र संराध्यते सैव रामः प्रभुः यत्र सर्वत्र लीनोऽस्मि रामः प्रभुः।।
(25/49)

भारतीयसंस्कृतिविमुखान् प्रत्यधिक्षेपस्य स्वरोऽपि मुखरोऽत्र प्राप्यते—

धिक् तां स्त्रियं पतिरथो विमुख्यश्च यस्याः
धिक् जीवनं पतिविरोधसमन्वितं च।
धिक् तां विहाय पतिमन्यजनानुरक्तां
धिक् शङ्कते पतिरहो गृहिणीं स्वकीयाम्।। (15/22)

वशी वदान्यो वदतां वरिष्ठः कृती मुनिर्ब्रह्मविदां वरेण्यः।
दधेऽखिलं ब्रह्मणि लीनवृत्तिर्जहावसून् लोकहिताय विप्रः।।
(8/35)

सः नौ भुनक्तु—इति मन्त्रोऽपि पुनरुद्भावतः—

सहाशनं नो सहभाषणं वा सहप्रयाणं सहसन्निवासः।
न काऽपि यात्रा सहगोलकैश्च कुर्वन्तिलोकस्य जनाः कदापि।।

दलितोदयम्—

दलितोदयमहाकाव्यस्य प्रणेता डॉ. हीरालालशुक्ल आचार्योऽध्यक्षयश्च संस्कृतविभागे वरकतउल्लाहविश्वविद्यालयस्य भोपालस्थस्य। डॉ. शुक्लमहाशयः महान् भाषाविद्-अर्वाचीनसंस्कृतसाहित्य विशेषज्ञोऽनेकविशिष्टग्रन्थानां प्रणेता विद्यते। दलितोदयं महाकाव्यमपि गुरुघासीदासचरितमाश्रित्य षण्नवत्युत्तरैकोनविंशतितमे ख्रीस्ताब्दे प्रणीतम्। गुरुघासीदासमाश्रित्यास्य हिन्दीभाषोपनिबद्धएको महनीयः प्रबन्धोपि विद्यते। अस्य महाकाव्यस्यापरं नाम श्रीगुरुघासीदासचरितमपि विद्यते। कविर्दलितोद्धारविषये निरन्तरं प्रयत्नशीलः मनसा वाचा कर्मणा च। काव्यमिदं तस्य वाचिक-प्रयासनिदर्शनरूपं विद्यते। अस्य महाकाव्ये विंशति सर्गाः सन्ति। क्रमशः प्रतिसर्गं काव्यवस्तु एवं विन्यस्तम्— उपोद्घात, घासीदासवतारः, बाल्यचरितम् दारिद्र्यनिरूपणम्, मातृणां ख्रीस्त- धर्माङ्गीकरणम्, निर्गुणोपासनम्, दासजीवनम्,

तत्त्वचिन्तनम्, कवीरपंथानुवर्तनम्, जगन्नाथपुरीयात्रा, सारंगगढे सतनामप्रस्फुरणम्, सोनाखानाख्ये षाण्मासिकी तपश्चर्यों गिरौदग्रामे प्रकटनम्, शान्तियात्रा, भण्डास्धामस्थाननम्, सतनामतत्त्वोपदेशः, अमृतवाणी, सत्यलोकप्रस्थानम्, पान्थगीति। कविर्मङ्गलाचरणेऽपि किरातकोल-गुहजातीनामुल्लेखं करोति—

जयत्यसौपूजितपादपद्मः किरातकोलैर्गुहजतिवन्द्यः।
निषादसेवार्पितपादधूलीरघूत्तमः स्यादनिशं मुदे नः।।(1/1)

काव्येऽस्मिन् कवेः कथ्यं तथ्यं चैवं विलोक्यते—

पद्यैश्चयासीचरितान्वितैश्च
गाथा कथाकीर्ति सुलोकवृत्तैः।
समन्वितैः पान्थिमवैश्च गीतैः
सन्नाम पान्थं प्रकटीचकार।। (1/17)

सतनामिगौरववदत्रापि शूद्रब्राह्मणयोर्विवेको निरूपितः—

शूद्रतामेति विप्रोह्यसंस्कारतः
शूद्रजो ब्राह्मणत्वं च संस्कारतः।
श्रेष्ठतायै सदाचारसापेक्षता
स्वीकृताजन्मतो नैव सा वर्णिता।। (4/3)

दलितानां दशाऽत्र मुहुर्महश्चित्रिता—

निर्धनानां व्यथाऽऽढ्यो न जानात्यहो
दुर्दशा कर्षकाणां गृही वेत्ति नो।
यो हली नैव प्राप्नोति धान्यं यदा
वेत्ति पीडामहो पीडितः केवलम्।। (4/25)

उच्चवर्गैरपमानिता निम्नवर्गीया स्वमानं रक्षितुं ख्रीस्तधर्म स्वीकुर्वन्ति इदं दृष्ट्वा कविमनः खिद्यते—

देवालये यज्ञविधौ समाजे जात्युच्चता निम्नगता यदाऽभूत्।
दीनाः स्वमानं परिरक्षाणाय धर्मं विहायान्यगतिं प्रपेदे।।
हा! भारतेऽस्मिन् च परैरभीष्टा धर्मान्वितिः संस्कृतिरिष्टशेषा।
देशेस्वतन्त्रेऽपि समाजरूढी सत्तार्थिनां नैवविभार्ष्टुमुत्काः।।
(5/7,9)

घासीदासः स्व निर्गुणपक्षं पोषयन् वक्ति–

निखिल विश्वगतं भुवनेश्वरं
जगति वासकरं विरुजं ह्यजम्।
ननु शिलांशगतं मुदि संस्थितं
यदि चिकीर्षति कोऽपि न युज्यते।। (5/20)

घासीदासस्य गार्हस्थमेवमासीत्–

वार्तासु धर्मस्य विचारवीचिः कार्येषु मोक्षस्य गतिं तनोति।
गेहाय चार्थं भुविदम्पतीभ्यां कामोऽनयोर्वंश विवर्द्धनाय।। (8/22)

समत्वमहत्त्वं वहुधा प्रतिपादितम्–

साम्ये मनः सुस्थितमस्ति येषां रागोऽपि तैनिर्जित एव सद्यः।
अनन्ययोगं भजते महत्त्वं समत्वमित्यंभगवद्धचोभिः।। (18/13)

काव्यान्ते पान्थिगीतानां संस्कृतरूपं गीतिरूपेणैव प्रस्तुतम्। तद्यथा–

सतनाम कथा स्वर्गीयसुधा
पिबत पिबत रे
पिबत बुधा!
निराकारिता साधिदैविकी
समाजसमता सदाध्यात्मिकी।
गोवत्सलता शुद्धधार्मिकी
गुरोः कदा सुरसा विविधा।। इत्यादि।

पयः पानम्–

पयः पानस्य प्रणेता जाबालिपरस्थस्य दुर्गासिद्धपीठसंस्कृत-महाविद्यालयस्य प्राचार्यः पण्डितः श्रीमोतीरामशास्त्री (सम्प्रति सेवानिवृतः नर्मदातटस्थरामन-गरग्रामनिवासी)। असीत्याधिकैकोनविंशतितमे ख्रीस्तवर्षे महाकाव्यमिदं प्रणीतं सम्प्रत्यप्रकाशितं विद्यते। काव्यमिदं नर्मदाधिकृत्य प्रणीतमस्ति। षोडशसर्गैरूपनिवद्धं भक्तिरस-प्रवणमेतत्। पयः पानमितिनाम्नश्चारितार्थ्यमेव- मस्ति यन् नर्मदा दिव्यप्रकृतिरस्ति तथापि मानुषीरूपेण मुनिं मार्कण्डेयं स्तनपानं कारयति। नर्मदायाः प्रतिज्ञाऽस्ति यत्तस्यां यदा सन्ततिरुत्पद्यते तदा शिशोस्स्तनपानात्प्राक् कस्मैचिद् ब्राह्मणाय स्तनं पानं कारयिष्यति। वृद्धो मार्कण्डेयो नर्मदायाः स्तनपानं कर्तुं नोत्सहते किन्तु नर्मदायाः प्रतिज्ञामवधार्य वालहत्यापापादात्मानं रक्षितुं तस्या दुग्धपानं करोति। स्तनपानानन्तरं मार्कण्डेयो निद्राग्रस्तो भवति। उत्थितः सन् स नर्मदां प्रति

गन्तुमिच्छति तत्र पृथ्वी तं नर्मदाप्रस्थानमार्गं दिशति। कथेयं षट्सर्ग यावत् प्रचलति। तदनन्तरं नर्मदा तटवर्तिस्थानानां नन्दिकेश्वर-त्रिशूलभेद-भृगुक्षेत्र-ओङ्कारेश्वर-माहेश्वर प्रभृति तीर्थानां श्रद्धाभरितं सहृदयहृदयसंवेद्यं वर्णनं सप्तम्सर्गात् षोडशसर्गं यावत् कृतं विद्यते। हिन्दीटीकासहिताऽस्य महाकाव्य पाण्डुलिपिः प्रणेतु पण्डितमोतीरामशास्त्रिणः समीपे वरीवर्ति। कानिचित् पद्यानि विलोक्यन्ताम्-नर्मदां प्रति स्वपरिचयं कारयन् मार्कण्डेयो वक्ति—

नाम्बा पिता सहभवो विभवो न किञ्चित्
प्रज्ञोदयादजनि वारिचरेषु सख्यम्।
त्वत्पादपद्मसुखसद्मजनिर्यदन्ते
त्वज्जीवनं जननि! जीवनमेव विद्मः।।

वीरकेतोश्चेदिराजस्य पुत्री भानुमती त्रिशूलभेदतीर्थे (जाबालिपुरस्थल-मेहटाघट्टे) तपश्चरति। तस्याः सखी किरातकन्यासमीपं पूजापुष्पार्थं याति। किरातकन्या तस्याः स्वर्णमयं रूपं दृष्ट्वा विमुह्यति पुष्पमूल्यं च न वाञ्छति—

प्रोवाच सा शबरराजसखी सहासं
धन्याऽस्ति सिन्धुतनये त्वयि साधुवादाः।
निष्किञ्चनस्य रमणी न परीरक्षणीया
नारायणि प्रतिपदं परिरक्षणीया।।
व्यर्थं सुवर्णमपि भूरिपुरस्थमेतत्
साध्यं सुवर्णवचनैश्च सुवर्णवर्णे।
तद्वद्विचारचतुरे सुजने किमन्यत्
रूपेण जातमफलं तव जातरूपम्।।

अस्य काव्यस्य वैशिष्ट्यमेतद् यत् समग्रं काव्यमेकेनैवच्छन्दसा वसन्ततिलकेन प्रणीतम्, केवलं सर्गान्ते छन्दपरिवर्तन निभाल्यते। अस्य महाकाव्यस्य थावस्तु विशेपतः स्कन्दपुराणस्य रेवाखण्डमाश्रित्य प्रवर्तते। कवेर्नर्मदां प्रति प्रगाढ़ानुरागः भूरिशो दृश्यते।

श्रीरामरसायनं रामायणम्

रामरसायनमहाकाव्यस्य प्रणेता पण्डितहजारीलालशास्त्री जैमिनीत्युपनाम धेयोऽस्ति। निवासस्थलमस्य 17/1 सुभाषनगरम् इन्दौरम् (भ. प्र.) विद्यते। अस्य प्रकाशनमपि तत एव जातम्। रामस्य समग्रकथा काव्येऽस्मिन् साररूपेण प्रस्तुता विद्यते। अस्यरचनाकालः कविना स्वयमेव सङ्केतितः काव्यान्ते—

पञ्चाब्धि शून्यनयने नृपविक्रमाब्दे
संवत्सरे सिततदले मधुमासि पुण्ये।

दुर्गातिथौ शुचितमे गुरुवासरेऽस्य
जाता समाप्तिरिह रामरसायनस्य।।

काव्येऽस्मिन् सर्गेस्थानेऽध्यायशब्दस्य प्रयोगो विद्यते। अष्टादशाध्यायात्मकमिदं काव्यम्। गोस्वामितुलसीदासविरचितरामचरित- मानसस्य सर्वाधिकः प्रभावः काव्येऽस्मिन् विलोक्यते। प्रायशोऽलङ्कृत- काव्येषूवाचादि- प्रयोगतो वस्तु न विन्यस्यते किन्तु काव्येऽस्मिन् तथाकृतम्। अतः पौराणिकं शिल्पमिदमनुहरति। वस्तुतो रामभक्तानां कृते महनीयमेत् महाकाव्यम् तथापि महाकाव्यमिदं सहृदयहृदयसंवेद्यं विद्यते। भक्तिरसप्रवाहो निरन्तरं प्रवहमाणं विलोक्यते। काव्यमिदं पठित्वा डॉ. लक्ष्मणनारायणशुक्लो वक्ति— 'निसर्गरमणीयेऽस्मिन् काव्ये रामचरितवैभवं कोमलया शैल्या प्रतिपादितं कविना। विश्वकल्याणभावना तात्त्विकी प्रतिभा, सार्वकालिक- सन्देशः भावानां गाम्भीर्यं, छन्दसामौचित्यं, रसानां परिपाकः, ललितपदविन्यासः, मधुरा रसभावबन्धुरा प्रतिपादनशैली कवेर्वैदुष्यं वर्णनाचातुर्यं च सर्वत्र स्फुटं राजते। मानवीयान्तः प्रकृते स्वाभाविकं विश्लेषणं, बाह्यप्रकृतिदृश्यानां स्वाभाविकं चित्रणं मानवमनोवृत्यनुगुणं विशदं वर्णनं सहृदयहृदयावर्जकं काव्यमिदं कवित्वदिशा महनीयं विद्यते।' (काव्यान्ते संयोजितमेतत्)

स्वाभाविकवर्णनस्य निदर्शनं विलोक्यतां कैकेय्यौ दत्तवचनो दशरथो रामं वक्ति—

हा राम ! ये जीवनकञ्जसूर्यः
कारुण्यपूर्णश्च प्रियोऽसि पुत्र।
नीलोत्पलाभः शशिसुन्दरास्यः
दुःखाब्धिमग्नं हि नयस्व वारम्।। (6/6)

रामोवक्ति—

शोकान्वितं दशरथं निजगाद रामः
पद्मं यथा सरसि कल्यातुषारदग्धम्।
रोदीर्न तात ! भव शान्तमना वृथैव
यास्ये वनं यदि भवेज्जननी प्रसन्ना।। (6/3)

यद्यपि कथाविन्यासे किमपि नावीन्यं नास्ति किन्तु रामभक्तानां कृते भवगतश्चरित्रं संक्षिप्तरूपेण सुमनोहरशिल्पेनावर्जकरूपेण कविनाऽत्र प्रस्तुतीकृतम्। एतेन रामभक्ताः नूनमेवोपकृताः कविना। डॉ. मिथिलाप्रसादत्रिपाठिमहाभागानां कथनं समीचीनमेव—

नित्य नवं मनसि रामरसायनं स्यात्
रम्यं प्रियं पठतु रामरसायनाख्यम्।

पीत्वाऽमृतं भवदु रामरसायनोत्थं
स्यान्मङ्गलायभुवि रामरसायनं च।।

राघवभार्गवीयम्

राघवभार्गवीयम् प्रणेता रामानन्दाचार्यः श्रीरामभद्राचार्यः प्रज्ञाचक्षुरस्ति। वाराणस्यां व्याकरणशास्त्रध्ययनं तथा च वेदान्तदर्शनस्य विशेषरूपेणाध्ययनं विधाय बहूनां धार्मिक ग्रन्थानो विशेषतः विविधरामायणानां रामकाव्यानां श्रीमद्भागवतरामचरितमानसयोः सम्यगभ्यासोऽनेन व्यधायि। अनेकेषां दर्शनग्रन्थानां भाष्यं व्यचरि महात्मनाऽनेन। आशुकविरयं स्मरणशक्तिरस्याद्भुता अस्य प्रतिभाप्रसारं वैविध्यं च विलोक्य विद्वासं आश्चर्यचकिता भवन्ति। प्रवचनेऽध्यायने संस्कृतहिन्द्याङ्ग्लभाषाकाव्यनिर्माणेऽत्यन्तं दक्षोऽयं सम्प्रति चित्रकूटस्थरामानन्दाचार्यपदे विराजते। अस्य राघवभार्गवीये महाकाव्ये राघवभार्गवयोः भक्तिरसपूर्णा कथा विन्यस्ता, हिन्द्या, भक्तिकाले विशेषतः प्रसिद्धानां कवित्त—मत्तगयन्द-दोहा-छप्पय-सवैया प्रगृतिभिः छन्दोभि सह सर्मेषामेव वर्णिकमात्रिकाणां वृत्तानां प्रयोगे निपुणः। महाकाव्येऽपि मध्ये-मध्ये स्तुतिनां स्तोत्राणां व सन्निवेशो भक्तसहृदयस्य मनोहरते। भाषाऽस्य प्रसादगुणसम्पन्ना। स्तुतिषु संवोधन पदवाहुल्येन परिष्कृतमपि संस्कृतभाषावद्धं महाकाव्यं हिन्दीकाव्यवद् वोधगम्यं विद्यते। अस्य महाकाव्यस्य प्रकाशनं यथाशीघ्रं संभाव्यते।

मध्यप्रदेशे प्रणीतेषु प्रायशः सर्वेष्वेव महाकाव्येषु देवभक्तेः राष्ट्रभक्तेर्गुरुभक्तेर्वा प्रामुख्यं दरीदृश्यते। कामं कलहायत्तां प्राचीनकाव्य- शास्त्रकारा भक्तिरसविषये किन्तु महाकाव्यान्येतानि तस्यास्तित्वं स्वयमेव महता कण्ठेनोद्घोषयन्ति। न केवलं देवा क्षत्रिया राजनो वा नायकत्वं भजन्तेऽपितु महँगूसुतो घासीदासोदलितवर्गीयोऽपि तत्र स्थापितः। नात्रपुरुषस्यैव नायकत्वं प्रत्युत गङ्गा-सीता-नर्मदा-सुलोचनाप्रभुतयोऽपि नायकत्वं विभ्रति। नात्र सम्भोगविप्रलम्भयोः परिपाकः अपितु राष्ट्राय सर्वस्वसमपणोद्भावनं अकिञ्चनस्य क्षुत्पिपासाकुलत्वं विद्रोहान्दोलनोद्वेगः, राष्ट्रचेतना, नारीजागरणं चेत्यादीनि प्रामुख्यं भजन्ते। नैतेषु ग्रन्थग्रन्थिः प्रयत्नपूर्वकं निवेशिताऽपितु सामान्याय संस्कृतज्ञायापि रोचते भाषाप्रयोगः, एतेषु महाकाव्येषु राष्ट्रैक्यं विश्ववन्धुत्वं दलितोद्धारः भ्रष्टप्रशासनतर्जनं धर्मसहिष्णुत्वं पर्यावरणेन संरक्षक नारीजागरणं विश्वशान्तिरित्यादिविषयाः क्रोडीकृता दरीदृश्यन्ते।

स्वातन्त्र्योत्तरकाले मध्यप्रदेशे संस्कृतव्याकरणम्

पुष्पा दीक्षित

मध्यप्रदेशे शास्त्राध्ययनस्य सुसमृद्धपरम्परासीत्। नासीत् किमपि नगरं प्रदेशेऽस्मिन्, यस्मिन् पञ्चषाः संस्कृतपाठशाला नासन्। पाठशालासु चैतासु सर्वशास्त्रविचक्षणाः पण्डिता आसन्। यद्यपि तेषां कार्यं लिपिबद्धं नोपलभ्यते, तथापि तेभ्योऽधीतविद्या विद्वांसोऽद्यापि धरामलंकुर्वन्ति। तेषु यैर्वैयाकरणैः पाणिनीयशास्त्रमधिकृत्य शास्त्रसमीक्षणं कृतं, तेषामेव चर्चास्मिन् शोधपत्रे नियते।

डॉ. चंद्रिकाप्रसादो द्विवेदी—व्याकरणस्य दार्शनिकतत्त्वानां ज्ञापको वैयाकरण-भूषणसारो नाम ग्रन्थमणिरनेकप्रकरणोल्लसितो धात्वाख्याताद्यर्थनिरूपकतया समासशक्त्यादिप्रतिपादनेन, विभागनिर्देशपूर्वकं स्फोटस्वरूपव्यवस्थापनेन च व्याकरणक्षेत्रं चमत्करोति। तदन्तर्गतविषयाणामतिदुरूहतया तद्व्याख्यानाय नानाविधाष्टीका हिन्दीभाषायां विराजन्ते। तासु सतीष्वपि समयपरिवर्तनेन छात्राणामध्यापकानाञ्च क्रमशो बुद्धिमान्द्येन सुखेन सर्वविषयाणामधिगमायासीत् कस्याश्चित् हिन्दीटीकाया महत्यावश्यकता। मध्यप्रदेशे रीवाँनगरे शासकीयवेङ्कटसंस्कृतमहाविद्यालये भूतपूर्वव्याकरण-विभागाध्यक्षेण व्याकरण-साहित्याद्यनेकशास्त्रनिष्णातेन पण्डितप्रवरेण श्रीचन्द्रिकाप्रसादद्विवेदिना राष्ट्रभाषायाम् विरचिता *सुबोधिनी व्याख्या* न केवलं छात्राणामपितु विदुषामपि महान्तमुपकारं सम्पादयति। अतिसारल्येनात्र गम्भीरविषयाणां ग्रन्थिभेदो यथा कृतस्तथा सुबोधिनीयमन्वर्थतां भजते।

डॉ. बच्चूलालोऽवस्थी—मध्यप्रदेशस्योज्जयिन्यां कालिदासाकादमी वर्तते। तत्राचार्यकुलाधिष्ठातृपदं विद्वत्तल्लजेनाचार्यबच्चूलालावस्थिमहाभागेनालंक्रियते। वैयाकरणसिंहोऽयं व्याकरणाटवीषु साटोपं निर्भयं विचरति, यस्य हुंकारेणैव शङ्कागजाः सत्वरं पलायन्ते। चतुर्दशसु विद्यास्थानेषु विचक्षणेनानेन महात्मना नैक काव्यशास्त्रग्रन्था विरचिता, अनेकानि च काव्यानि, येषु 'प्रतानिनी' अस्याः

शताब्द्याः सर्वाणि संस्कृतकाव्यान्यतिशेते, तथापि शोधपत्रेऽस्मिन् केवलं व्याकरणसम्बन्धीन्येव कार्याणि प्रकाशयमानीयन्ते।

आचार्येण बच्चूलालावस्थिमहाभागेन चत्वारिंशत्तु खण्डेषु चतुर्दशसहस्र-पृष्ठमितो भारतीयदर्शनकोशो निर्मितः। यस्मिन् भारतीयदर्शनस्य सकलान् ग्रन्थान् निर्मध्य भारतीयदर्शनस्य सर्वेषां पारिभाषिकशब्दानां न केवलं विस्तृतविवेचनं कृतमपितु दधिमन्थेन नवनीतवत् सर्वसारसमुच्चयस्तत्र समुपस्थापितः। पाणिनीयाष्टाध्याय्यां व्याकरणदर्शनस्य ये सिद्धान्ता बीजरूपेणावस्थिताः सन्ति, त एव महाभाष्येऽङ्कुरिताः पल्लविताश्च। परं तत्रापि तेषामेकत्र समवायो न लभ्यते। अतो भर्तृहरिणा भाष्यं निर्मथ्यं ते सर्वे सिद्धान्ता एकीकृत्य वाक्यपदीये व्यवस्थापिताः। भूषणे मञ्जूषायाञ्च त एव सिद्धान्ता व्याख्याताः। आचार्यबच्चूलालावस्थिकृतेऽस्मिन् भारतीयदर्शनकोशे सर्वेषां दर्शनानां सिद्धान्ताविवेचिताः। तेषु वैयाकरणसिद्धान्तानामपि सम्यक् प्रकाशनं कृतम्। यथा *दिग्देशकालेष्वस्ताति* रिति सूत्रे दिग्देशकालशब्दा बीजरूपेणावस्थिता वर्तन्ते। एतेषां शब्दानां यादृशी हृदयहारिणी व्याख्या दर्शनकोशेऽस्मिन् कृता सान्यत्र सुदुर्लभा।

पाणिनीयशिक्षाया त्रिनयनसंज्ञकं भाष्यमप्याचार्यबच्चूलालावस्थिमहाभागेन कृतं, यत्कालिदासाकादेम्या प्रकाशितम्। भाष्यमेतद् सर्वथा महाभाष्यस्य शैलीमनुसरति। सर्वान् शिक्षाग्रन्थान् विलोड्य कृतेऽस्मिन् भाष्ये पाणिनैः सर्वं कथ्यं प्रकाशितम्। अद्यावधि पाणिनीयशिक्षायाः ईदृशं भाष्यं न कृतमतोऽनेन व्याकरणवाङ्मयस्य महती समृद्धिर्जाता। श्रीबालकृष्णशर्मणास्य चिन्तामणिनाम हिन्दीभाष्यमपि कृतं, यदस्मिन्नैव संलग्न वर्तते।

अपरञ्चावस्थिमहाभागेन सिद्धान्तकौमुद्याः सन्ध्यन्तं व्याख्यापि कृता, या छात्राणां कृतेऽतीव सुबोध्या वर्तते।

डॉ. पुष्पा दीक्षिता–महाभागयानया *अष्टाध्यायी सहज बोध* इत्याख्यो यो खण्डद्वयात्मको ग्रन्थो विरचितः, स तु प्रतिभा प्रकाशन 29/5 शक्तिनगर, दिल्लीतः प्रकाशितः। ग्रन्थेऽस्मिन् पाणिनीयधातुपाठे पठितानां सर्वेषां धातूनामन्येषाञ्च सनाद्यन्तधातूनां, सर्वेषु लकारेषु, सर्वासु च प्रक्रियासु रूपनिर्माणाय लघुतमोपायः प्रदर्शितः। अपूर्वोऽयमुपायो वर्तते, यस्मिन् पाणिनीयाभिप्रायेणैव सर्वं विचारितम्।

ग्रन्थेनानेन सर्वेषां धातूनां सर्वेषु लकारेषु, सर्वासु च प्रक्रियासु सर्वाणि

रूपाणि मासद्वयेन निर्मातुं शक्यन्ते, इत्यस्य वैशिष्ट्यम्। एतदर्थमादावष्टाध्याय्यां पठिताः सर्वे प्रत्ययाः, संकलय्य पठिताः। अनन्तरं तेषां सार्वधातुकार्धधातुकविभागः कृतः। सार्वधातुकेषु प्रत्ययेषु परेषु कीदृशमङ्गकार्यं भवत्यार्धधातुकेषु च प्रत्ययेषु परेषु च कीदृशमङ्गकार्यं भवति, इति विभज्य निर्दिष्टम्। धातुपाठस्य पुनर्व्यवस्थापनपामप्यङ्गकार्यानुसारेणैव कृतम्। धातुपाठेऽस्मिन् पाणिनीयधातुपाठे परिपठिताः सर्व एव धातव उपात्ताः, परमङ्गकार्यदृष्ट्या तेषां धातूनां क्रमो भग्नः।

सिद्धान्तकौमुद्यादिषु ग्रन्थेष्वकारादिक्रमेण लकाराणां सिद्धिः क्रियते। लट्, लिट्, लुट, लृट, लेट, लोट् इति लकाराणामकारादिक्रमौ वर्तते। अत्र नास्ति किमपि विज्ञानं, न चात्रास्ति किमपि प्रमाणम्। भूधातोः लट्लकारस्य रूपं साधयित्वा यदा लिट्लकारस्य रूपं साध्यते, तदा सर्वा प्रक्रिया परिणमति। यथा लट्लकारे परे विकरणस्य विचारः क्रियते। लिटि परे इडागमस्य विचारः क्रियते, द्वित्वादयश्च क्रियन्ते। अतः येषां लकाराणां प्रक्रियासादृश्य भवति तेषां लकाराणां रूपसिद्धिर्यद्येकत्र क्रियेत तदा महल्लाघवं भवति। अतः ग्रन्थेस्मिन् लट्लकारानन्तरं लोट्, लङ्, विधिलिङ्, इत्येतेषां सार्वधातुकल- कारणां सिद्धिः कृता। अनन्तरमव-शिष्टानामार्धधातुकलकाराणाम्। सिद्धान्तकौमुद्यादिष्वेकस्य धातोः सर्वलकाररूपाणि साधयित्वा ततोऽन्यस्य धातोः सर्वलंकाररूपाणि साध्यन्ते। लकाराणामेष प्रचलितः क्रमोऽप्यत्र भग्नः।

अष्टाध्यायीसहजबोधस्य प्रथमे सार्वधातुकखण्डे सर्वेषां धातूनां लट्, लोट्, लङ्, विधिलिङ्, इत्येतेषु चतुर्थ लकारेषु रूपनिर्माणविधिरूपदिष्टः। अष्टाध्यायीसहजबोधस्य द्वितीयआर्धधातुकखण्डे सर्वेषां धातूनां एकैकस्यार्ध-धातुकलकारे रूपनिर्माणविधिरूपदिष्टः। यथा लृट्लकारस्य रूपनिर्माणविधावेव सर्वेषां धातूनां लृटलकाररूपाणि साधितानि। इत्थमेव लिङ्लकारादिनां रूपसिद्धिः।

लकारानन्तरं यङन्तप्रक्रिया, यङ्लुगन्तप्रक्रिया, सन्नन्तप्रक्रिया, भावकर्मप्रक्रिया, लकारार्थप्रक्रिया च तथैवोपदिष्टाः।

अष्टाध्यायीसहजबोधस्य तृतीये कृदन्तखण्डे, चतुर्थे च तद्धितखण्डे कृत्तद्धितनिर्माणविधिरष्टाध्याध्या मन्तव्यानुसारेण प्रदर्शितः। एतत्खण्डद्वयम-द्यावध्यप्रकाशितम्। वर्षेणैकेनाष्टाध्यायी कृत्स्ना सिध्येदित्यष्टाध्यायीसहजबोधस्य प्रयोजनम्। एतदर्थं सकलामष्टाध्यायीमभिव्याप्य कार्यमष्टसु खण्डेषु क्रियमाणमस्ति।

डॉ. पाठकमनीषा—रायपुरस्थसंस्कृतमहाविद्यालयस्य व्याकरण- विभागस्याध्यक्षया पाठकमनीषया *पाणिनीयाष्टाध्याय्या तद्धितसूत्राणां समीक्षणम्* इति विषयमिधकृत्य ग्रन्थो विरचितः। ग्रन्थेऽस्मिन् सर्वे तद्धितप्रत्यया तद्धिताधिकाराश्च पृथक्कृत्य विचारिता।

डॉ. कमलाप्रसादपाण्डेय—विलासपुरस्थस्य सी. एम. दुबे स्नातकोत्तरमहाविद्यालयस्य संस्कृत विभागाध्यक्षेणाथ च गुरुघासीदास-विश्वविद्यालयस्य संस्कृताध्ययन-मण्डलाध्यक्षेणाचार्येण डॉ. कमलाप्रसादपाण्डेयेन लिखित *पाणिनीय और सारस्वतीय पारिभाषिक संज्ञाओं का तुलनात्मक अध्ययन* इत्याख्यो ग्रन्थः 1999 तमे वर्षे भारतीय विद्याप्रकाशन दिल्लीतः प्रकाशितोऽस्त। अस्मिन् ग्रन्थे भूमिकोपसंहाराभ्यां सह चत्वारोऽध्यायाः सन्ति। "समानुपूर्वीक संज्ञाएँ" इति नामके प्रथमाध्याये द्विषष्टि (62) संज्ञानां "पर्यायवाची संज्ञाएँ" इति नामके द्वितीयाध्याये द्वयोः (02) संज्ञयोस्तुलनात्मकमध्ययनं वर्तते। याः संज्ञाः सारस्वतव्याकरणे न प्राप्यन्तेऽपितु केवलं पाणिनीयव्याकरणे प्राप्यन्ते, तासां विवेचनं "केवल सारस्वतीय संज्ञाएँ" इति नामके चतुर्थाध्याये कृतम्। इत्थमस्मिन् ग्रन्थे नवनवति (99) संज्ञानां विवेचनं कृतमस्ति। एतासां सर्वासां संज्ञानां तत्र व्युत्पत्ति, अन्वर्थता, इतिवृत्तञ्च वर्णितमस्ति। उभये व्याकरणे अधिकृत्य प्रतिसंज्ञं स्वरूपमौचित्यञ्चापि ग्रन्थेऽस्मिन् प्रतिपादितमस्ति।

डॉ. पाण्डेस्य व्याकरणविषयेऽनेके लेखा अपि सन्ति, तेषु च केचिदित्थं वर्तन्ते, यथा—

1. द्विरुपदिष्ट हकार के नौ प्रयोजन।
2. कश्मीर की व्याकरण शास्त्र को देन।
3. राष्ट्रीयता—पाणिनीय व्याकरण के सन्दर्भ में। एते लेखा गवेषणापूर्णाः सन्ति।

डॉ॰ सुशील चन्द्रो मिश्रः—महाभागेनानेन "वाक्यपदीयानुसारेण दर्शनान्तरीयतत्त्वानां तुलनात्मकं समीक्षणम्" इति ग्रन्थ विरचितः। ग्रन्थेऽस्मिन् सप्त प्रकरणानि सन्ति।

1. मूलतत्त्वसमीक्षणम् 2. शक्तिसमीक्षणम् 3. पदार्थसमीक्षणम् 4. प्रमाणसमीक्षणम् 5. शब्दतत्त्वसमीक्षणम् 6. वाचकत्वसमीक्षणम् 7. वाच्यत्वसमीक्षणञ्च।

तत्र प्रथमे प्रकरणे आदावात्मनैरात्मावादपरिचयपूर्वकम-भिन्नात्मसच्चित्स्वरूपस्य सूक्ष्मस्य शब्दब्रह्मणोऽद्वयत्वं जगन्मूलकारणत्वञ्च

प्रतिपादितम्। ततः स्थूलशब्दस्य वैखरीवाग्रूपस्य लौकिके व्यवहारे महत्त्वं प्रदर्शितम ततो जीवेश्वरौ, अविद्यां च शाब्दिकरीत्या प्रतिपाद्यान्ते शब्दाद्वैतस्य दर्शनान्तरीयमतेवसाङ्कर्यं च निरूपितम्।

द्वितीये प्रकरणे– आदौ शक्तीनां ब्रह्मणस्तवान्यत्वाभ्यामनिर्वचनीयताम्प्रदर्श्य कालशक्तेरविद्याशक्तेश्च परस्परं भिन्नाभिन्नत्वं, मुख्यामुख्यत्वं च प्रतिपादितम्। ततो दिक्साधनक्रियाकालेति चतसृषु शक्तिष्वादौ दिक्शक्तेवैशेषकरीत्या लक्षणं स्वभावतस्तस्या एकत्वमौपाधिकं च नानात्वमुपस्थाय वैयाकरणरीत्या तल्लक्षणं, तस्या व्यवहारदशायां नानात्वमेव न त्वेकत्वं नापि तस्याः पारमार्थिकी स्थितिश्चेति विषयाः निरूपिता। दिक्शक्तेर्वर्णनानन्तरं साधनस्वरूपं निरूपितम्। ततः सदसत्कार्यवादमतसमन्वयपूर्वकं कर्तृकर्मकारकप्रतिपादनं कृत्वा कारकान्तराणि प्रतिपादितानि। ततः साधनविषये मतान्तराणि प्रदर्श्य शक्तिरेव साधनं न तु द्रव्यमिति निरूपितम्। अन्ते च कालविषये त्रयो दर्शनभेदा।

तृतीय प्रकरणे—वैशेषिकाभिमतानां जातिद्रव्यगुणादिपदार्थेष्वादौ जाते सामान्येन लक्षणं प्रदर्श्याकाशादीनाममूर्तानामपि जातित्वं प्रतिपादितम्। ततो जातेराश्रयाणां व्यक्तीनां प्रलयकाले विनाशेऽपि जातेर्नित्यत्वं प्रतिपादितम्। अनन्तरं शब्दार्थज्ञानानां परस्परमौपाधिकक्यं विचारितम्। ततो भावाभावत्वं सामान्यविशेषत्वं क्रमयौगपद्यं च विचार्यान्ते वैशिष्काभिमतायां पदार्थव्यवस्थायामनुपपत्तिः प्रदर्शिता।

चतुर्थ प्रकरणे—आदौ वैयाकरणानां मते सर्वेषु प्रमाणेषु शब्दप्रमाणस्य श्रेष्ठत्वं प्रतिपाद्यप्रत्यक्षानुमानमात्र प्रमाणस्वीकारेऽनुपपत्तिप्रदर्शनपूर्वकं ताभ्यामतिरिक्तस्य शब्दस्य प्रमाणत्वं प्रतिपादितम्। ततो वेदानां पौरुषेयापौरुषेयत्वं प्रदर्श्य वेदमूलत्वात् स्मृतीनामपि प्रामाण्यं समर्थितम् ततश्च नैयायिकमतं निराकृत्यान्ते व्याकरणस्य स्मृतित्वं पुण्यजनकत्वं च साधितम्।

पञ्चमे प्रकरणे—आदौ मीमांसा-न्यायरीत्या विस्तरेण शब्दस्य नित्यानित्यत्वमुपवर्णय दर्शनान्तरीयाणाञ्च मतमुपस्थाप्य तस्य पारमार्थिकं व्यावहारिकं च नित्यत्वं विस्तरेण निरूपितम्। ततो ध्वनिस्फोटौ मतभेदेन सविस्तरं समीक्षितौ। ततो दर्शनभेदेन वायोरणूनां ज्ञानस्य शब्दभावत्वं विचारितम्। तत्श्च प्रसङ्गाद् विवर्तपरिणामौ विचार्यान्ते वाण्या भेदा विचारिताः।

षष्ठे प्रकरणे—आदौ दर्शनभेदेन वर्णपदवाक्यानां जातिव्यक्त्योश्च वाचकत्वं

विचारितम्। ततः सखण्डाखण्डवादिनां प्रचलिता अष्टौ वाक्यविकल्पाः प्रदर्शिता। ततः पदवाक्यवादिनोः पक्षप्रतिपक्षतया मतमुपस्थाप्य निरवयवस्य वाक्यस्यैव पारमार्थिकं वाचकत्वं समर्थितम्। ततश्चान्तेऽपोद्धरबुद्ध्या नामाख्यातोपसर्गनिपात-कर्मप्रवचनीयेति पञ्च पदानि विचारितानि।

सप्तमे प्रकरणे–आदौ दर्शनभेदेन षड्वाक्यार्थविकल्पाः समुपस्थापिताः। सम्भाव्यानामन्येषां च वाक्यार्थानामेतेषु षट्ष्वेवान्तर्भावश्च प्रतिपादितः। ततोऽपोद्धारबुद्ध्या पदार्थविचारे आदौ दर्शनान्तरीयाणां वैयाकरणानां च रीत्या जात्याकृतिव्यक्तिरूपाः पदार्थाः विचारिताः अन्यानि च मतान्तरीयाण्युप-स्थापितानि। ततश्चान्ते वैयाकरणरीत्या लिङ्गसंख्यादीनां च सविस्तरं पदार्थत्व समीक्षितम्। संक्षेपेण च पुनरपि तत्तद्दर्शने स्वीकृतः संम्बन्धो निर्दिष्टः।

डॉ. विद्याकान्तत्रिपाठी–सामरवारस्थेन महाभागेनानेन *वाल्मीकि रामायण के आर्ष प्रयोगों का अध्ययन* इति विषयमधिकृत्यं शोधकार्यं कृतम्।

डॉ. नरेन्द्रप्रसादशुक्लः–बिलासपुरस्थेन महाभागेनानेन *पाणिनीय व्याकरण में प्रयुक्त प्रत्याहारों का आलोचनात्मक अध्ययन* इति विषयमधिकृत्य शोधकार्यं कृतम्।

डॉ. देवशरणपाण्डेयः–बिलासपुरस्थेन महाभागेनानेन *सारस्वत व्याकरण में पारिभाषिक संज्ञाओं का उद्भव और विकास* इति विषयमधिकृत्य शोधकार्यं कृतम्।

डॉ. रामनारायणमिश्रः– विलासपुरस्थेन महाभागेनानेन *पुराणों में उल्लिखित व्याकरणशास्त्रीय सामग्री का समीक्षात्मक अध्ययन* (अग्निपुराण तथा नारदपुराण के विशेष आलोक में) इति विषयमधिकृत्य शोधकार्यं कृतम्।

डॉ. नन्हकूरामपाठकः–बिलासपुरस्थेन महाभागेनानेन *शाकटायन-व्याकरण (अभिनव) में प्रयुक्त पारिभाषिक संज्ञाओं का आलोचनात्मक अध्ययन* इति विषयमधिकृत्य शोधकार्यं कृतम्।

डॉ. रमाकान्तपाण्डेयः– सागरस्थेन महाभागेनानेन रूपावतारस्य टीका सम्पादनञ्च कृतम्।

आचार्यरामफलशुक्लः–जबलपुरस्थेन महाभागेनानेन *पाणिनीयाष्टाध्याया अधिकारसूत्राणां समीक्षणम्* इति विषयमधिकृत्य शोधकार्यं कृतम्।

आचार्यलक्ष्मीकान्तमिश्रः–जबलपुरस्थेन महाभागेनानेन *पाणिनीयाष्टाध्याया विभाषासूत्राणां समीक्षणम्* इति विषयमधिकृत्य शोधकार्यं कृतम्।

आचार्या पाठकपूर्णिमा–रायपुरस्थया महाभागयानया *पाणिनीयाष्टाध्याय्या परिभाषासूत्राणां समीक्षणम्* इति विषयमधिकृत्य शोधकार्यं कृतम्।

मध्यप्रदेशस्य विविधेषु नगरेषु ग्रामेषु च याः सन्ति पाठशाला तासु सन्ति नैके वैयाकरणाः, परं तेषां लिपिबद्धं कार्यमद्यावध्यनुपलब्धम्। मध्यप्रदेशे संस्कृताध्ययनस्य कृते न वर्तते कापि निश्चिता नीतिरतो विद्वांसोऽपि किमपि कर्तुं न पारयन्ति, छात्राश्च संस्कृताध्ययनाय हतोत्साहा भवन्तीति शम्।

स्वातन्त्र्योत्तरव्याकरणशास्त्रे वाराणस्याः योगदानम्

रमाकान्त पाण्डेय

महेश्वराल्लब्धचतुर्दशसूत्राण्युपजीव्य प्रणीतस्य पाणिनीयशास्त्रस्य दर्शनत्वं वा न वति विषयेऽस्मिन् विवदन्ते साम्प्रदायिकाः, तस्य पदसाधुत्वासाधुत्वविषयमात्रे प्रवृत्तिस्वीकृतेः। व्याकरणदर्शनमाश्रित्य मुनि-व्याडिप्रणीतो लक्षश्लोकात्मकः सङ्ग्रहग्रन्थोनोपलभ्यते साम्प्रतम्। मुनिभिश्च पाणिनिकात्यायनपतञ्जलिभिः प्रक्रियांशस्यैव प्राधान्येन व्याख्याततत्वात् शास्त्रस्यास्य दार्शनिकत्वं न बहुमन्ववे शास्त्रवत्त्वविदः। अतश्च पातञ्जलमहाभाष्ये प्रसङ्गतो व्याख्यातान्येतच्छास्त्रीय-दार्शनिकतत्त्वान्याधारीकृत्य हरिप्रणीते पदसाधुत्वलक्षणप्रक्रियाविधुरे वाक्यपदीयग्रन्थेऽश्रद्दधानो निराकृतवान् शास्त्रस्यास्य दार्शनिकत्वप्रयोजनमपि शिवदृष्टिकारः। तथाहि—

वैयाकरणतां त्यक्त्वा विज्ञान्लान्वेषणेन किम्।
भवतामप्रस्तुतेन न केवलमिहोदितम्।।[1]

तथा चाह तत्रैव वृत्तिकार उत्पलदेवः—

अर्थप्रतीतिंहेतुसाधुशब्दानुशासनव्यापारमेव वैयाकरणत्वं त्यक्तवा मोक्षप्रयोजनैः शास्त्रैः यत् सम्यग् ज्ञानमनुसरणीयं तदन्वेषणेन भवतां करणीयत्वेन अप्रस्तुतेन न किञ्चित्[2]...

एतादृशानां पूर्वपक्षिणां मतनिरसनपुरस्सरं दीक्षित-कौण्डभट्ट-नागोजिभट्टप्रमुखैः शब्दशास्त्रानुयायिभिः शब्दशक्ति-प्रातिपदिकार्थ-कारकार्थ-समासार्थादिविवेचनेन दार्शनिकपक्षोऽस्य यद्यपि साधितस्थापि शाब्दबोधसिद्धान्तानां प्राधान्यात् शाब्दिकाभिमतप्रमाणादिव्यवस्थां तेषां ग्रन्थेष्वपि स्थानं न लब्धवतीति 'शब्द प्रमाणकां वयम्' यच्छब्द आह तदस्माकं प्रमाणम् इत्यादिरूपेण भाष्याब्धौ निमग्नानि तत्प्रमाणतत्त्वबीजानि तस्मिन् कालेऽपि तथैव तस्थुः। किन्तु शतकस्याऽस्य उत्तरार्द्धे तत्तद्ग्रन्थेषु विकीर्णान् तांस्तान् सिद्धान्तान् प्रसमीक्ष्य

व्याकरणशास्त्रानुसारिणी मोक्ष-प्रमाणादिव्यवस्था प्रतिष्ठापिता काश्यां सुधीभिः। अस्मिन्नेव काले वाक्यपदीयादिमहाग्रन्थेषु टीकाप्रणयनेन च भृशमुपकृतमिदं शास्त्रम्। किञ्च, मूलग्रन्थरचनया सहैव केषाञ्चित् काशिकादिग्रन्थानां लघुसंस्करणानि नैकेऽनुसन्धानप्रबन्धाः शोधपत्राणि च बहूनि दृग्गोचरीभवन्ति कालखण्डेऽस्मिनकाश्यां प्रणीतानि इति निबन्धोऽयं विभज्यते चतुर्धा विषयप्रतिपादनसौकर्यायेति—

1. मूलग्रन्थाः
2. पुनः संस्कृता ग्रन्थाः
3. टीकासाहित्यम्
4. शोधप्रबन्धा निबन्धाश्च

1. मूलग्रन्थाः—श्रीमता रामाज्ञापाण्डेयेन व्याकरणदर्शन-भूमिका पीठिका प्रतिमा चेति त्रिषु ग्रन्थेषु व्याकरणदर्शनस्यनैके विषयाः प्रतिपादिताः। शास्त्रस्यास्य दर्शनत्वं प्रतिपाद्य अस्य स्वरूप-सम्बन्ध-विषयाधिकारोति चतुष्टयं व्याकरणदर्शनभूमिकाख्ये ग्रन्थे निरुपितम्। यद्यपि भाष्यवाक्यपदीयादि ग्रन्थाश्रयेणैवेह शास्त्रोपयोगितत्त्वानि व्यतनोत् ग्रन्थेकारस्तथापि क्वचित् तत्स्वातन्त्र्यमपि दृष्टिपथमायाति। यथा च वाचः स्वरूप विवेचने ग्रन्थकृदयं भजते स्वातन्त्र्यम्। शाब्दिकनये वाचस्त्रित्वं चतुष्ट्वं त्रेति विषयोऽयवतरति विवादपथं, हरि-कैयटादिभिः तत्परवर्तिभिः पराया वाचोऽस्वीकृतेः, नागेशेन च तस्या अङ्गिकारात्। किन्तु रामाज्ञापाण्डेयास्तु परायामेव वाचि शाब्दिकसिद्धान्तानुगुणतां पश्यन्ति। अत्र ग्रन्थे व्याकृताऽव्याकृतभेदेन वाचो द्वैविध्यमुक्तं तैः। अव्याकृता वाक् परा, व्याकृताश्च पश्यन्ती मध्यमा-वैखर्यः। एवं पराया एव एतौ द्वौ भेदौ कल्पिताविह। व्याकृतात्मिकां पश्यन्त्यादित्रयीं वाणीमाश्रित्य व्याकरणविषयः प्रकृतिप्रत्ययादिविभागः प्रवर्तत इति हि तेषां सिद्धान्तः।

एवमेव लघुमञ्जूषामुपजीव्य आन्तर-बाह्यभेदेन स्फोटस्य द्वैविध्यं प्रतिपाद्य भूषणकृदभिमतस्फोटभेदेष्वश्रद्दधानः पण्डितप्रवरोऽयं षोडशविधत्मस्य प्रत्यपादयत्। तथा चाह ग्रन्थकारः—

"अद्यावधि प्रचलितानामष्टानां स्फोटानां स्वरूपं विचार्यते। तत्र वर्णस्फोटस्योदाहरणं 'पचति' इत्येतद्घटकपच्प्रकृतिव्यङ्ग्यः 'ति' इति प्रत्ययव्यङ्ग्यः स्फोटो वर्णस्फोटः। तार्किकाणां मते यच्छक्तं पदमिति तद्व्यङ्ग्यस्फोटस्यैव शाब्दिकनये वर्णस्फोटशब्देन व्यवहारः, इति च प्रभाया मुक्तम्।

अस्यां स्थितौ वाक्यार्थज्ञानमस्माकं कृते वाक्यस्फोटस्य विलय एव स्यात्। नापि 'पचति' इत्यादौ पदस्फोटव्यवहारः। तथा चाऽयं विभागो नहि युक्तियुक्तः। अतएव नागेशभट्टो नहि अष्टौ स्फोटान् मञ्जूषायां निरदिक्षत, किन्तु केवलम् आन्तर-बाह्यभेदेन द्वौ स्फोटौ प्रदर्श्य बाह्यस्फोटस्य जातिव्यक्तिभेदेन द्वावेव भेदौ प्रादर्शयत्। तथा च व्यवहारदृष्ट्या बाह्यस्फोट प्रदर्शने प्राप्ते वक्ष्यमाणरीतिरेव अस्माभिरवलम्बनीया।

तथा हि व्यक्तिः पदार्थ इति व्याडिमते व्यक्तिस्फोटः। जातिपदार्थ वादिनो वाजप्यायनस्य मते जातिस्फोट इत्येवं रूपेण द्वौस्फोटौ अभ्युपगन्तव्यौ। यदि चावान्तरस्फोटप्रतिपादने आग्रहः, तर्हि कल्पितानि पदानि, कल्पितपदेषु कल्पितौ प्रकृतिप्रत्ययावादाय वक्ष्यमाणपद्धत्या स्फोटः स्वीकार्यः।[3] एवं श्रीमत्पाण्डेयमतानुसारेणैते षोडशभेदाः स्फोटस्य भवन्ति–

1. प्रकृतिस्फोटः, 2. प्रत्ययस्फोटः, 3. प्रकृतिजातिस्फोटः, 4. प्रत्ययजातिस्फोटः, 5. अखण्डप्रकृतिस्फोटः, 6. अखण्डप्रत्ययस्फोट, 7. वर्णस्फोटः, 8. वर्णजातिस्फोटः, 9. पदस्फोटः, 10. पदजातिस्फोटः, 11. अखण्डपदस्फोटः, 12. वाक्यस्फोटः, 13. वाक्यजातिस्फोटः 14. अखण्डपदजातिस्फोटः, 15. अखण्डवाक्यस्फोटः 16. अखण्डवाक्य-जातिस्फोटश्चेति।

किन्तु श्रीपाण्डेयस्य समकालिको नैयायिकः न्यायचक्रचूडामणिः श्रीमान् बदरीनाथ शुक्लमहोदयः, नाऽस्य औचित्यं स्वीकरोति। अतश्च निराकृतं तेन व्याकरणदर्शनभूमिका कृन्मतम्[4]। श्रीमच्छुक्लभावभावितैः कैश्चित् शाब्दिकैरपि श्रीमतः पाण्डेयस्य मतं खण्डितम्। तत्तु राममनोहरमिश्रप्रणीते 'भूषणसारपरमल-घुमञ्जूषयोः सिद्धान्तानां समीक्षा' इत्यस्मिन् ग्रन्थे द्रष्टुं शक्यते सुधीभिः।

न स्फोटस्य षोडशभेदा अपितु अष्टादशभेदाः स्वीकर्तव्या इति 'स्फोट-विस्फोटः (सारस्वतीसुषमायाः 12.2 तमेऽङ्के) इत्यस्मिन् निबन्धे श्रीमच्छुक्लमहोदयस्य सम्मतिं वीक्ष्य यः कोऽपि शाब्दिकोऽवगन्तुं शक्नोति यद् व्याकरणदर्शनभूमिकायां षोडशसङ्ख्यया स्फोटस्य परिगणनं नोक्तं तत्कृता। तत्तु निदर्शनमात्रमेवेति तार्किक शाब्दिकाभ्यामुभाभ्यामपि श्रीपाण्डेयमतस्यालोचनं दृष्ट्वा महर्षिकल्पविदुषा श्रीमद्रामप्रसादत्रिपाठिनोक्तम्–

"वस्तुतो भेदानां विमर्शे क्रियमाणे द्वात्रिंशत्सङ्ख्याकाः स्फोटाः प्रतीयन्ते। तथा हि-प्रकृति-प्रत्ययस्फोटौ एकवर्णरूपौ द्विविधौ। एतौ पुनः प्रत्येकं

सखण्डाखण्डभेदाभ्यां द्विविधा-विति चतुर्विधो। इत्थं व्यक्तिपक्षे मिलिताः सर्वे षड्विधा जाताः। जातिपक्षे पुनश्चत्वार एव। पद्वाक्यस्फोटौ च व्यक्तिपक्षे चतुर्विधौ, जातिपक्षे च द्विविधौ। एवं च व्यक्तिपक्षे सङ्कलनया इमे दशसङ्ख्याकाः सम्पन्नाः, जातिपक्षे तु षट्, सङ्कलिताः षोडश। आन्तरबाह्यभेदाभ्यां पुनर्भेदैः द्वात्रिंशत्सङ्ख्याका ज्ञातव्याः। व्याकरण-दर्शनभूमिकायां षोडशस्फोटा इति कथनं च न सङ्ख्यावधारणपरम्, अपि तूपलक्षणपरमिति विभाव्यतां सुधीभिरिति"।[5]

त्रिपाठिचरणानां मते स्फोटभेदा इमे एवं परिगणयितुं शक्यन्ते–

1. एकवर्णरूपप्रकृतिस्फोटः, 2. एकवर्णरूपप्रत्ययस्फोटः, 3. अनेकवर्णवत्प्रकृतिस्फोटः, 4. अनेकवर्णवत्प्रत्ययस्फोटः, 5. अखण्डानेकवर्णव प्रकृतिस्फोटः, 6. अखण्डानेकवर्णवत्प्रत्ययस्फोटः, 7. एकवर्णरूपप्रकृति–जातिस्फोटः, 8. एकवर्णरूपप्रत्ययजातिस्फोटः, 9. अनेकवर्णवत्प्रकृति-जातिस्फोटः, 10. अनेकवर्णवत्प्रत्ययजातिस्फोटः, 11. पदस्फोटः, 12. अखण्डपदस्फोटः, 13. वाक्यस्फोटः, 14.अखण्डवाक्यस्फोटः, 15. अखण्डपदजातिस्फोटः, 16. अखण्डवाक्यजातिस्फोटश्चेति षोडश। एते आन्तरस्फोट-बाह्यस्फोटभेदाभ्यां द्विविधा इति द्वात्रिंशद् भवन्ति।

वस्तुतस्तु श्रीमतापाण्डेयेन ये भेदाः प्रदर्शितास्ते वाह्यस्फोटभेदा एव। यदि आन्तरस्फोटेऽपि एते भेदाः स्वीकृताः स्युः तदैकमत्यमेवोभयोः। केवलं विभागप्रकार एव एतयोर्मतभेदः, न तु विषयविवेचन इति।

व्याकरणदर्शनपीठिकायां प्रतिपादितास्तु सर्वे विषयाः परम्पराप्राप्ता एवेति नेह प्रतन्यते तत्सर्वं विस्तरभियेति तत एव अवधेयम्।

शब्दशास्त्रीयप्रमाणव्यवस्था–शाब्दिकानां प्रमाणव्यवस्था भाष्याद्याकर- ग्रन्थेषु विकीर्णैव आसीत्। तत्र प्रसङ्गात् क्वचित् प्रमायाः क्वचिद्गात् प्रमाणस्य चर्चा लभ्यते। यथा–'मानं हि नाम अनिर्ज्ञातज्ञानार्थमुपादीयते, अनिर्ज्ञातमर्थं ज्ञास्यामि।[6] अथ चैतदेवानुवदन् हरिरप्याह–

अनिर्ज्ञातस्य निर्ज्ञानं येन तन्मानमुच्यते।
प्रस्यादि तेन मेयात्मा साकल्येनावधार्यते।।[7]

अयमस्ति श्रीमान् पाण्डेयः येन प्रथमतः प्रमाणानां व्यवस्थापनोपक्रमः कृतः शास्त्रे। तत्तद्ग्रन्थेषु विकीर्णानि प्रमाणव्यवस्थोपयोगितत्त्वानि सङ्कलय्य विदुषाऽनेन शाब्दिकानां संक्षिप्तप्रमाणविधिः प्रदर्शितो व्याकरणदर्शन-भूमिकायाम्। तत एव प्राप्तप्रेरणः पण्डितप्रवरो रामप्रसादस्त्रिपाठी *पाणिनीय-व्याकरणे प्रमाणसमीक्षा*

इत्याख्यं ग्रन्थं व्यरीरचत्। पण्डितप्रवरोऽसौ अनिर्ज्ञातेत्यादिभाष्यकृदुक्त्याश्रयेण 'अनिर्ज्ञातार्थविषयकं सम्भावितसकल-धर्मप्रकारकं ज्ञानं प्रमा, तत्करणं प्रमाणम्''[8] इति प्रमाणसामान्यलक्षणमुपन्यस्तवान्। नैयायिकादीनां पूर्वपक्षिणां मतनिरसनपूर्वकमिह 'प्रत्यक्षमनुमानमर्थापत्तिःशब्दश्चेति चत्वारि शाब्दिकसम्मतानि प्रमाणानि साधितानि। प्रमाणेष्वेतेषु शब्दस्यैव प्राधान्यमुक्तमिति नैतेन सम्प्रदायविरोधः। लक्षणादिपरिष्कारे श्रीमन्तस्त्रिपाठिचरणा विशिष्यन्ते। प्रमाणसामान्य-लक्षणस्य एकैकमपि पदं परिष्कुर्वन्तस्ते रचयन्ति प्रमाणव्यूहम्।

समासतोऽत्र लक्षणे 'अनिर्ज्ञात' इति पदं स्मृतावतिप्रसक्तिवारणार्थं प्रयुक्तम्। 'निर्' इत्युपसर्गस्तु नैरन्तर्यार्थवाचकस्तेन चाव्यवधानं लभ्यते। 'साकल्येन' इत्यनेन च प्रमाया अबाधितार्थविषयकत्वं गम्यते। बाधितार्थविषयकं ज्ञानं नानिर्ज्ञातमर्थं साकल्येन परिच्छिनत्ति, विशेषधर्माविषयकत्वात्। साधारणधर्मदर्शने तु तद्बाधः। यथा 'इदं रजतम्' इत्यत्र इदन्त्वं चाकचिक्यादिकं च साधारणो धर्मः प्रतीयते, न तु शुक्तित्वादिको विशेषः इत्यलं विस्तरेण।[9]

शाब्दिकाभिमतं मोक्षस्वरूपम्–शास्त्रे मोक्षव्यवस्थामदृष्ट्वैव सोमानन्देन तच्छिष्येण चोत्पलदेवेन व्याकरणस्य शास्त्रत्वं निराकृतम् आसीत्। हर्यादिभिर्यद्यपि बहुत्र मोक्षशब्दः पठितस्तथापि तद्वाप्तिमार्गो नैव प्रदर्शितः। व्याकरणाध्ययन-प्रयोजनेष्वपि मोक्षोऽपरिगणित एव। श्रीमद् रामाज्ञा-पाण्डेयमहोदयैर्मोक्षतत्त्वस्वरूपव्याख्यानम् इदम्प्रथमतया कृतं शास्त्रे।

संक्षेपेण इह एतद् वक्तुं शक्यते यत् पराख्यवाचः साक्षात्कार एवेह मोक्षः। साधको गुरुणोपदिष्टमार्गेण पराख्यां वाचं साक्षात्करोति। अत्र मोक्षवस्थायामपि नहि शक्तीनां विलयः स्वीक्रियते, तासां यथावज्ज्ञानावस्थाया एव मोक्षशब्दवाच्यत्वात्। गौरीनाथशास्त्रि-महाप्रभु-लालगोस्वामिमहोदयाभ्यामपि श्रीमतः पाण्डेयस्य सिद्धान्तोऽयं पल्लवितः।[10]

अन्ये च ये मूलग्रन्थ सन्ति तेषु रघुनाथशर्मणः 'व्याकरणदर्शनबिन्दुः', द्विवेदिनो ब्रह्मदत्तस्य 'शब्दाद्वैतदर्शनबिन्दुः' त्रिपाठिनो रामप्रसादस्य 'सिद्धान्तचिन्तामणिः', 'शब्दशास्त्रीयवृत्ति-विमर्शश्च', चतुर्वेदिनो रामाधीनस्य 'संस्कृतभाषाविज्ञानम्', इत्येते ग्रन्था उल्लेखमर्हन्ति। रघुनाथशर्मणो व्याकरणदर्शनबिन्दौ शाब्दिकसम्मतपदवाक्यादिसिद्धान्तानां वाक्यपदीयानु-सारिविवेचनं कृतं विद्यते। दर्शनान्तरेषु प्राप्तानि शब्दशास्त्रोप-योगितत्त्वान्यपीहोपस्थापितानि सन्ति।

अभिनवपाणिनिकल्पविदुषः शिवसायुज्यं प्राप्तवतो रामप्रसादत्रिपाठिनः 'सिद्धान्तचिन्तामणौ' यद्यपि नियमापवादसूत्राण्येव व्याख्यातानि तथापि व्याख्यानस्याऽस्य अपूर्वत्वं नैव व्याहन्यते। 'शब्दशास्त्रीयवृत्तिविमर्शे' तु ग्रन्थकृता शक्तिर्लक्षणा व्यञ्जना चेति तिस्रो वृत्तयश्चर्चिताः। लघुकलेवरेऽस्मिन् ग्रन्थे गदाधरादीनां पूर्वसूरिणां बदरीनाथशुक्लसदृशस्य चाधुनिकविदुषः सिद्धान्तानां सहैव विवेचनं कृतम्। भाष्याननुसारि च रत्नप्रभाकृन्मतं खण्डितं पण्डितप्रवरैः।

2. पुनः संस्कृता ग्रन्था–स्वातन्त्र्योत्तरकाले विविधविश्वविद्यालयेषु पाठ्यक्रमेषु निर्धारितग्रन्थानां छात्रोपयोगिसंस्करणान्यपि प्रकाशितानि। वाराणसेयसंस्कृतविश्वविद्यालये प्राचीनव्याकरणविभागे पूर्वोत्तरमध्यमादिपरीक्षासु नियोजितायाः काशिकायाः लघुसंस्करणं निरमायि लघुकाशिकानाम्ना काशीहिन्दूविश्वविद्यालयान्तर्वर्तिसंस्कृतमहाविद्यालयाध्यापकेन सुदर्शनाचार्य-त्रिपाठिना। अत्रोदाहरणेषु केचन प्रचलिता अपि शब्दानिवेशिताः। अपि च कश्चन विशेष इह ग्रन्थे लभ्यते, किन्त्वलं तत्सर्वस्यात्र विवेचनेन, ग्रन्थकृतैव भूमिकायामुक्तत्वात्।[11]

क्रमेऽस्मिन् ऋजुपाणिनीयादिग्रन्थकृतो दर्शनकेसरिणो गोपालशास्त्रिणः 'पाणिनीयप्रबोधोऽपि' विवेचनमर्हति। श्रीगिरिजेशकुमारदीक्षित सम्पादितेऽस्य ग्रन्थस्य द्वितीयसंस्करणे गणपाठादयोऽपि संयोजिताः। श्रीशास्त्रिणा तु ऋजुपाणिनीयग्रन्थान्तर्वर्तिसूत्राणामेव बालोपयोगिव्याख्यानं कृतमिह। अष्टाध्यायीसूत्रक्रमाश्रयणात् लघुकौमुद्याद्यपेक्षया कश्चन विशेषोऽत्र लक्ष्यते।

श्रीरामशरणशास्त्रिणा कालखण्डेऽस्मिन् गद्यकाव्यमुखेन *कौमुदीकथा-कल्लोलिनी* इत्याख्यो ग्रन्थः प्रणीतः। कौमुद्यनुसारेणैव पूर्वार्त्तोद्धरार्द्धात्मकभागद्वयेन विभाजितेऽस्मिन् ग्रन्थे कौमुदीप्रयोगसरणिरेवाऽऽश्रिता। सन्धिप्रकरणम् आरभ्य उत्तरकृदन्तपर्यन्तानां प्रमुखसूत्राणामुदाहरणान्यत्र दत्तानि। एकादशकल्लोष्विह पूर्वार्द्धीयपञ्चसु कल्लोलेषु सूत्राणां निर्देशः कृतः। उत्तरार्द्धे च षट्सु कल्लोलेषु तत्तत्कल्लोलानुसारिधातुरूपसूत्रादिनिर्देशश्च लभ्यते। मन्ये गद्यकाव्यमुखेन प्रणीत आद्योऽयं शब्दशास्त्रीयो ग्रन्थः।

समग्रस्य खलु सिद्धान्तकौमुदीग्रन्थस्य सुरेशझामहाभागैर्विरचितः पद्यानुवादः *श्लोकसिद्धान्तकौमुदी* इति नाम्ना सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन प्रकाशितः। काश्यां निवसता नेपालाभिजनेन अनेन श्लोकानां द्वादशसाहस्री अत्र निबद्धा–

इयं द्वादशसाहस्री सौरेशी कौमुदी नवा।
छात्राणामुपकाराय भूयाच्छम्भुशुभाशिषा।[12]

संज्ञाप्रकरणतो द्विरुक्तान्तो भागः ग्रन्थस्य प्रथमार्द्धे प्रकाशितः, भ्वाद्यादिकृदन्तो भागश्च पश्चार्द्धे। पद्यानुवादेन सहैव तत्तत्फक्किकानां समाधानेऽपि विद्यते कृतप्रयत्नो ग्रन्थकारः। एवं ग्रन्थोऽयं मौलिकत्वमप्यावहति। नव्यव्याकरणोक्तपरवर्तिसिद्धान्तानपि स्वीकरोतीह सुरेशोझाः।

षड्लिङ्गप्रकरणे तु तत्तच्छब्दानां रूपतत्प्रयोगप्रदर्शने काऽप्यपूर्वा सरणिरिह अङ्गीकृता। यथा च पतिशब्दस्य रूपप्रदर्शने—

पतिः प्राणसमः स्त्रीणां,
पतयः सुखनाशकाः।
पतिं सा सेवते धन्या,
पती न करोति पुंश्चली।।
पत्या सह सती याति,
पतिभिश्च वराङ्गना।
पत्ये सा रोचते धन्या,
पतिभ्यः द्रौपदीप्रिया।।
पत्युः पृथग् न शोभाऽस्ति,
पतिभ्यः सा पलायते।
पत्युः प्रियतमा राधा,
पतीनां च नृणां सुखम्।।
पत्यौ भक्तिं करिष्यामि,
पतिषु वचसां गुणाः।

द्विवचने—

पती पती पतिभ्यां त्रिः
पत्योः पत्योः स्थलद्वये।
प्रथमादिक्रमाद् रूपं,
द्विवचनेषु जायते।।

शब्दानां प्रक्रियाभेदोऽपीह नैपुण्येन प्रदर्शितः। यथा चाऽत्रैव—

पतिना वानरेन्द्रेण,
सीतायाः पतये नमः।

इत्यादिरूपसिद्ध्यर्थं,
घिसंज्ञा केवलेऽपि स्यात्।।
आर्षत्वं वा विजानीयात्,
सूत्राऽनित्यत्वमत्र वा।
संज्ञापूर्वककार्यं वा,
अनित्यत्वमिति उत्तरम्।।

अत्र विशेषः—

बहुच्प्रत्ययपूर्वस्य,
पतिशब्दस्य यण् भवेत्।
बहुपत्या बहुपत्ये,
बहुपत्युरादि स्यात्।।
पतिशब्दान्तशब्दस्य,
हरिवद्रूपमुच्यते।
पतिः समास एवात्र,
घिसंज्ञकश्च जायते।
तस्माद् भूपतिना रूपं,
भूपतेरादि जायते।

सूत्राणां वृत्तिरपि पद्येनैव वर्णिता ग्रन्थकारेण। यथा 'आडुत्तमस्य पिच्च' (पा. 3.4.92) इति सूत्रस्य वृत्तिः—

लोडुत्तमस्य सर्वस्य,
भवेदाडागमः स पित्।
हिन्योरुत्वं न कर्तव्यम्,
इकारोच्चारणादिह।।

धातूनां रूपसाधनप्रक्रियाप्रदर्शने पद्याश्रयणं कवेर्मनोहारि—

भू-धातोर्लोट्लकारे,
तिप शप् गुणावादिकार्यतः।
एरुर्यदा विभक्तो स्यात्,
रूपं 'भवतु' सिद्ध्यति।।
तसस्तामन्यपुरुषे,
थसस्त थस्य त पुनः।

शप्गुणावादिकार्येण,

'भवतां', 'भवतं', पद्म।।

'भवन्तु' इति रूपं तु,

'एरुः' सूत्रेण साध्यते।

भूधातोर्लोटि सिप्तस्य,

सेर्ह्यपिच्चेति हिर्भवेत्।।

शब्गुणावः क्रमाज्ज्ञेयाः,

हेरित्यस्य लुकि भव।

भूधातोर्लोटि मिप् तस्य,

'मेर्निः' सूत्रेण निर्भवेत्।।

शब्गुणावः क्रमेणैव,

आडागमे भवान्यहम्।

वस्मसोः सस्य लोपने,

शब्गुणावश्च स्युर्यदा।।

आडागमे भवावेति,

भवाम् किन्न पण्डिताः।।

कलिकातानगरवास्तव्येन पण्डितेन केनचिद् व्याकरणकारिकेति नाम्ना सिद्धान्तकौमुद्या पद्यानुवादः पूर्वमेव कृतः, किन्तु नैतादृशी स्पष्टता प्रक्रियायास्तत्र लभ्यत इति सुरेशझाशर्मणः प्रयासोऽयं स्वातन्त्र्योत्तरव्याकरण-शास्त्रेतिहासे महत्त्वं प्राप्स्यत्येवेति दिक्।

3. टीकासाहित्यम्—काश्यां स्वातन्त्र्योत्तरकाले अष्टाध्यायी-महाभाष्य-वाक्यपदीय-भूषणाद्यनेकग्रन्थेषु लिखिता नैकाष्टीका लभ्यन्ते। तासामेवेह क्रमेण परिचयो दीयते—

अष्टाध्यायीभाष्यप्रथमावृत्तिः—ब्रह्मदत्तजिज्ञासुना आरब्धोऽयं प्रयासस्तदन्तेवासिन्या प्रज्ञादेव्या सफलतां नीतः। दुर्दैवात् पण्डितप्रवरजिज्ञासुमहोदयानाम् अकालमृत्योर्वृत्तिरियमपूर्णैव आसीत्। किन्तु प्रज्ञादेव्या षष्ठ-सप्तमाष्टमाध्यायेषु तयैव सर्ण्या वृत्तिं विरच्य न्यूनतेयं दूरीकृता। एवं पाणिनीयाष्टकस्य पञ्चमाध्यायपर्यन्तं ब्रह्मदत्तजिज्ञासुविरचिता, षष्ठ-सप्तमाष्टमाध्यायेषु च प्रज्ञादेव्या विरचिता प्रथमावृत्तिरियं लभ्यते। वृत्तौ विभक्ति-वचनानुवृत्ति निर्देशपुरस्सरं सूत्राणां व्याख्यानं कृतं विद्यते। न केवलं बालानां विदुषां

कृतेऽपि वृत्तेरस्या उपयोगित्वमस्त्येवेति दिक्।

विमला (महाभाष्यटीका) श्रीमहेशझाविरचिता सप्रदीपोद्योतस्य, नवाह्निकमहाभाष्यग्रन्थस्य कालखण्डेऽस्मिन् प्रणीताऽन्यतमा टीका। प्रदीपो-द्योतव्याख्यानेऽपि टीकाकर्तुः कश्चन विशेष इह लभ्यते।

महाभाष्यटिप्पणी–विश्रुतवैदुषीकैः श्रीमद्रघुनाथशर्ममहोदयैः प्रदीपो द्योतच्छायेति टीकात्रयालङ्कृत-नवाह्निकमहाभाष्ये विषमस्थलेषु टिप्पण्यो दत्ताः।

अम्बाकर्त्री–चिन्तामणिमन्त्रप्रभावाल्लब्धप्रज्ञेन काशीनाथ-शर्मत्नुजुषा सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य वेदान्तविभागाध्यक्षेण पण्डित-रघुनाथ-शर्मपाण्डेयेन षोडशवर्षात्मकः कालः टीकाया अस्याः प्रणयने ग्रन्थस्य च पाठभेदादिसंशोधने व्ययितः।सम्प्रत्येकैवेयं टीका समग्रे वाक्यपदीयग्रन्थे लभ्यते। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन पञ्चसु भागेषु प्रकाशितेयम् एकैव स्वातन्त्र्योत्तरव्याकरणशास्त्रे काश्या योगदानद्योतनाय अलम्।

टीकाकर्तुः व्याकरणे-वेदान्तादिविविधशास्त्रेषु पाण्डित्यं टीकाया अस्या अध्यनेन ज्ञातुं शक्यते। विविधशास्त्रीयग्रन्थानामुद्धरणान्यपि स्वसिद्धातानां स्पष्टतार्थं दत्तानि सन्तिं।

पूर्वटीकाकृतां कृते महान् समादरोऽवलोक्यते अत्र। यथा च पदकाण्डारम्भे हेलाराजं स्मरन् कथयति ग्रन्थकारः–

> **येन काण्डद्वयं पूर्वं विवृतं वृत्तिसंश्रयात्।**
> **तृतीयं स्वप्रतिभया हेलाराजः समे गतिः।।**

किन्तु हेलाराजस्य अन्धानुकृतौ न विश्वसिति टीकाकारः। वहुत्र तेन तन्मतभेदोऽप्यवलोक्यते। तत्पक्षमुत्थाप्य स्वपक्षसाधनाय नैकधा तर्कन्ते शर्ममहाभागाः।

प्रतिभा–वामदेवाचार्येण प्रतिभाख्येयं वाक्यपदीयब्रह्मकाण्ड टीका विशेषतः परीक्षार्थिनां कृते निवद्धेति स्वयमेव वक्ति सम्पादकः।

वैयाकरणभूषणम्–वैयाकरणभूषणे काशीस्थसम्पूर्णानन्दसंस्कृतविश्व-विद्यालयस्य व्याकरणाध्यापकेन मनुदेवभट्टाचार्येण 'रूपाली' नाम्नी टिप्पणी लिखिता। महावैयाकरणेन पण्डितप्रवररामयत्नशुक्लमहाभागेन च प्रणीता टीका प्रकाशनं प्रतीक्षत इति स्वयमेव टीकाकृता सूचितोऽहम्।

भूषणसारटीकाः–भूषणसारे नेने गोपालशास्त्रिकृता *सरला,* पञ्चोलिनो बालकृष्णस्य *प्रभा,* प्रभाकरशास्त्रिणश्च *प्रभाकरी* इति तिस्रष्टीका लभ्यन्ते

स्वातन्त्र्योत्तरकाले प्रणीताः। सरलया सहैव पण्डितरामप्रसादत्रिपाठिकृता 'सुबोधिनी' इत्याख्या टिप्पणी अपि मुद्रिताऽस्ति। वस्तुतस्तु टिप्पणीयं त्रिपाठिकृतटीकाया एवं संक्षिप्तरूपम्। टीकेयमद्यापि प्रकाशनं प्रतीक्षते। टीकास्वेतासु 'प्रभा' गंभीरा विस्तृता च नव्यन्यायप्रणाल्या प्रणीता टीका। अत्र पदार्थानां परिष्कारे हरिवल्लभकृतदर्पणस्य महत्साहाय्यं लब्धं तत्कृतेति सुधिय एवेह प्रमाणम्। 'इति पञ्चोलिनः' इति कथयन् ग्रन्थकारः स्वमतम् अत्र प्रस्तौति।

रत्नप्रभा—सभापतिशर्मोपाध्यायविरचितेयं टीका लघुमञ्जूषा-ग्रन्थस्य तात्पर्यान्तभागे लभ्यते। अवशिष्टभागेऽपि टीकेयं विरचिताऽऽसीदिति भूमिकाऽध्ययेन ज्ञायते। भाष्यादिग्रन्थाश्रयेण नैकेऽभिनवसिद्धान्ताः प्रतिपादिता इह ग्रन्थकारेण। क्वचित्सम्प्रदाननुरूपसिद्धान्ता अपि अत्रोपस्थापितास्ते च ग्रन्थकृतोऽन्तेवासिना श्रीरामप्रसादत्रिपाठिना बहुत्र स्वग्रन्थे खण्डिताः।

अनेनैव विदुषा वैयाकरण सिद्धान्तकौमुद्याः कारकान्तभागे *लक्ष्मीः* टीका लिखिता, प्रकाशिता च सा मोतीलालबनारसीदासेन। ग्रन्थोऽयमधुना दुर्लभः।

परमलघुमञ्जूषाटीकाः—नित्यानन्दपन्तपर्वतीयकृता *अर्थदीपिका,* कालिका-प्रसाद शुक्लकृता *ज्योत्स्ना,* जयशङ्करलालत्रिपाठिकृता च *भावप्रकाशित* इति टीकात्रयी ग्रन्थेऽस्मिल्लभ्यते। नित्यानन्दकृता टीका तु स्वातन्त्र्यात् पूर्वमेव प्रकाशिता आसीत्। श्रीमच्छुक्लकृता *ज्योत्सना,* नूनं मञ्जूषायामद्यावधि प्रणीतासु टीकासु श्रेष्ठतमा। ग्रन्थकारस्य पदार्थपरिष्कार पद्धतिरिह भट्टनागेशमप्यतिशेते।

लघुशब्देन्दुशेखरटीका—लघुशब्देन्दुशेखरस्य पञ्चसन्ध्यन्तभागे *राधिका* नाम्नी टीका लिखिता सर्वतन्त्रस्वतन्त्रैः सम्पूर्णानन्दसंस्कृत-विश्वविद्यालये सम्मानितप्राध्यापकैः श्रीब्रह्मदत्तद्विवेदिमहाभागैः। पण्डितप्रवररामप्रसादत्रिपाठिनां गम्भीरया प्रस्तावनया समलङ्कृतोऽयं ग्रन्थस्तत्कृतः शिवसायुज्यप्राप्त्यनन्तरं प्रकाशितः। नागेशमतस्य पल्लवने टीकाकृतोऽस्य विशेषो लक्ष्यते। क्वचिद् विवादस्थलेषु यत्र पूर्वे टीकाकारा नागेशं न प्रमाणतयाऽङ्गीकुर्वन्ति, तत्र टीकाकारोऽयं नागेशमतोपोद्बलनाय नैकानि मतानि प्रस्तौति। यथा चाऽभिनवचन्द्रिकाप्रभृतिटीकासु रप्रत्याहारखण्डनं वीक्ष्य अत्र शेखर ग्रन्थसमर्थनाय सारगर्भिता युक्तयः सन्ति प्रतिपादिताः। अतश्च 'उरण्लपरः' इति लकारघटितसूत्रपाठ एव भाष्य-तात्पार्यमवगाहमानः शेखरग्रन्थः सयुक्ति-कमुपस्थापित इति।

4. शोधप्रबन्धा निबन्धाश्च—अध्येतव्ययुगे व्याकरणशास्त्रमवलम्बय प्रणीता विंशतिप्रायाः शोधप्रबन्धाः द्विंशतमिताश्च शोधलेखाः काशीस्थविद्वद्भिः प्रकाशिताः। एतेषु केचन विशेषतः प्रतिष्ठिता दृश्यन्ते विद्वत्कुलेषु। त्रिपाठिनारामप्रसादेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालस्य वाचस्पतिरित्युपाधये प्रस्तुतः *पाणिनीय व्याकरणे प्रमाणसमीक्षा* इत्याख्यः प्रबन्धः पाणिनीयशास्त्राध्ययने नूलमेव द्वारमुन्मिषति। षट्स्वध्यायेषु ग्रन्थेऽस्मिन् व्याकरणदर्शनपद्धत्या प्रमाणानि व्यवस्थापितानि सन्ति अनुसन्धातुः शास्त्रवैदुष्येण परम्पराज्ञानेन चाऽत्र काचन अपूर्वतैवोपन्ना प्रबन्धे।

क्रमेऽस्मिन् देवस्वरूपमिश्रस्य *महाभाष्य-निगूढ़ाकूतयः*, *श्रीकान्त-पाण्डेयस्य व्याकरणशास्त्रदृष्ट्या सम्बन्धस्वरूपपर्यालोचनम्* त्रिपाठिनो राजनाथस्य *नागेशकृतिषु तन्त्रस्य प्रभावः*, त्रिपाठिनो हरिश्चन्द्रमणेः *निपातार्थनिर्णयः*, राधेश्याममिश्रस्य *व्याकरणशास्त्रदृष्ट्या जातिस्वरूपविमर्शः*, भगीरथप्रसाद-त्रिपाठिनो *धात्वर्थविज्ञानम्*, शेषनाथमिश्रस्य *शब्दानुशासने उत्सर्गापवादविमर्श*, जानकीप्रसादद्विवेदस्य *कातन्त्रव्याकरणविमर्शः*, बदरीनाथसिंहस्य शाब्दबोधविमर्शश्चेत्यादयो ग्रन्थाः सविशेषमुल्लेखमर्हन्ति।

शोधनिवन्धलेखकेषु रामप्रसादत्रिपाठि - गौरीनाथशास्त्रि - बालकृष्ण - शर्मप्रभृत्यो मनीषिणः सन्ति कालेऽस्मिन्। सम्पूर्णानंद-संस्कृतविश्वविद्यालयस्य 'सारस्वतीसुषमा' मनीषिणामेतेषां विद्यावदानेन अन्यतमामेव प्रतिष्ठां लब्धवती पत्रिकाजगति।

गौरीनाथशास्त्रिणा महाप्रभुलालगोस्वामिना च शाब्दिकानुसारि मोक्षस्वरूपं महता श्रमेण विवेचितम्। सागरिका-सारस्वतीसुषमादिप्रमुखसंस्कृतपत्रिकासु अन्यत्र च विदुषामभिनन्दनादिग्रन्थेषु प्रकाशितानां पण्डितानामेतेषां लेखानां सूची निबन्धान्ते संयोज्यते। मूलग्रन्थाष्टीकाग्रन्थाः शोधप्रबन्धा अपि तत्रैव क्रमेण निदर्शिताः।

अनेन संक्षिप्ताध्ययनेन एतद् वक्तुं शक्यते यत् सूत्र-वृत्ति-वार्तिक-भाष्य-प्रक्रिया-सिद्धान्तेति षट्सु उपादानेषु पल्लवितं व्याकरणशास्त्रमिदं वाराणसेयैः स्वातन्त्र्योत्तरकालिकैः शाब्दिकैः प्रमाणादि-व्यवस्थाप्रदर्शनेन अथ च मोक्षसिद्धान्तव्यवस्थापनेन दृढ़ीकृतम्। वाक्यपदीयसदृशोऽपि महाग्रन्थः स्वातन्त्र्योत्तरकालेऽस्मिन् व्याख्यातः। एवं स्वातन्त्र्योत्तरव्याकरणशास्त्रे वाराणस्या योगदानं समृद्धतरं विकासोन्मुखं चाऽस्तीति शम्।

सन्दर्भ

1. *शिवदृष्टिः*, सम्पादकः—राधेश्यामश्चतुर्वेदी, वाराणेसेयसंस्कृत-संस्थानम्, वाराणसी, 1986, 2.72
2. तत्रैव वृत्तौ
3. *व्याकरणदर्शनभूमिका* (द्वितीयंसंस्करणम्), रामाज्ञापाण्डेय-विरचिता, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालय, वाराणसी, 1982, पृ. 23-24
4. *स्फोटविस्फोटः*, सारस्वतीसुषमायाः 12.2 अङ्के।
5. *पाणिनीयव्याकरणे प्रमाणसमीक्षा* (द्वितीयं संस्करणम्) रामप्रसादस्त्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी, 1997, पृ. 286
6. *महाभाष्ये*, अ. 2, पा. 1, आ. 3, सू. 55
7. *वाक्यपदीयस्य* वृत्तिसमुद्देशे-359.
8. *पाणिनीयव्याकरणे प्रमाणसमीक्षा*, पृ. 4
9. तत्रैव, पृ. 2
10. सारस्वती सुषमायाः 36.1-4 अङ्के
11. द्रष्ट. भूमिका ग्रन्थस्य प्रथमभागे।
12. *श्लोकसिद्धान्तकौमुदी*, द्वितीयो भागः, पृ. 529।

सहायकग्रन्थाः

1. *दाहालः, लोकमणिः, व्याकरणशास्त्रेतिहासः*, भारतीयविद्या प्रकाशनम्, वाराणसी, 2046 वि.
2. Cordona, George, *Panini: A Survey of Research*, Motilal Banarasidass, 1980.
3. Cordona, George, *Recent Researches* in Panini, MLBD, 1999.
4. Pandey, Ramakant, *Sanskrit Writings on Vyākaraṇa during the 20th Century:* A Bibliography (unpublished)
5. Pandey, Ramakant, *Introduction to Modern Sanskrit Writings* on Vyākaraṇa (Unpublished)

ग्रन्थसूची

I. मूल ग्रन्थाः

1. चतुर्वेदी, रामाधीनः, (1963) *संस्कृतभाषाविज्ञानम्*, चौखम्बा-दियाभवनम्, वाराणसी।
2. झाः, सुरेशः (1982) *श्लोकसिद्धान्तकौमुदी* (भागद्वयात्मिका) सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, वाराणसी।
3. त्रिपाठी, रामप्रसादः (1987) *सिद्धान्तचिन्तामणिः*, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

4. त्रिपाठी, रामप्रसादः (1997) *शब्दशास्त्रीयवृत्तिविमर्शः*, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
5. त्रिपाठी, सुदर्शनाचार्यः (1973-74) *लघुकाशिका* (पूर्वोत्तरार्द्धात्मक भागद्वयात्मिका), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
6. दर्शनकेशरी गोपालशास्त्री (1996) *पाणिनीयप्रबोधः*, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय-वाराणसी
7. द्विवेदी, ब्रह्मदत्तः (1981) *शब्दाद्वैतदर्शन बिन्दुः*, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी
8. पाण्डेयः, रामाज्ञा (1982) *व्याकरणदर्शनभूमिका* (द्वितीयं संस्करणम्) सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी
9. पाण्डेयः, रामाज्ञा (1965) *व्याकरणदर्शनपीठिका*, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
10. पाण्डेयः, रामाज्ञा (1979) *व्याकरणदर्शनप्रतिमा*, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
11. भट्टाचार्यः, हाराणचन्द्रः (1998 वि.) कालसिद्धान्तदर्शिनी, लेखकेन स्वयं प्रकाशिता, कलिकाता।
12. शर्मा, रघुनाथः (1971) *व्याकरणदर्शनबिन्दुः*, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
13. शास्त्री, रामशरणः (1961) *कौमुदीकथाकल्लोलिनी*, चौखम्वा विद्याभवन, वाराणसी।

II. टीकाग्रन्थाः

1. आचार्यः, वामदेवः, (1987) *प्रतिभा* (वाक्यपदीय ब्रह्ममहाकाण्डटीका), कृष्णदास अकादेमी, वाराणसी।
2. उपाध्यायः, सभापति शर्मा (1973) *रत्नप्रथा* (लघुमञ्जूपाटीका), चौखम्भा संस्कृतसीरीज, ऑफिस, वाराणसी।
3. लक्ष्मी *(सिद्धान्तकौमुदीकारकन्तभागीय टीका)* मोतीलालवनारसीदासः वाराणसी
4. *जिज्ञासुः, ब्रह्मदत्तः* (1964) अष्टाध्यायीभाष्यप्रथमावृत्तिः (प्रथमतस्तृतीयाध्यायान्तो भागः), रामलाल कपूर ट्रस्ट, वहालगढ़, (पञ्चम संस्करणम् 1995)
5. (1964) *अष्टाध्यायीभाष्यप्रथमावृत्तिः* (द्वितीयादिपञ्चमाध्यायान्तो भागः) रामलाल कपूर ट्रस्ट, वहालगढ़ (षष्टसंस्करणम्, 1996)
6. झाः, महेशः, विमला (*महाभाष्यनवाह्निक टीका*) संस्कृतशोधसंस्थानम्, दरभङ्गा।
7. त्रिपाठी, जयशङ्करलालः (1985) *भावप्रकाशिका* (परमलघुमञ्जूपाटीका), कृष्णदास अकादेमी, वाराणसी।
8. त्रिपाठी, रामप्रसादः, (1952) सुवोधिनी, (*भूषणसारटिप्पणी*) (गोपालशास्त्रीनेनेकृत्या सरलया टीकया सहिता) चौखम्भा संस्कृत सीरीज ऑफिस, वाराणसी।
9. देवी, प्रज्ञा (1968) *अष्टाध्यायीभाष्यप्रथमावृत्तिः* (षष्ठ-सप्तम-अष्टमाध्यायात्मिका) रामलालकपूर ट्रस्ट, वहालगढ़ (षष्ठसंस्करण 1996)
10. द्विवेदी, ब्रह्मदत्तः, (1988) राधिका (*लघुशब्देन्दुशेखरटीका*), सुशीलप्रकाशनम्, पटना।

11. नेने, गोपालशास्त्री, (1952) सरला *(भूषणसारटीका)* रामप्रसादत्रिपाठिकृत्या सुबोधिन्या टिप्पण्या सनाथिता, चौखम्भा संस्कृतसीरीज ऑफिस, वाराणसी।
12. पञ्चोली, बालकृष्णः (1962) प्रभा *(भूषणसारटीका)* चौखम्भाप्रकाशनम्, वाराणसी, 1969
13. पर्वतीयः, नित्यानन्द पन्तः (1946) *अर्थदीपिका (परमलघुमञ्जूषाटीका),* चौखम्भा संस्कृतसीरीज ऑफिस, वाराणसी।
14. मिश्रः, प्रभाकरः, (1982) *प्राभाकारी (भूषणसारटीका),* अरविन्दमिश्र-मकरन्दमिश्रौ, श्रीरामानुजसंस्कृतमहाविद्यालयः, वाराणसी।
15. मिश्रः मुरलीधरः (1977) रश्मिः *(प्रक्रियाकौमुदीटिप्पणी)* (स्त्रीप्रत्ययान्तप्रथमोभागः) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
16. (1977) रश्मिः *(प्रक्रियाकौमुदीटिप्पणी)* (द्वितीयो भागः) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
17. (1980) रश्मिः *(प्रक्रियाकौमुदीटिप्पणी)* (तृतीयो भागः) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
18. शर्मा, रघुनाथः (1963) अम्बाकर्त्री *(वाक्यपदीयटीका)* ब्रह्मकाण्डात्मको प्रथमो भागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
19. (1980) अम्बाकर्त्री *(वाक्यपदीयटीका)* वाक्यकाण्डात्मको द्वितीयो भागः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी।
20. (1991) अम्बाकर्त्री *(वाक्यपदीयटीका)* पदकाण्डात्मकस्तृतीयो भागः (द्वितीयं संस्करणम्) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
21. (1997) अम्बाकर्त्री *(वाक्यपदीयटीका)* पदकाण्डस्य द्वितीयो भागः (द्वितीयं संस्करणम्) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
22. (1977) अम्बाकत्री।*(वाक्यपदीयटाका)* वृत्तिसमुद्देशात्मको भागः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी।
23. (1987) *महाभाष्यटिप्पणी,* (सुधीरप्रकाशनम्), वाराणसी।
24. शुक्लः, कालिकाप्रसादः, (1961) ज्योत्सना *(परमलघुमञ्जूषाटीका),* संस्कृतमहाविद्यालयः, महाराज सयाजिरावविश्वविद्यालयः, वड़ौदा।
25. शुक्लः रामयत्नः, *वैयाकरणभूषणटीका* (अप्रकाशिता)

III. शोधप्रबन्धाः

1. ठक्कुरः, सुधीरनारायणः, (1977)
— प्रौढ़मनोरमा-शब्दरत्नयोर्विचारभेदानां युक्तायुक्तत्व समीक्षा, (स्वयमेव लेखकेन प्रकाशितः) 5/48 त्रिपुरा भैरवी, वाराणसी
2. त्रिपाठी, भागीरथप्रसादः, (1980)
— धात्वर्थविज्ञानम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
(1990) *संस्कृतवाङ्मयमन्थनम्,* (शोधनिबन्धसङ्ग्रहः) वाग्योग-चेतनापीठम्ः, वाराणसी,
3. त्रिपाठी, राजनाथः, (1988)

— नागेशकृतिषु तन्त्रस्य प्रभावः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी,
4. त्रिपाठी, रामप्रसादः, (1970)
— पाणिनीयव्याकरणे प्रमाणसमीक्षा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, (द्वितीय संस्करणम्, 1997)
5. त्रिपाठी, हरिश्चन्द्रमणिः, (1990)
— निपातार्थनिर्णयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
6. द्विवेदी, जानकीप्रसादः, 1975)
— कातन्त्रव्याकरणविमर्शः, सम्पूर्णानन्द संस्कृतविश्वविद्यालय, वाराणसी।
7. पाण्डेयः, श्रीकान्तः (1984)
— व्याकरणशास्त्रदृष्ट्या सम्बन्धस्वरुपर्यालोचनम्, विद्यानिधिप्रकाशनम्, दिल्ली।
8. प्रज्ञाचक्षुः, शीतलाप्रसादो जायसवालः, (1994)
— वैयाकरणसिद्धान्तलघुमञ्जूषायाः स्फोटान्तभागीय-रत्नप्रभाटीकायाः, समालोचनात्मक-मध्ययनम्, परिमलपब्लिकेशन्स, दिल्ली
9. मिश्रः, आद्याप्रासादः, (1966)
— प्रक्रियाकौमुदीविमर्शः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
10. मिश्रः, देवस्वरूपः, (1978)
— महाभाष्यनिगूढाकूतयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी,
11. मिश्रः, राधेश्यामः, (2027 वि.)
— व्याकरणशास्त्रदृष्ट्या जातिस्वरूपविमर्शः, शिवसङ्कटहरणादर्शसंस्कृत-महाविद्यालयः, सकाहा, हरदोई (सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य विद्यावारिणीत्युपाधये प्रस्तुतः शोधप्रबन्धः)
12. मिश्रः, रामनारायणः, (1991)
— स्फोटमीमांसा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
13. मिश्रः, राममनोहरः, (1983)
— भूषणसा-परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
14. मिश्रः, शेषनाथः , (1985)
— शब्दानुशासने उत्सर्गापवादविमर्शः, किशोरविद्यानिकेतनम्, भदैनी, वाराणसी
15. शर्मा, रघुनाथः, (1980)
— वाक्यपदीयपाठभेदनिर्णयः (प्रथमो भागः) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, (1991) वाक्यपदीयपाठभेदनिर्णयः, (द्वितीयो भागः) सहायकसम्पादकः नरेन्द्रनाथ पाण्डेयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी,
16. शुक्लः, कानिकाप्रसादः, (1979)
— वैयाकरणानाम् अन्येषां च मतेन शब्दस्वरूपवच्छक्तिविचारः, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, वाराणसी
17. शुक्लः, रामकिशोरः, (1992)
— व्याकरणशास्त्रे लौकिकन्यायानामुपयोगः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

18. सिंहः, वदरीनाथः,

— *शाब्दबोधविमर्श,* (लेखकेन प्रकाशितः) डी. 43/20 गोदौलिया, वाराणसी (तिथिर्नाङ्किता)

IV. शोधलेखाः

1. अय्यरः, सुब्रह्मण्यः,
— लिङ्गतत्त्वविमर्शः, सारस्वतीसुषमा (सासु.) 2.1: 41-47
प्राचीनभारते भाषाविज्ञानम्, सासु. पञ्चम उपधिवितरणो-25 त्सवाङ्कः, 57-68
2. अवस्थी, रुद्रप्रसादः,
— आख्यातैकवचनसम्बन्धिविमर्शः, सासु. 33.3-4:205-206
— द्वितीयाविचारेस्तोकं पचति, सासु. 34.1-2:23-26
— अवच्छेदकत्वनिरुक्तिः, सासु0 38.1-2:1-6
3. अवस्थी, शिवशङ्करः,
— शिवाद्वयशासने शाक्ताद्वैतनये च वर्णमीमांसा, सासु., 17.1-4: 335-342.
— व्याकरणागमसङ्ग्रहः, सासु. 31.3-4: 211-225
4. आचार्यः, रामनारायणः
— स्फोटवादविलासः, सासु. 33.3-4:226-230
5. आचार्यः लक्ष्मणः,
— मानाधीनामेयसिद्धिः, मेयाधीना वा मानसिद्धिः, सासु. 11.3-4:197-200
6. उपाध्यायः, कामेश्वरः,
— (1987) प्रतिभातत्त्वम्, गोपीनाथकविराजअभिनन्दनग्रन्थः,
7. उपाध्यायः, जगन्नाथः,
— मानाधीना मेयसिद्धिः मेयाधीना वा मानसिद्धिः, सासु. 11.3-4:200-204,
8. उपाध्यायः, बलदेवः
— श्रीयागेश्वरशास्त्रिणां जीवनेतिवृत्तम्, सासु. 12.2:64-67
— संस्कृतस्य महत्त्वम्, सासु. 22.3-4:393-402
— महाभाष्ये देवदत्तस्य जीवनवृत्तम्, सासु. 38.3-4: 135-145.
— महाभाष्यग्रन्थः भोजपुरी च सासु. 40.1-2:7-9
9. उपाध्यायः, महादेवः,
— शब्दार्थस्वरूपविमर्शः, सासु. 24.2:174-181
— अद्वैतब्रह्मविवेचनम्, सासु. 34.3-4:181-184
10. उपाध्यायः, शिवजी,
— शक्तिस्वरूपविमर्शः, सासु. 48.1-2:103-118
— निपातार्थनिर्णयसमीक्षा, सासु. 50.1-2:69-77
11. उपाध्यायः, सभापतिः,
— शब्दब्रह्मविमर्शः, सासु. 1.1:154-157

– शब्दमाश्रित्त्य व्यवहारपथमागतानां लिङ्गानां निर्णयः, सासु. 18.3:1-12.
– छात्रोपयोगिव्याकरणविपयविमर्शः, सासु. 18.3:89-92
12. ओझाः, केदारनाथः,
– पाणिनीयं व्याकरणम्, सासु. 31.1-2:1-10
– वैयाकरणानां शब्दाद्वैतम्, सासु. 36.1-4:
– स्फोटतत्त्वनिरूपणम्, सासु. 38.3-4:146-152
– शाब्दिकानां रसख्यातिः, सङ्गमनी 8.1:5
13. ओझाः, रामनन्दनः,
– धात्वाख्यातार्थविचारः, सासु. 33.3-4:218-225
– वैयाकरणानां शब्दसृष्टिप्रक्रियाविमर्शः, सासु. 34.1-2: 17-22
– व्याकरणाध्ययनोपयोगित्वविमर्शः, सासु. 34.3-4:209-213
– स्फोटविमर्शः, सासु. 35.1-2:65-69
– उपसर्गाणां द्योतकत्वं वाचकत्वं वा 1 सासु. 35.3-4: 203-205
– प्रातिपदिकार्थस्य पञ्चविधता, सासु. 36.1-4:107-111.
– लकारार्थविवेचनम्, सासु. 37.1-4:199-204
– बौद्धार्थपदार्थविचारः, सासु. 38.3-4:153-158
– निपातार्थविचारः, सासु. 40.3-4:16-20
14. गोस्वामी, महाप्रभुलालः,
– वैयाकरणमते सायुज्यम्, सासु. 36.1-4: 98-106
– ओङ्कारस्य दार्शनिकं स्वरूपम्, सासु. 37.1-4:185-198
15. चट्टोपाध्यायः, क्षितीशचन्द्रः,
– पाणिनिना स्वप्नेऽपि असम्भाविताः प्रत्याहाराः, मञ्जूषा, 11.1
16. चट्टोपाध्यायः, क्षेत्रेशचन्द्रः
– भाषाविज्ञान दृष्ट्या शब्दार्थयोः सम्बन्धः, सासु. 13.1-4: 231
17. चतुर्वेदी, मिथिलेशकुमारः,
– शब्दसाधुत्वे शिष्टप्रामाण्यम्, सासु. 28.3-4:298-307
18. चतुर्वेदी, राधेश्यामः,
– शब्दब्रह्मणि निष्णातः, सासु. 38.1-2: 53-58
– आगमशास्त्रम्, तत्र वाक्यत्त्वम, सासु. 49.3-4:175-183
19. चतुर्वेदी, राममूर्तिः,
– आर्षपरम्परायां शिक्षाग्रन्थानामैतिह्यम्, सासु. 41.3-4:199-200
– वेदव्याख्याने पदपाठस्य महत्त्वम्, सासु. 48.3-4: 144-149
20. चतुर्वेदी, रमाधीनः,
– प्रकृतिप्रत्यययोः सम्बन्धविमर्शः, भट्टाभिराम-शास्त्र्यभिनन्दनग्रन्थः, 1981.
21. चतुर्वेदी, शारदा,
– भारतीयदर्शनदिशा भाषातत्त्वसमीक्षणम्, सासु. 33.3-4

— भाषाविज्ञानदृष्ट्या अर्थविकासः, सासु. 34.3-4:233-240
22. झाः, उदयनाथ,
— शब्दार्थतादात्म्यभङ्गः, सासु. 40.3-4:31-36.
23. झाः, भूपनारायणः
— दर्शनेषु शब्दस्वरूपम्, सासु. 5.2:9-12
24. झाः, वेदानन्दः,
— शब्दब्रह्मवादस्य उद्गमो विकासश्च, सासु. 27.3:208-225.
25. झाः, वृजनाथ,
— प्रातिपदिकस्य प्रारूपं वर्गीकरणं च, सासु. 16.1-2
— समासोक्ति-समासशक्त्योः समता, सासु. 22-1:49-53.
26. तिवारी, ओङ्कारनाथः,
— भाषाचिन्तने निघण्टोः योगदानम्, सासुः 49.3-4:137-146.
27. तिवारी, शैलकुमारी,
— ध्वन्यध्वावबोधः, सासु. 43.1-2:111-112
28. त्रिपाठी, अवधविहारी,
— वर्णविमर्शनम्, मञ्जूषा 11.4.
29. त्रिपाठी, जयप्रकाशः,
— अष्टाध्यायीसङ्गतिविमर्शः,सासु. 33.1-2:38-48.
30. त्रिपाठी, व्रजकिशोरः,
— शाब्दे कालनिर्णयः, सासु. 46.1-2:55-64
— वेदानामपौरुषेयत्वम्, सासु. 48.1-2:86-102.
31. त्रिपाठी, भागीरथप्रसादः,
— अगू-अर्थविवेचना, सासु. 21.1:68-72
— संज्ञायां जन्याः (4.4..82) जायाया निङ् (5.4.134), सासु. 22.1:75-93
— छात्रः, छात्रा, छात्री, सासु. 24.1:14-24
— अनेकार्था हि धातवः, सासु. 26.2:139-150
— करणार्थकः √कृ (डुकृञ्): अर्थविज्ञानम्, सासु. 26.3-4:374-387
— उपादानार्थकः √ग्रह (ग्रह): अर्थविज्ञानम् सासु. 27.1:7-17
— सामर्थ्यार्थकः √कृप् (कृपू) : (अर्थविज्ञानम्, सासु. 27.2:101-114
— दानार्थकः√दा (डुदाञ्): अर्थविज्ञानम्, सासु. 27.3:226-229.
(गतिभक्षणार्थकः चर् (चर): अर्थविज्ञानम्, सासु. 29.2:116-132
— प्राचीनभारते शब्दसंक्षेपविद्या, सासु 31.3-4:169-172, सङ्गमनी 11.3:6-8.
— पाणिनिपरवर्तिनः शाकटायनव्याकरणस्य कश्चिद् विशेषः, सासु. 32.3-4:133-138
— आगमकारो महाकविः कालिदासः, सासु. 39.1-4:140-147.
— ऋग्वेदसंहिताभाषाया भाषातत्त्वस्य, संस्कृत वाङ्मयमन्थनम् च स्वरूपम् वाग्योगचेतनापीठम्, वाराणसी, 1990

– संस्कृतादिभारतीय भाषाशब्द , संस्कृत वाङ्मयमन्थनम् च स्वरूपम् वाग्योगचेतनापीठम्, वाराणसी, 1990 निर्वचनसमस्या
– धातुनामनेकार्थत्वम् संस्कृत वाङ्मयमन्थनम, च स्वरूपम् वाग्योगचेतनापीठम्, वाराणसी, 1990
– अभ्यासः, आम्रडितम्, अभ्यस्तं चेति, पाणिनीयशब्दानां विश्लेषणम्, संस्कृत वाङ्मयमन्थनम् च स्वरूपम् वाग्योगचेतनापीठम्, वाराणसी, 1990
– नागेशभट्टकृते द्विविध उपदेशे संस्कृत वाङ्मयमन्थनम् च स्वरूपम् वाग्योगचेतनापीठम्, गदाहैमवतीसाक्ष्यम्
– अहो संक्षिप्तता कातन्त्रीया संस्कृत वाङ्मयमन्थनम्, च स्वरूपम् वाग्योगचेतनापीठम्, वाराणसी, 1990
– महाभाष्यस्य महाभाष्यत्वम्, संस्कृत वाङ्मयमन्थनम् च स्वरूपम् वाग्योगचेतनापीठम्, वाराणसी, 1990
– शेषकृष्णपण्डित्कृतपूर्वाचार्यसमीक्षानिर्दशनम्, संस्कृत वाङ्मयमन्थनम् च स्वरूपम् वाग्योगचेतनापीठम्, वाराणसी, 1990
– नव्यन्यायसंख्या व्याकरणविषयोपपादनम्, संस्कृत वाङ्मयमन्थनम् च स्वरूपम् वाग्योगचेतनापीठम्, वाराणसी 1990
– प्राचीनभारते शब्दसङ्क्षेपविद्यास्वरूपम्, संस्कृत वाङ्मयमन्थनम् च स्वरूपम् वाग्योगचेतनापीठम्, वाराणसी 1990
– काव्याश्रितव्याकरणस्वरूपम् संस्कृत वाङ्मयमन्थनम्, च स्वरूपम् वाग्योगचेतनापीठम्, वाराणसी, 1990
– अभिनवशाकटायनव्याकरणम्, संस्कृत वाङ्मयमन्थनम्, च स्वरूपम् वाग्योगचेतनापीठम्,
– अष्टाध्यायीवृत्तिवैशिष्ट्यम्, संस्कृत वाङ्मयमन्थनम्, च स्वरूपम् वाग्योगचेतनापीठम्, वाराणसी, 1990
– संस्कृतवाङ्मयेप्राकृतभाषायाः संस्कृत वाङ्मयमन्थनम्, च स्वरूपम् वाग्योगचेतनापीठम्, स्मरणं प्रभावश्च
– अपाणिनीयाद् रिपूधातोः, रिपुशब्दनिष्पत्तौ, संस्कृत वाङ्मयमन्थनम्, च स्वरूपम् वाग्योगचेतनापीठम्, कश्चिन्नूतनः प्रकाशः
– ईयसुन्प्रत्ययस्य भाषातात्त्विकं विवेचनम् संस्कृत वाङ्मयमन्थनम्, च स्वरूपम् वाग्योगचेतनापीठम्,
– संस्कृतभाषाया व्याकरणानि, संस्कृत वाङ्मयमन्थनम्, च स्वरूपम् वाग्योगचेतनापीठम्,
– अधायुशब्दव्युत्पत्तिप्रसंङ्गे शाङ्करभाष्यसमीक्षणम्, संस्कृत वाङ्मयमन्थनम्, च स्वरूपम् वाग्योगचेतनापीठम्,
– नक्तकशब्दनिरुक्तिनिभालनम् संस्कृत वाङ्मयमन्थनम्, च स्वरूपम् वाग्योगचेतनापीठम्,
– नामशब्दनिर्वचन निरूपणम् संस्कृत वाङ्मयमन्थनम्, च स्वरूपम् वाग्योगचेतनापीठम्,

32. त्रिपाठी, राजकिशोर,
– यत्नो द्विधा, सासु. 24.2:146-151

33. त्रिपाठी, रामकिशोरः
– स्फोटमूलको जगद्व्यवहारः, सासु. 42.3-4:238-246.
– शक्तिस्वरूपविमर्शः, सासु. 43.3-4:213-223
– निपातार्थसिद्धान्तविमर्शः, सासु. 46.1-2:18-30
– नामार्थविमर्शः, सासु. 49.1-2:33-44
34. त्रिपाठी, रामदेवः,
-- वर्णानां स्थानप्रयत्नसमीक्षा, सासु. 47.3-4:257-267.
35. त्रिपाठी, रामनारायणः,
– स्फोटो ध्वनिश्चः, सासु. 47.3-4:268-276
36. त्रिपाठी, रामप्रसादः
(1981) पाणिनीयव्याकरणे धातूनां भेदविमर्शः, पट्टाभिरामशास्त्री- अभिनन्दनग्रन्थः।
(1983) व्याकरणदर्शनदृष्ट्या शब्दस्वरूपविमर्शः, आम्भृणीयम, रमेश चन्द्रशुक्लाभिनन्दनग्रन्थः,
(1987) व्याकरणशास्त्रोल्लासे काश्याः स्थानम्, गोपीनाथकविराज-अभिनन्दनग्रन्थः
– व्याकरणदर्शने सृष्टिप्रक्रियाविमर्शः, ऋषिकल्पन्यासः:, राजेश्वर शास्त्रिद्राविडाभिनन्दनग्रन्थः, भारतीय परिषत्, प्रयागः, सासु. 23.3.223-236.
– व्युत्पत्तिवादः, न्यायसत्रम्, संस्कृतपरिषद्, सागरविश्वविद्यालयः, सागरम्,
(1997) वाक्यपदीयालोके शब्दब्रह्मस्वरूपविमर्शः, आचार्यदयानन्द-भार्गव-अभिनन्दनग्रन्थः, वैदिक-अध्ययनकेन्द्रम्, जोधपुरम्,
– प्रतिभावाक्यार्थः, सासु 23.4:299-312
– पाणिनीयं व्याकरणं भाषाविज्ञानं च, सासु. 27.1:1-6
– प्रतिषेधसूत्रस्य संज्ञाशास्त्राविरिक्तत्वमपि, सासु. 31.1-2:11-19
– व्यञ्जनावृत्तिसमीक्षा, सांसु. 31.3-4:129-135.
– व्यञ्जनावृत्तेः भेदसमीक्षा, सासु. 32.1-2:5-9
– तन्त्रागमदृष्ट्या बौद्धपदार्थविमर्शः, सासु. 33.1-2:19-29
– संस्कृतव्याकरणे वाराणस्यां योगदानम्, सासु. 33.3-4:208-217
– वाक्यार्थस्य प्रतिभारूपत्वम्, सासु. 34.1-2:8-16.
– भाषाविज्ञानस्य बीजचिन्ता, सासु. 35.1-2:58-64
– अध्यासस्वरूपं तन्निरासोपायाश्च, सासु. 36.1-4:78-89.
– पाणिनीयव्याकरणस्य वैशिष्ट्यम, सासु. 38.1-2:7-10
– अष्टाध्याय्यां नियमस्वरूपमविमर्शः, सासु., 42.1-2:1-13
– शैवागमस्वरूपविमर्शः, सासु. 42.3-4:161-182.
– शैवागमदृष्ट्या मन्त्र-भाव-मुद्रा-पाशादिविमर्शः, सासु. 43-1-2: 1-16
– कानिचन स्मरणानि, सासु. 45.3-4:149-152
– नियतोपस्थितिकः प्रातिपदिकार्थः, सासु. 46.1-2:1-10
– कतिपयपाणिनीय सूत्रमीमांसा, सासु. 46.3-4:177-187, 47.1-2: 1-12, 47.3-4:151-166,

48.9-1:1-15, 48.3-4:119-132, 49.1-2:1-19, 49.3-4:93-108, 50.1-2:1-41, 50.3-4:179-194.

— व्याकरणदर्शनदृष्ट्या वाक्यार्थस्य प्रतिभारूपत्वम्, संस्कृतप्रतिभा, 7.1-2, साहित्य अकादेमी, दिल्ली

— संस्कृतभाषाया भाषान्तरे प्रभावः, सङ्गमनी 6.1:7-9

37. त्रिपाठी, रामेश्वरः,

— व्याकरणदर्शनस्य बीजचिन्ता, सासु. 30.3-4:

— संस्कृतभाषाया भाषान्तरे प्रभावः, सङ्गमनी 4.4:37-38.

38. त्रिपाठी, शिवसागरः,

— शब्दार्थसम्बन्धविमर्शः, सासु. 25.2:148-165

39. त्रिपाठी, श्रीपतिरामः,

(1987) बिन्दुतत्त्वम्, गोपीनाथकविराज-अभिनन्दनग्रन्थः,

— नादवाद-स्फोटवादौ, सासु. 17.1-4:145-158

— शाब्दिकाभिमतोपसर्गपदार्थतत्सङ्ख्याविमर्शः, सासु. 35.3-4:206-210,

— शाब्दिकमते हलन्तशब्देभ्यष्टप्रत्ययविमर्शः, सासु. 42.3-4: 215-219

40. त्रिपाठी, हरिश्चन्द्रमणिः,

— नञर्थविमर्शः, सागरिका 10.2.

— निपातार्थनिर्णयः, सासु. 24.4:371-380.

— उत-निपातस्यार्थविज्ञानम्, सासु. 25.3-4:, 317-330

— उपसर्गाणामैतिहासिको भाषाशास्त्रीयश्चार्थविकासः, सासु. 26.2:188-211, 27.1:18-50

— ई (ईङ् अध्ययने): उपसर्ग प्रत्यभिज्ञात्मको धातुः, सासु. 28.1:27-47

— गणपाठेष्वनालोचिता निपाताः,सासु. 30.1-2:64-84

41. दासः, रामनारायणः,

— आधुनिकविज्ञानदृष्ट्या पराया वाचस्तत्त्वम्, सासु. 25.2:175-180

— आधुनिकदृष्ट्या वर्णाभिव्यक्तिप्रक्रियासमीक्षा, सासु. 25.3-4:307-316

— अकारादिध्वने रेखाकृतिस्वरूपम्, सासु. 27.2:137-147.

— शब्दशक्तिस्तत्सम्बद्धयन्त्राणां च विमर्शः, सासु. 33.3-4: 231-234

— आधुनिक विज्ञानदृष्ट्या ध्वनितत्त्वसमीक्षा, सासु. 34.3-4:225-232.

— शब्दानुविद्धं सर्वं ज्ञानम्, सासु. 43.1-2:60-65

— अकारादिध्वनीनां लिप्यात्मकं स्वरूपम्, सङ्गमनी 6.3:35-40

42. दीक्षितः, रामचन्द्रः, शब्दार्थसम्बन्धमीमांसा, ऋषिकल्पन्यासः, राजेश्वरशास्त्रीद्राविडाभिनन्दनग्रन्थः,

— शब्दार्थममांसा, सासु. 13.1-4:215-222.

43. द्विवेदी, जानकीप्रसादः,

— पाणिनिप्रयुक्ता इच्छार्थकाः केचन शब्दाः, सागरिका 10.1.

— व्याकरणे लोकस्य प्राणाण्यम्, सासु. 14.1:31-55

— कातन्त्रीयो धातुपाठः, सासु 25.1:54-82.
— पाणनीयकातन्त्रव्याकरणयोः गौरवलाधवसमीक्षा, सासु. 31.1-2:20-29.
— एजर्टेनरचितस्य बौद्धसङ्करसंस्कृतव्याकरणस्य पर्यालोचनम्, सासु. 45. 3-4:266-276
— कारकीया विवक्षा, सागररिका, 11.1
— लोके संज्ञानां व्यवहारः, सागरिका 11.3
— कातन्त्रव्याकरणे 'चर्करीत' विचारः, सागररिका, 14.3,
44. द्विवेदी, देवीप्रसादः,
— वाक्यविज्ञाननिरुपणम्, सासु. 40.3-4:64-70
— भारतीयं वर्णपदवाक्यादिविज्ञानम्, सासु. 42.3-4:272-2
45. द्विवदी, ब्रह्मदत्तः,
— अविद्यापरामर्शः, सासु. 35.1-2:1-13
— स्फोटात्मकशब्दतत्त्वविमर्शः, सासु. 35.1-2:14-24
— व्यञ्जनाविलासः, सासु. 35.1-2:25-34
46. द्विवेदी, रामचन्द्रः,
— शैवागमदर्शनेषु परतत्त्वविमर्शः, सासु. 17.1-4:343-352
— आगमस्वरूपविमर्शः, सासु. 44.1-2:1-26
— स्वातन्त्र्यविमर्शः, सासु. 44.3-4:83-100
47. द्विवेदी, रामप्रीतः,
वाक्यपदीयब्रह्मकाण्डस्यानुशीलनम्, सासु. 46.3-4:188-200
48. द्विवेदी, श्रेयाशंकुमारः,
कर्मकारकविमर्शः, सासु. 43.1-2:66-70
49. पञ्चोली, बालकृष्णः,
— शाब्दवोधसहकारिकारणपर्यालोचनम्, सासु. 13.1-4:97-114.
वैयाकरणनये शाब्दज्ञानस्य परोक्षत्वापरोक्षत्वविवेकः, सासु. 17. 1-4
50. पाण्डेयः, कान्तिचन्द्रः,
— स्वातन्त्र्यवादी भर्तृहरिः, सासु. 17.1-4:97-100.
— शैवद्वैताद्वैतदर्शनम्, सासु. 18.1-2:27-64.
— शैवद्वैतदर्शनम्, सासु. 18.1-2:1-26
— शैवद्वैतदर्शनम्, सासु. 18.1-2:65-100
51. पाण्डेयः गंगारामः,
— प्राकृतशब्दस्य अर्थस्तद्व्याप्तिश्च, सासु. 32.3-4:226-229
52. पाण्डेयः, गायत्रीप्रसादः,
(1983) कालविमर्शः, आचार्यरमेशचन्द्रशुक्लाभिनन्दनग्रन्थः
53. पाण्डेयः, ब्रह्मानन्दः,
— प्रातिपदिकम्, सासु. 29.4:289-291

54. पाण्डेयः, रमाकान्तः,
— रूपावतारे पाणिनीयसूत्राणां पाठभेदाः, सागरिका 34.2:33.39.
(1998) स्फोटसिद्धान्तस्य वेदमूलकत्वम्, आचार्यकृष्णकान्त-चतुर्वेदी-अभिनन्दनग्रन्थः, दिल्ली, सङ्गमनी 26.2:4-25
55. पाण्डेयः, श्रीकान्तः,
— कारकस्वरूपम्, सासु. 23.4:370-377
56. पाण्डेयः, श्रीरामः,
— शब्दस्वरूपसमीक्षा, सासु. 46.1-2:31-42
57. पुरोहितः, रामकृष्णः,
— पाणिनीयशाकटायनव्याकरणयोः प्रत्याहारसूत्राणां प्रत्याहाराणां च समीक्षणम्, सासु. 33.1-2: 49-56.
58. फड़के, अनन्तशास्त्री,
— नाममीमांसा, सासु. 5.2:52-54
59. बालशास्त्री,
— विश्वस्मिन्, श्रीपण्डितः (1.10.1974)
— चार्थाः, गाण्डीवम् 26.2-75 ततः, 30.3.75
— स्फोटविवेचनम्, सागरिका 18.3
— तिङर्थविमर्शः, सागरिका 21.2
— उपपदविभक्तिः, सागरिका 25.1
— उपपदविभक्त्यर्थः, सागरिका 25.2
— तद्गुणसंविज्ञानो बहुव्रीहिः, सागरिका 25.4, 26.1.
(1998) सर्वतन्त्रस्वतन्त्रो भट्टश्रीनागेशः, आचार्यकृष्णकान्तचतुर्वेदी- अभिनन्दनग्रन्थः, दिल्ली, सागरिका 34.2:29-32
60. भट्टाचार्यः, आदित्यनाथः,
— समासतत्त्वे सामर्थ्यरहस्यसंवादः, सासु. 38.1-2:11-43.
— करणस्वरूपे गुरुशिष्यसंवादः, सासु. 38.3-4:159-174
— ब्रह्मज्ञानशब्दस्य निर्दुष्टार्थपरीक्षणम्, सासु. 45.1-2:117-125.
— प्रातिपदिकत्वविचारः, सासु. 49.3-4:166-174.
61. भट्टाचार्यः, मनुदेवः,
— (1981) स्थानिवदादेशोऽनल्विधौ, पट्टाभिरामशास्त्री-अभिनन्दन ग्रन्थः,
62. भट्टाचार्यः, रामशङ्करः,
— अष्टाध्यायीक्रमसमालोचनम्, सासु. 6.2:220-228.
— अष्टाध्यायीप्रकरणसमालोनम्, सासु. 6.3-4:364-379.
— संज्ञानिष्पादकसूत्रसमालोचनम्, सासु. 12.2:50-56, 12.3-4:69-75.
— यास्कापठितानां निर्वचनानां सङ्कलनम्, संस्कृतरत्नाकारः 18.1-2.
— ज्योतिषशब्दस्य साधुत्वम्, सासु. 19.1:79-82.

— पाणिनीयानि लाघवकौशलानि, सङ्गमनी, 2.2:92-96.

63. भट्टाचार्यः, विश्वनाथः,

— (1973) वाग्मिशब्दनिर्वचनविचारः, चारुदेवशास्त्री-अभिनन्दनग्रन्थः,

64. मिश्रः, आद्याप्रसादः,

— भूतकालिकलकाराणाम् अर्थभेदविचारः, सासु. 35.1-2:70-78

— स्फोटसंस्तवः, सासु. 35.3-4:179-188.

— हेतुकरणयोरर्थभेदनिरूपणम्, सासु. 48.1-2:73-77.

65. मिश्रः, कालीप्रसादः,

— व्याकरणदर्शनम, सासु. 17.1-4:1-16

66. मिश्रः, देवस्वरूपः,

— अपभ्रंशशब्दानां साधुपूर्वकत्वविमर्शः, सासु. 49.1-2:30-32

67. मिश्रः, जयप्रकाशः,

— व्याकरणशास्त्रे गुणविमर्शः, सासु. 46.1-2:43-54

68. मिश्रः, मुरलीधरः,

— मुखं व्याकरणं स्मृतम्, ऋषिकल्पन्यासः, राजेश्वरशास्त्रि- द्राविडाभिनन्दनग्रन्थः।

— शब्दस्वरूपविमर्शः, सासु. 6.1:165-184.

— आत्मतत्त्वविमर्शः, सासु. 12.2:11-24, 12.3-4:47-56.

— व्याकरणशब्दनिरुक्तिः, सासु. 13.1-4:87-96.

— णिजर्थविचारः, सासु. 16.3-4:23-26.

— शब्दाद्वैतवादिनामवान्तरमतभेदः, सासु. 17.1-4:101-114

— लकारार्थविचारः, सासु. 18.4

— तत्त्वमसीत्यादिचतुर्णां महावाक्यानाम् अन्येषामपि अद्वैतपराणां विचारः, सासु. 22.3-4:352-361

— वैयाकरणाचार्याणां लोकविज्ञानानुवर्तित्वम्, सासु. आश्विनपौषाङ्कः, 2006 वि. : 144-147.

69. मिश्रः, रामनारायणः,

— धात्वर्थवादविमर्शः, सासु. 34:1-2:27-32

— शक्तितत्वनिरूपणम्, सासु. 34.3-4:214-224

— स्फोटमीमांसा, सासुः 42.1-2:1-80

70. मिश्रः, राममनोहरः,

— फलस्य धात्वर्थत्वविचारः, सासु. 35.1-2:79-89

71. मिश्रः, श्रीनारायणः,

— शब्दानुशासनस्य प्रथमः प्रवक्ता ब्रह्मा न वा, सासु. 26.2:151-153.

— भाषायाः प्रयोजनं रूपं च, सागरिका 10.2.

72. मिश्रः, हरिरामः,

— वैयाकरणैः प्राथम्येन लक्षणाशब्दशक्तेः, विवेचनम्, सासु. 3.4:72-77.

73. मुसलगांवकरः, गजाननशास्त्री,

— भाषाविवेचनम्, सागरिका 10-4.
— भाषावैज्ञानिकगुरुर्महर्षिर्यास्कः, सागरिका 14.3
74. मोकाटे, गणपतिशास्त्री,
— शाब्दबोधकारणनिर्वचने न्यायमतम्, सासु. 1.1:187-189.
75. मोकाटे, श्रीकृष्णशास्त्री,
— महाभाष्याह्निकद्वयवार्तिकविवरणम्, सासु. 19.3:229-246.
76. शर्मा, कमलनयनः,
— (1981) अनवयवस्यैव वाक्यस्य वाक्यार्थवाचकतेति सिद्धान्तसमीक्षा, पट्टाभिरामशास्त्री-अभिनन्दनग्रन्थः।
77. शर्मा, कृष्णकान्तः,
— (1981) कर्त्ता आख्यातवाच्यः, पट्टाभिरामशास्त्री-अभिनन्दन-ग्रन्थः
78. शर्मा, देशराजः,
— कृदन्तक्रियारूपाणाम् ऐतिहासिकपृष्ठभूम्याम् आदिकाव्यस्य कृदन्तक्रियारूपाणि, सासु. 40.1-2:21-36.
79. शर्मा, रघुनाथः,
— शिवतत्त्वविमर्शः, सासु. 13.1-4:141-150.
— व्याकरणे शब्दार्थसम्बन्धः, सासु. 13.1-4:205-214.
— प्रतिभाविमर्शः, सासु 16.3-4: 103-123.
— शब्दाद्वैतविमर्शः, सासु. 17.1-4:81-96.
— व्याकरणदर्शने शब्दसामान्यदर्शनम्, सासु. 24-2:197-250.
— व्याकरणदर्शने वाक्यविमर्शः, सासु. 24.4:293-356.
— व्याकरणदर्शने पदविमर्शः, सासु. 24.4:357-367.
80. शर्मा, राजेन्द्रप्रसादः,
— व्याकरणसिद्धान्ते शब्दार्थयोः सम्बन्धस्तत्र नागेशसिद्धान्तितबौद्धार्थ-सत्तावादस्य, प्रत्याख्यानं च, सासु. 39.1-4:193-205.
81. शास्त्री, अमलः,
— ओङ्कारः शब्दब्रह्मेति, सासु. 35.1-2:90-94.
82. शास्त्री, अशोकचटर्जी,
— तादर्थ्ये तुमुन्प्रयोगो पाणिनिः कात्यायनश्च, सासु. 42.3-4:190-198.
83. शास्त्री, गोपालः,
— पाणिनिपद्धतौ स्त्रीसमादरः, सङ्गमनी 1.3:16-18.
84. शास्त्री, गौरीनाथः,
— ब्रह्मसायुज्यम् (वैयाकरणसम्मतम्) सासु. 36.1-4:33-41
85. शास्त्री, देवदत्तः,
— अक्षरविज्ञानम्
86. शास्त्री, परमानन्दः,

– शव्दब्रह्मदत्तम्, सासु. 17.1-4:121-130
87. शास्त्री, सीतारामः,
– क्रियाविशेषणतत्त्वम्, मञ्जूषा 11.3.
– शाब्दबोधः, सागरिका, 13.3:315-322
88. शास्त्री, हिन्दकेसरी,
– भाव एव हि धात्वर्थ इत्यविच्छिन्न आगमः, सासु. 27.4:342-346.
89. शुक्लः, कालिकाप्रसादः,
– व्याकरणस्य स्वतन्त्रदर्शनत्वालोचनम्, सासु. 17.1-4: 131-144
– व्याकरणस्वरूपम्, सासु. 22.1:13-28
– स्फोटविचारः, सासु. 37.1-4:176-184.
90. शुक्लः, बदरीनाथः,
– कानिचन संस्मरणानि, सासु. 33.3-4:187-195.
– स्फोटविस्फोटः सासु. 12.2:30-39.
– सत्तास्वरूपविमर्शः, सासु. 17.1-4:379-386.
– अवच्छेदकता, सासु. 37.1-4:153-160.
91. शुक्लः, रामकिशोरः,
– यत्वमीमांसा, सासु. 29.1:25-40
92. शुक्लः, रामयत्नः
– (1987) अर्थवत्प्रातिपदिकम्, गोपीनाथक विराजअभिनन्दनग्रन्थः
– अविद्यानिरूपणम्, सासु. 30.3-4.
– व्याकरणपदार्थविमर्शः, सासु. 31.3.4:196-210.
– व्याकरणशास्त्रस्य अद्वैतपरत्वम्, सासु. 39.1-4:163-172.
93. शुक्लः, रामवदनः
– शब्दशक्तिविचारः, सासु. 33.3-4:199-204.
– स्फोटविवेचनम्, सासु. 34.1-2:1-7.
– व्यापारस्य धात्वर्थत्वम्, सासु. 35.1-2:51-57
– समासशक्तिविमर्शः, सासु. 43.3-4:204-208

मिथिलायां संस्कृतकाव्यरचना

शशिनाथ झा

भारतीयस्वातन्त्र्यानन्तरं संस्कृतकविषु नूतनैका स्फूर्तिर्जाता। सामयिक-वातावरणं तेषां वाणीषु अनुस्यूतम्। देशस्य स्थितिः, समस्या, शिक्षा, समाजस्तरोन्नयनं, राजनेतारः, विदेशसम्बन्धो, देशरक्षा इत्यादयो विषयाः संस्कृतकाव्येषु प्रासङ्गिकतया, मुख्यतया वा समागताः। परन्तु प्राचीना काव्यधारा अबाधगत्या साम्प्रतमपि प्रवहत्येव।

मिथिलायां विगत पञ्चाशद्वर्षेषु संस्कृतकाव्यरचना क्षेत्रे विहित-कार्याणि परिचाय्यन्ते। अत्रैतदवधौ सप्तमहाकाव्यानि रचितानि—(1) मधुवनीस्थेन पं. क्षेमधारिसिंहेन *सुरथचरितं,* (2) मुजफ्फरपुरस्थेन पं. भवानीदत्त शर्मणा *सौमित्रिसुन्दरीचरितम्,* (3) दरभङ्गास्थेन पं. रामचन्द्रमिश्रेण *वैदेहीचरितम्,* (4) नेपालदेशस्थ-दक्षिणाभागीय-मिथिलावासिना पं. पशुपतिझाशर्मणा *नेपालसाम्राज्योदयम्,* (5) जम्बूस्थलीग्रामवासिना पं. मतिनाथमिश्र-मतङ्गेन *भार्गवविक्रमम्,* (6) लोहनाग्रामवास्तव्येन पं. कृपाकान्त ठक्कुरेण *आञ्जनेय-चरितम्,* (7) लगमाग्रामस्थेन पं. रामकुमारशर्मणा च *भरतचरितं* महाकाव्यं विरचितम्।

शताधिकानि खण्डकाव्यानि रचितानि—(1) पं. जीवनाथशर्मणो *महेन्द्रप्रतापोदयम्,* (2) पं. श्यामसुन्दरझाशर्मणो *राजलक्ष्मीचरितम्,* (3) पद्मश्री विष्णुकान्तझाशर्मणे *राजेन्द्रवंशप्रशस्तिः,* (4) पं. रामचन्द्रमिश्रस्य *याज्ञसेनी, तरुकथा* च, (5) पं. काशीनाथ मिश्रस्य *स्मरदहनमञ्जरी, हर्षकीर्तिमञ्जरी, हर्षकीर्तिलता* च (6) रामजी ठाकुरस्य वैदेहीपदाङ्कम, *राधाविरहश्च,* (7) हरिकान्तझाशर्मणो *जम्बूकाश्मीरसुषमारत्नमित्यादीनि।*

बहवः कवितासंग्रहाः प्रकाशिताः—पं. आनन्दझाशर्मणा *आनन्दमधु-मन्दाकिनी,* कविशेखरबदरीनाथझाशर्मणः *काव्यकल्लोलिनीत्यादयः।*

गुणेश्वरचरितचम्पूः, रमेश्वरचम्पूः, सीमा, महर्षिविश्वामित्रम् इत्याद्या गद्यग्रन्थाः, गीतरत्नावली, *गीतशतकम्*, संस्कृतगीतमालिकाइत्याद्यागीत-काव्यग्रन्थाः, *भारतीयसर्वस्वम्, क्षेमकाव्यकल्पद्रुमइत्याद्या* दार्शनिककाव्य ग्रन्थाः प्रशंसनीयाः सन्ति।

संस्कृतदृश्यकाव्यकारेषु पं. जीवननाथ झा, पं. गङ्गेश मिश्रः, पं. आनन्द झा, पं. गङ्गाधरमिश्रः, पं. मतिनाथ मिश्रः, पं. ऋद्धिनाथ झा, पं. शशिनाथ झा, पं. नोदनाथ मिश्र प्रभृतयो मुख्याः परिगण्यन्ते।

एतद्वधिककविषु कतिपये महाकवयो दिवङ्गताः। यथा कविशेखर बदरीनाथझा, पं. ऋद्धिनाथझा, पं. दीनबन्धुझा, पं. जीवनाथझा, पं. आनन्दझा, पं. उपेन्द्रठाकुरः, वाबूमिश्रः, कुमुदनाथ मिश्रः, कुलानन्दमिश्रः उदयकान्तझा, क्षेमधारीसिंहः, गङ्गेशमिश्रः, गिरिजानन्दझा, भवानीदत्त शर्मा, तेजनाथझा, राजेन्द्रझा, रमानन्दझा, रामचन्द्रमिश्र, विष्णुकान्तझा, व्रजनाथझा, श्यामसुन्दरझा, सीतानाथझा, हरिमोहनमिश्रश्चेत्याद्याः।

साम्प्रतं पं. मतिनाथ मिश्रः, रामकिशोरझा 'विभाकरः', काशीनाथमिश्रः, रामजीठाकुरः, कृष्णानन्दझा, वैद्यनाथमिश्र 'भास्करः', कृपाकान्त ठाकुरः, यन्त्रनाथ मिश्रः, रामकरणशर्मा, शशिनाथझा, शङ्करजीझा, मीनाकुमारी, रामकुमारशर्मा, परमानन्दझा चेत्याद्याः कवयः स्वकविताभिः संस्कृतभारतीं भूषयन्ति, पत्रिका, आकाशवाणी लोकमञ्चाश्चाधिरोहन्ति।

एतदवधिकेषु कविषु कतिपयेषां वैशिष्ट्यमधस्तान्निरूप्यते—

महावैयाकरण पं. दीनबन्धु झा—(1878-1955) मुख्यतया वैयाकरणोऽप्ययं कविरूपेणापि प्रथितः। अस्य रसिकमनोरञ्जिनी सार्धद्विशतपद्यामित्का शृंङ्गाररसमयी रचनास्ति। मुग्धा-मध्या-प्रगल्भेति-नायिकात्रितयस्य क्रमशः स्वभाववर्णनं प्रसङ्गत्रयात्मकाध्यायत्रयेष्वत्र कृतम्। दाम्पत्यव्यवहार-चातुर्यप्राप्तिः काव्यस्यास्य लक्ष्यम्। प्रथममूलनाय पतिसमीपं सखीगणैर्नीयमाना मुग्धा वणर्यते—

'नेयं यास्यति हीयतां, 'कथमिव त्याज्या बलान्नेष्यते'
'चित्ते कामयते न किं मम सखी, 'गच्छालि! भीतिः कुतः'?
इत्येवं सवयोजनैरनुपदं सम्भाषमाणैर्ह्रिया
शोभां कामपि बिभ्रती नववधूर्लीलागृहं नीयते।।

—*मुग्धाप्रसंगः*—8

अलङ्कारचमत्कृत-विशदाशयप्रकाशने कविः परमनिपुणोऽस्ति—

यदीयमङ्कं त्वमधिष्ठितासि
त्यजेत् कथं त्वामवितृप्त एषः।
को नाम वारामिह शैत्यसारां
जहाति धाराममनिवृत्ततृष्णः।। *मुग्धा.* -31

एतत्प्रणीतस्तुतिकाव्येष्वति सामयिकपरिवेशः प्रतिविम्बितोऽवलोक्यते—

आभाति माधव तवोरसि वर्तमानं
श्रीवत्सलाञ्छनमनुत्तमशान्तमूर्त्तेः।
त्रैलोक्यवर्तिपुरुषोत्तमतापरीक्षा—
प्रोत्तीर्णता-परिचयाक्षरमुद्रणेव।। —*विष्णुस्तुतिः।*

क्षेमधारिसिंहः (1893-1961 ई.)—दार्शनिककविवरोऽसौ मिथिलास्थ- खण्डवला-राजवंशोत्पन्नो मधुवनी-नगरवासी आसीत्। अयं सुरथचरितं महाकाव्यं विरचितवान् यत्र सरलता सरसता च दार्शनिक भावसमुच्छलि- तावलोक्येते।

यथा—पुंस्कोकिलोऽयं हि रसालमञ्जीं
भुक्त्वा निकूजत्यतिशोणदृष्टिः।
स कामदूतः प्रमदाजनानां
हन्तायवायं विरहानलत्वात्।। 3-42

एतन्महाकाव्योपरि मुजफ्फरपुरस्थ-विहारविश्वविद्यालय संस्कृतविभागीय प्राचार्याः डॉ. सतीशचन्द्रझामहानुभावाः शोधकार्यं विधाय प्रकाशितवन्तः।

1.8. The *Upamāvivekaḥ*[14] (1992) is the thesis on the basis of which its author Kāśinātha Miśra was awarded Ph. D. degree of the University of Bihar, Muzaffarpur. It is divided into two parts. Part one contains three chapters and part two consists of eight chapters. The first part deals with *Alaṅkāras* in general—their antiquity and importance in poetic composition in the light of the views of Bhāmaha, Udbhaṭa, Ṛudraṭa and Pratīhā-rendurāja; their importance in poetry according to Daṇḍin and Vāmana, who attach importance to *Guṇa* as well; their importance in the opinion of protagonists of *Dhvani*-school and *Vakrokti* school; the number and classification of *Alaṅkāras* etc.

The second part is completely devoted to a comprehensive critique of the *alaṅkāra* styled *Upamā* from the vedic period to the age of Paṇḍitarāja and Appaya Dīkṣita. The treatment is very very exhaustive and the style is "समग्रगुणगुम्फिता वैदर्भी ।" The author has taken pains to quote copiously from the *Ācāryas* and tried to explain their views in a manner that is relished by modern student of Sanskrit poetics with traditional background.

2. There are in all seven commentaries including two help books. *Dhvanyālokarahsyam*[15] and *Rasagaṅgādhararahasyam*[16] adverted to above. Of the remaining five four are commentaries on the *Rasagaṅgādhara* and one on the Sāhitya *darpaṇa*. They are the *Candrikā*[17] on the *Rasagaṅgādhara* (*ānana* I) by Badarinātha Jhā (1955), the *Candrikā*[18] on *ānana* II by Madanmohana Jha (1967), the *Rasanirūpaṇabhāgavyākhyā*[19] by Dinabandhu Jhā (1995) and the *Rasataraṅgiṇī*[20] on *ānana* I by Śrīnārāyaṇa Miśra and Śaśinātha Jhā (1996). The commentary on the *Sāhiyadarpaṇa* (*Pariccheda* III to X) by Kṛṣṇamohana Ṭhakkura (1948) in captioned *Lakṣmī*.[21]

3. Research papers

In Mithilā, in the post independence era, some fifty

five research papers written in Sanksrit deserve mention. They deal with a variety of topics and problems pertaining to the *Alaṅkāraśastra*. They have been enumerated in the bibliography.

References

1. Published in *Kaviśekharapuṣpāñjaliḥ* (Kaviśekhara Badarīnātha Jhā Felicitation Volume), Darbhanga, 1974, pp. 100-163.
2. Ibid. p. 105
3. *Śrīlaksmīśvarīcaritam*, Śrīrameśvara Press, Darbhanga, 1921 p.9
4. K.S.D. Sanskrit University Darbhanga, 1978.
5. Rashtriya Sanskrit Sansthan, New Delhi, 1998
6. 'वाचां विविधमार्गाणां निववन्धुः क्रियाविधिम्'—काव्यादर्शः I.9
7. 'क्रियाकल्पविदश्चैव तथा काव्यविदो जनान् ।' वाल्मीकीयरामायणम्— उत्तरकाण्डम्-94-7
8. 'कथन्तर्हि प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रवन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां वहुमानः ।'—मालविकाग्निमित्रम्—प्रस्तावना
9. P. 13
10. Mithila Research Institute, Darbhanga, 1978
11. Moti Lal Banarsi Dass, Varanasi, 1978
12. Indira Prakashan, Darbhanga, 1995
13. Chowkhamba, Varanasi, 1954
14. Mithila Research Institute, Darbhanga, 1992
15. Varanasi, 1963
16. Varanasi, 1967
17. Varanasi. 1955
18. Varanasi 1967
19. New Delhi. 1995
20. Varanasi, 1996
21. Varanasi, 1948

A bibliography of original works and commentaries on Alaṅkāraśāstra in Mithilā in post-independence period (in alphabetical order)

Name of the author	Year of Publication	Writing	place of Publication
आनन्द झा	1978	ध्वनिकल्लोलिनी	दरभंगा
काशीनाथ मिश्र	1992	उपमाविवेकः	दरभंगा
कृष्णमाधवझा	1974	अलङ्कार विद्योतनम्	दरभंगा
कृष्णमोहन ठाकुर	1978	साहित्यदर्पण-लक्ष्मीव्याख्या	वाराणसी
जयमन्त मिश्र	1998	काव्यविच्छित्तिमीमांसा	नवदेहली
	1970	निवन्धकुसुमाञ्जलिः	वाराणसी
	1995	प्रवन्धकुसुमाञ्जलिः	दरभंगा
दीनबन्धु झा	1995	(रसगङ्गाधरीय) रसनिरूपणभागव्याख्या	नवदेहली
बदरीनाथ झा	1955	रसगङ्गाधरचन्द्रिका (प्रथमानन व्याख्या)	वाराणसी
मदनमोहन झा	1967	रसगङ्गाधरचन्द्रिका (द्वितीयानन व्याख्या)	वाराणसी
	1967	रसगङ्गाधररहस्यम्	वाराणसी
वैद्यनाथझा	1978	लोचन विमर्शः	दरभंगा
शशिनाथ झा	1996	रसगङ्गाधररसतङ्गिणी	वाराणसी
श्रीनारायण मिश्र		(प्रथमाननव्याख्या)	
शोभित मिश्र	1963	ध्वन्यालोकरहस्यम्	वाराणसी
	1954	साहित्यनिबन्ध	वाराणसी

A bibliography of research papers on Alaṅkāraśastra in Mithila in post-independence period

Author	year	Article	Journal	Vol/no.	page No
अर्जुन झा	1974	काव्यलक्षण-निरूक्तिः	मनीषा	1/1	52-58
आद्याचरण झा	1992	उज्ज्वलनील-मणेर्मधु-राख्यो भक्तिरसः	संस्कृत प्रतिभा	19/1	114-119
	1985	देवीभागवते रससामञ्जस्यम्	विश्वमनीषा	8/4	3-10

आनन्द झा	1976	नाट्यशास्त्र समीक्षा	मनीपा	2/3	
	1976	नाट्यशास्त्र परिचयः	मनीपा	2/3	46-55
	1977	प्रचलितरसानुभूति सिद्धान्तः	मनीपा	3/1	53-64
उदयकान्त झा	1983	काव्यलक्षणपरीक्षा	विश्वमनीपा	7/1	36-37
	1985	व्यञ्जनावादे तार्किकालङ्कारि-कयोर्मत स्थितिः	विश्वमनीपा	8/4	10-13
	1986	शृङ्गारसारिणी समीक्षा	विश्वमनीपा	9/4	48-53
	1985	साहित्यरयू शास्त्रत्यम्	विश्वमनीपा	12	87-88
कृपाकान्त ठाकुर	1978	साहित्यशास्त्रे गतिः	दीनवन्धुस्मृति-ग्रन्थ		142-144
कृष्णचन्द्र झा	1985	रीतिविचारः	अ. भा. प्रा. वि. सम्मेलन [अहमदा- बाद]		
रवङ्गनाथ मिश्र	1974	काव्यात्मविमर्शः	कविशेखर-पुष्पाञ्जलि		426-35
जयमन्त मिश्र	1968	अभिनवगुप्तपादानां शान्तिरस विचारः	प्रो. वी. के. वरुआस्मृतिग्रन्थ		
	1970	अरस्तूमहोदयस्य भरतमुनेश्च नाटय-विपयक विचारः	ऋपिकल्पन्यासः		
	1975	अलङ्कारशास्त्रे विहारस्य योगक्षेमः	प्रोसीडिङ्स ऑफ इण्टरनेशनल संस्कृत कॉफरेन्स, नई दिल्ली 1972	1/1	125-128
	1986	काव्य-शास्त्रीय सम्प्रदाय रहस्यम्	उपेन्द्रझा अभिनन्दन ग्रन्थ		
	1985	काव्यश्रवणात्परं रसनिप्पत्तिपर्यन्तं समपेक्षित-काल विमर्शः	अ. भा. प्रा. वि. सम्मेलन (अहमदावाद)		

	1961	नाट्यशास्त्रे रसः	संस्कृत-सञ्जीवनम्		
	1977	पूर्वध्वनिकालिकाना-मालङ्कारिकाणां रसविचारः	वी. वी. आर् आई. जर्नल		
जयमन्त मिश्र	1967	रसौ वै सः	त्रिभुवन विश्व-विद्यालय जर्नल		
	1983	स्वभावोक्तेर-लङ्कारत्वम्	तारकेश्वरत्रिपाठी अभिनन्दनग्रन्थ		
	1988	स्वभावोक्ते-रलङ्कारत्वस्य समीक्षणम्	वाङ्मयम्		
जीवनाथ झा	1974	संस्कृतसाहित्यस्य सूक्ष्मता	मनीषा	1/1	30-33
दीनबन्धु झा	1976	साहित्यपदार्थ-निरुक्तिः	मनीषा	2/2	59-60
दीननाथ तिवारी	1992	रसोद्बोधे दार्शनिक दृष्टयः	संस्कृत सञ्जीवनम्	1	20-23
देवनारायण झा	1986	भवभूतेः करुणो रसः	विश्वमनीषा	10/2	49-52
द्वारिकानाथ झा	1978	काव्यलक्षण समीक्षा	दीनबन्धुस्मृति ग्रन्थ		96-99
	1982	व्यञ्जनाव्यापारः	विश्वमनीषा	6/3	11-16
बदरीनाथ झा	1981	काव्यात्मविवेकः	विश्वमनीषा	5/2 परिशिष्ट	1-9
बदरीनाथ झा		समासोक्ति समास शक्त्योः समता	सारस्वती सुषमा	16/12	
व्रजमोहन झा	1975	कविसमयोक्ति	मनीषा	2/1	28-32
मदनमोहन झा	1974	साहित्यशास्त्रीयं साधारणीकरणम्	मनीषा	1/2	9-19
मनोजनाथ झा	1989	रसेषु करुणः	प्रधानः	शिक्षाप्रसूनम्	38-41
मीनाकुमारी	1985	काव्यादर्शस्यकाव्य लक्षणम्	विश्वमनीषा	9/1	24-28
	1974	शब्दःशब्दार्थो च काव्यम्	मनीषा	1/1	51
मुनीन्द्र झा	1975	काव्ये रसः	मनीषा	1/3	60-67
रत्नेश्वर झा	1981	अलङ्कार शास्त्रावतारः	विश्वमनीषा	5/2	42-47
रामकिशोर झा	1997	महाकविसङ्घकदृष्ट्या	गोविन्द झा		62-64

		कवेः तत्काव्यस्य च स्वरूपविमर्शः	अभिनन्दन ग्रन्थ		
रामकुमार शर्मा	1994	शब्दशक्त्युद्भवो ध्वनिः	विश्वमनीषा	12/2	1-14
रामगुलाम मिश्र	1977	उपमाकालिदासस्य	विश्वमनीषा	3/3	16-19
रामजी ठाकुर	1974	एकोरसः करुण एव	कविशेखर-पुष्पाञ्जलिः		436-441
	1978	हास्यरसः	दीनबन्धुस्मृति ग्रन्थ		145-149
विधानाथ झा	1983	अलङ्कारसमीक्षा	विश्वमनीषा	7/2	62-70
	1985	निर्दुष्टं काव्य लक्षणम्	अ.भा.प्रा. वि. स. (अहमदावाद)		
	1984	वक्रोक्तिः काव्य-जीवितम्	विश्वमनीषा	7/4	51-60
वैद्यनाथ झा	1977	लोचनध्व-न्यालोकयोः कालिदासीयपदय परिशीलनम्	विश्वमनीषा	3/3	6-15
शक्तिनाथ झा	1986	अङ्गिरसविवेचनम्	विश्वमनीषा	9/4	40-47
शङ्करजी झा	1987	काव्यगतपद्-लालित्यभेदा	आदर्शः		
	1989	शाब्दबोधेअभिहि-तान्वयान्विता भिधानवादौ	शिक्षाप्रसूनम्		21-24
शङ्करनाथ मिश्र	1980	तद्धिते नामधातौ च उपमायाः प्रयोगः	विश्वमनीषा	4	69-73
शोभाकान्त जयदेव झा	1965	ध्वनिमीमांसा	मिथिला रिसर्च इंस्टीट्यूट वुलेटिन	1/2	36-41
	1965	रसमीमांसा	"	1/1	29-36
श्री मन्नारायण झा	1985	वाक्यं रसात्मकं	विश्वमनीषा	9/1	56-59
सच्चिदानन्द चौधरी	1974	गौडीयसम्प्रदाये रसविमर्शः	काव्यम् मनीषा	1/1	61-64

स्वातन्त्र्योत्तरे भारते मिथिलायां व्याकरणशास्त्रीय-ग्रन्थलेखनपरम्परा

सदानन्द झा

आ हिमालयादाभागीरथीमागण्डकया आ कौशिकीं वितायां जनकप्रभृतिगृहमेधि-परापरब्रह्मविदध्युषितायां जानकीजननभुवि प्रसूतानेकनैकशास्त्रज्ञतापसायां मिथिलायामासीदष्टादशख्रिष्टशताब्दी यावन्न्याय शास्त्रस्य प्रचुतरः प्रचार प्रसारः शास्त्रान्तरात्। किन्तु विंश शताद्ध्यां वाराणस्यां स्व प्रखर पाण्डित्य-समुपार्जितामर-यशोराशीनां पण्डितप्रकाण्डानां शिवकुमारशास्त्रि प्रभृतीनां शिष्यैः समधीता-वबुद्ध पाणिनीय तन्त्र रहस्यैरध्यापितानेककुशाग्रधीशिष्यैरकारि व्याकरणशास्त्रमपि लब्धप्रचुरप्रचारप्रसारम्। तैर्विद्वत्तलजैर्व्यरचिषत विविधा विबुधहृद्या अनवद्याः ससाराः शब्दशास्त्रीयाग्रन्थाः।

यद्यपिस्वतन्त्रे भारतेऽधिमिथिलं शास्त्रर्थन्यकृतवाकपतयः कर्मणा यतयः पण्डितशिरोमणयोऽनेकेनैकशास्त्रप्रवीणा अपिशब्दद्यासयत्लवद्धश्रद्धा बभूवुस्तथापि ग्रन्थ-लेखने विमुखा आशंस्ते। मया सविनयं श्रीमद्भिः कश्चनापिग्रन्थः किं न लिख्यते इति पृष्टेनैकेन विपश्चिताऽमाणि यदिदानीं संस्कृतापकर्षण काले न विद्यते तथाऽवश्यकता ग्रन्थप्रणयनस्य यथाध्यापनस्य। सन्ति विविधा ग्रन्थाः येषामध्यापको दुर्लभः। अतोऽध्यापका निर्भ्रान्तव्याः। ग्रन्थ प्रणयनं पिष्टपेषणमेव प्रायः साम्प्रतिकानाम्। एवंविधविचारा विपश्चितोऽध्यापयन्त एव स्वकीयां जीवनलीलां समापुः।

मन्ये यद्येतेऽपि विद्वांसो लघीयांसमपि ग्रन्थमरचयिष्यँस्तदा स्वर्णेऽपि सुगन्धयोगोऽभविष्यत्।

तथापि प्राप्त स्वातन्त्र्ये भारतेऽधिमिथिलं व्याकरणग्रन्थ-लेखनकार्यं परमं सन्तोषावहं वर्तते।

मौलिकाष्टीकात्मकाः सम्पादिताश्च बहवो ग्रन्था रचिताः प्रकाशिताश्च।

विभिन्नपत्रपत्रिकासु नानापाण्डित्यपूर्णगवेषणयुक्ता निवन्धाश्च प्रकाशिताः।

प्रथमं तावत् स्थालीपुलाकन्यायमवलम्ब्य मैथिलवैयाकरणमेकमुदाहरणस्वरुपमेव स्वातन्त्र्योत्तरेभारतेऽधिमिथिले स्वप्रखरपाण्डित्यप्रभाप्रकाशितव्याकरणवाङ्मयाकाशं महावैयाकरण-दीनवन्धुझा महाभागमेव दृष्टान्तरूपेण प्रस्तौमि।

मैथिलश्रोत्रियवंशावतंसः प्रथितयशोनिधेः म.म.शिवकुमार मिश्रस्य शिष्येष्वन्यतमः 'माण्डरसिंहौल'समाख्यकाश्यपगोत्रीयः सकलशास्त्रपारावारपारङ्गतोऽपि व्याकरणैक बद्धश्रद्धः सच्छिष्य समध्यापनार्जितसमज्ञः प्रख्याततमो मिथिलावयवमधुवनीमण्डलान्तर्गत-सरिसवग्रामाभ्याशे वर्तमान ईशपुरग्रामे 1878तमे खृष्टाब्दे जातः 26.1.1955 तमे खृष्टाब्दे दिवङ्गतः महाकविवैयाकरणशिरोमणि जीवनाथ-श्रीगोविन्द-श्रीमाधवाख्य-विद्वत्तलजौरस-पुत्रको दीनबन्धुझा महाभागः निम्नलिखितान् मुख्यान् व्याकरणशास्त्रीयान् ग्रन्थानलेखीत्—

(1) लिङ्गवचनविचारः (प्रकाशनकालः 1954)–

अत्र शब्दशास्त्रीयं लिङ्गवचनं च सरलयाऽपि पाण्डित्यपूर्णया शैल्या व्यचारिषाताम्। ग्रन्थोऽयं महभाष्यीयं गुह्यं रहस्यमुद्धाटयन् स्वीयां मौलिकतां प्रकटयति। प्रायेण समे शाब्दिका जानन्ति यच्छब्दशास्त्रे शास्त्रीयं लिङ्गमाश्रीयते। तत्र सत्त्व रजस्तमसामुपचयः पुंस्त्वम्, अपचयः स्त्रीत्वम्, साम्यं क्लीबत्वञ्चेति व्यक्तमेवविपश्चिताम्। अत्र रहस्यमुद्धाटयन् ग्रन्थकारो वदति यद् गुणानां साम्यं क्लीवत्वं वक्तुं न शक्यते। साम्ये हि प्रलयमेवेष्यते।

अतोऽत्र साम्यशब्देन त्रयाणां गुणानां कस्यचिदेकस्य समः स्थितिरूपः परिणामः क्लीबत्वेन स्वीकार्यः। सांख्यमते समे पदार्थाः परिणामिनस्त्रिगुणात्मकाश्च। तत्र कस्मिन्नपि पदार्थे सत्वादिषु एको गुणो यदोपचीयते तदाऽपरोऽपचीयते, अन्यश्च समस्तिष्ठति। स नोपचीयते, नापचीयते च। एवं यदा कस्यचिद् गुणस्योपचयस्य विवक्षा तदा पुंस्त्वम्, अपचयस्य स्त्रीत्वम्, साम्यस्य क्लीबत्वम्। एवं सत्त्वादिगुणपरिणामाः शास्त्रीयलिङ्गत्वेन स्वीकृताग्रन्थकृता। अत्रसरूप सूत्रस्थ-गुणानां सत्त्वरजस्तमः परिणामरूपाणां शब्दादीनां वृद्धिह्रासमध्यमावस्थाः शब्दैकगोचरा लिङ्गत्वेन परिगृह्यन्ते" इति कैयटवचनं प्रमाणत्वेनोन्यस्तम्। एवं लौकिकमपि लिङ्गं निरूपितं ग्रन्थेऽस्मिन्। एवं प्रकारानै विचाराः सन्ति लिङ्गवचनविषया अत्र प्रतिपादिता ये चेतश्चमत्कुर्वन्ति विदग्धानाम्। प्रायेण सर्वो मन्यते यद् दाराक्षत शब्दौ भूम्नि पुंस्त्वे च प्रयुज्येते। किन्त्वत्र दारशब्दस्य स्त्रीत्वे

स्त्रियां एकवचनेऽपि अक्षतशब्दस्य क्लीवेऽपि च प्रयोगः साधुतयाऽङ्गीकृतः।

(2) पाणिनीयव्याकरणतत्त्वप्रदीपः—प्रकाशनकालः 1984 ई.

अत्रपाणिनीयव्याकरणस्य माहेश्वरसूत्राणां कतिपयपरिभाषाणां च रहस्यमुद्धाटितं, पाणिनीयव्याकरणं समासेन परिचायितं च। अदसीय- भूमिका ग्रन्थकृतैवाऽलेखि। अस्यामपि नैके मौलिका विचारा द्रष्टुं शकयन्ते। ग्रन्थकारोऽत्र पाणिनीयव्याकरणस्य महत्त्वे पञ्चहेतून् प्रत्यपादयत्—

(क) तपःप्रसादित-महेश्वरप्रभावसमासादित प्रज्ञा-विशेषाचार्य प्रणीतत्वम्।

(ख) श्रुतिरूप-महेश्वरसूत्र मूलकत्वम्।

(ग) प्रमाणभूताचार्यप्रणीतत्वम्।

(घ) दर्भपवित्रपाणि-पवित्रदेशप्राङ्मुखोपविष्टतया पवित्रीभूयनिर्मितत्वम्।

(ङ) महाप्रयत्नपूर्वक सावधानतया रचितत्वं चेति।

अस्मिन् ग्रन्थे पाणिनीया शैली मुख्यरूपेण प्रदर्शिता।

(3) कौमुदी मूलार्थ विद्योतिनी—प्रकाशन कालः—1985

आस्मिन् ग्रन्थे कारकभागं यावत् वैयाकरणसिद्धान्तकौमुद्याः क्लिष्टतममूलार्थः प्रकाशितः।

(4) समासशक्तिदीपिका—प्रकाशनकाल :—1977 ई.

अस्मिन् ग्रन्थे शाब्दिकाभिमता समासगताऽजहत्स्वार्थावृत्तिः सनैक प्रमाणोपन्यासं विचारिता।

उक्तग्रन्थे परम गुरवः स्वीयाऽप्रतिमया प्रतिभया समासे शक्तिस्वीकार विषये एवं प्रत्यपादयन्—

नैवलक्षणया लिङ्गभेदो भवति कर्हिचित।
तद्दर्शनात्तु निर्णेया शक्तिः सामासिकी बुधैः।।

अस्याऽयमाशयः दार्शनिकाः लक्षणावृत्त्या सर्वत्र निवोढुं न शक्ष्यन्ति लक्षणवृत्तिर्हि न खलु लिङ्गभेदप्रयोजिका, समासे च लिङ्गवैपरीत्यमपिदृश्यते। अतएव वैयाकरण-सम्मतं मतं स्वीकरणीयमेव। अन्यथा—

श्रवसो कुवलयमक्ष्णोरञ्जनमुरसो महेन्द्रमणिदाम।
वृन्दावनतरुणीनां मण्डनमखिलं हरिर्जयति।।

इति कविकर्णपूरविरचिते श्लोके कुवलयादौ, यथा च गङ्गायां घोषः मञ्चाः क्रोशन्तीत्यादौ च

(यत्र लिङ्ग व्यत्यासो नं भवति) लक्षणया निर्वाहेऽपि यशोधन इत्यादि समासस्थलेनिर्वाहो न स्यात्।

अत्रधनशब्दस्य नित्यनपुंसकलिङ्गत्वात्। कृतायामपि लक्षणायां इष्टार्थबोधेऽपि लिङ्गविपरिणामः कथं स्यात्। तद्भावे च अन्य पदार्थगत लिङ्गज्ञानं कथं स्यात्। तस्मात् लिङ्गभेद प्रयोजिका समासनिष्ठा शक्तिरेकार्थी- भावरूपा स्वीकार्यैव सर्वैरिति। अस्यग्रन्थस्यव्याख्या डा. सदानन्द भाशर्मणकृता।

(5) उपसृष्टधात्वर्थसङ्ग्रहः—प्रकाशन कालः 1981

अत्रोपसृष्टानां धातूनामर्थान्यरूपिषत।

ग्रन्थकृतोऽस्य "वैयाकरणभूषण सारदीपिका" ग्रन्थो दरभङ्गास्थित मिथिला-संस्कृतशोधसंस्थाने प्रकाशनायपूर्वमेव समर्पितः किन्तु नाद्यावधि प्रकाशितः महावैयाकरणस्य दीनबन्धुझामहाभागस्य शब्दशास्त्रीयनैके शोधनिबन्धा दरभङ्गास्थ संस्कृतविश्वविद्यालयेन प्रकाशितासु विविधासु विश्वमनीषाख्य पत्रिकासु प्रकाशितः।

उक्तैः शब्दशास्त्रीयैः प्रकरणात्मककैर्नवीनं रहस्यमुद्घाट्यते। महावैयाकरणस्य विशिष्टं परिचयं ज्ञातुं दीनबन्धुस्मृतिग्रन्थः विशेषेण द्रष्टव्यमस्ति।

एतादृशा आसन् मैथिलवैयाकरण निदर्शनभूता महावैयाकरण दीनबन्धुझा महाभागाः।

अतः परं निवन्धविस्तरमियासमासतोऽन्ये मैथिलवैयाकरणाः परिची-यन्तेऽकारादिक्रमेण—

अमरनाथ झा	भावप्रत्ययार्थः	विश्वमनीषा दरभंगा	1977
डॉ. अर्कनाथ चौधरी	मध्यकौमुदीमध्यमनोरमा पूरणी व्याख्या	जयपुरम्	1986
पं. आद्याचरण झा.	1. मनोरमा शब्दरत्न-प्रकाशिका	पटना	1985
	2. लेखा :— नित्यं शब्दमयं ब्रह्म		1986

	1. किं कुण्डलिनी तत्मेवस्फोटवादस्यबीजम्	पटना	1986
	2. वैज्ञानिकता च शब्दनित्यतायाः शास्त्रीयता	पटना	1964
	3. भगवन्नामचर्चा पाणिनीयसूत्रोदाहंरणेषु		1981
डा. उदयकान्त झा	परिभाषेन्दुशेखरविजया-भूत्योः समीक्षा	विश्वमनीषा दरभंगा	1985
पं. उपेन्द्र झा	1. कर्तृपरगामित्वे उपग्रहव्यवस्था एकस्यैव फलस्य	दरभंगा	1976
	2. प्रत्ययलोपे प्रत्ययलक्षणम्	दरभंगा	1977
पं. कुलानन्द मिश्रः	1. विचारः भगवत्पतञ्जलेर्वेदार्थ	दरभंगा	1974
	2. समानाधिकरण्य विचारः वेदाः प्रमाणमित्यत्रलिंग	दरभंगा	1982
डॉ. कृष्णानन्द झा	1. शाब्दिकसिद्धान्त	दरभंगा	1982
	2. नागेश सम्मताशक्ति	दरभंगा	1982
डॉ. कलानाथ झा	कारकदर्शनम् कारकप्रकरणस्य कौमुदी व्याख्या	वाराणसी	1980
डॉ कालीकान्त झा	मध्यकौमुदी सीतासावित्रीव्याख्या	वाराणसी	1986
पं. कृष्णकान्त झा	सन्धिप्रभा	वाराणसी	1992
पं. गिरिधर झा	समासशक्तिः	प्राच्यविद्या सम्मेलन अहमदाबाद	1985
पं. गोविन्द झा	पाणिनीयधातुपाठविषये केचन विचाराः		1992
पं. चन्द्रविनोद झा	धातुसंज्ञासूत्रम्	लगभा दरभंगा	1989
पं. जटाशंकर झा	सहयुक्तेऽप्रधाने	दरभंगा	1982
डॉ. जयमन्त मिश्र	1. संस्कृतव्याकरणोदयः		1955
	2. संस्कृतव्याकरणसारः		1950
	3. महर्षिपाणिने सैद्धान्तिक वैशिष्ट्म्	संस्कृत प्रतिभा	1990
	4. पाणिनेसत्सूत्रप्रयोगाः	संस्कृतविमर्श दिल्ली	1974
	5. वाल्मीकि पाणियोः पौवापर्यः	कुरुक्षेत्रम्	1975
	6. महर्षिपाणिनेः मध्यममार्ग	धारवाड़	1977

पं. जीवनाथ झा	1. व्याकरणकौतुकम्	नेपालतः	
	2. शब्दसमीक्षा	नेपालतः	1983
	साधुशब्दसमीक्षा		1950
पं ताराकान्त झा	लघुशब्देन्दुशेखर दीपिका व्याख्या	दरभंगा संस्कृत विश्वविद्यालयः	1987
पं. तुलाकृष्ण झा	ऋग्वेदीयो नामधातुः	दरभंगा	1986
पं. दयानाथ झा	व्याकरणस्य महत्वम्	दरभंगा	1989
पं. दीनवन्धु झा	1. लिंगवचनविचारः	दरभंगा	1954
	2. पाणिनीयव्याकरण तत्वप्रदीपः	दरभंगा	1987
	3. बालशिक्षा सोपानम्		1981
	4. उपसृष्ट धात्वर्थ संग्रहः		1980
	5. कौमुदी मूलार्थ विद्यातिना		1984
	6. प्रवृतिनिमित्तलक्षणम्	विश्वमनीषा	1977
	7. अपवाद विचारः		1977
	8. कार्यासिद्धत्व समर्थन खण्डनम्		1977
	9. अन्तादिवात्सूत्र व्याख्या		1977
	10. शाब्दबोध प्रक्रिया		1977
	11. अनभिधान विचारः		1977
देवकान्त झा	अभिनवसंस्कृतव्याकरणम्	पटना	1994
देवनारायण झा	महाकविश्री श्रीहर्षस्यापाणिनीय-प्रयोगः	अहमदाबाद	1985
धनुर्धर झा	1. माहेश्वर सूत्रविमर्शः	लगभा दरभंगा	1989
	2. धात्वनुबन्धफलविमर्श	विश्वमनीषा दरभंगा	1994
ध्रुवकान्त ठाकुर	व्याकरणशास्त्रीयपरिभाषा	दरभंगा	1986
नरेश झा	शब्दार्थयोस्तादात्म्येवौद्धार्थ-प्राधान्यम्	दरभंगा	1985
पलटू झा	संस्कृतवोधः	पटना	1955
प्रभुनारायण शर्मा	शक्तिग्रहेव्यवहारस्य प्राधान्यम्	दरभंगा	1986
पशुपति झा	चतुर्दशसूत्रीविमर्शः	होशियारपुर	1976
वावू मिश्रः	व्युत्पत्तिवार्ता	दरभंगा	1982
विमल ठाकुर	संस्कृतदर्पणः	दरभंगा	1996
विश्वनाथ झा	शब्दलक्ष्मण् (लेखः)	वाराणसी	1985
विश्वेश्वर झा	सिद्धान्तकौमुदी (स्वरवैदिकी)	दरभंगा	1994
वेदानन्द झा	शब्दब्रह्मवादस्योद्गमो विकासश्च		1982

व्रजनाथ झा	प्रातिपदिकस्यप्रारूपं वर्गीकरणं च	सरस्वतीसुषमा वाराणसी	1972
वालगोविन्द झा	समासदर्शिका	पटना	1981
विकाउ झा	नियमविचारः	दरभंगा	1994
भूपनारायण झा	शाब्दिकमते शक्तिस्वरूपम्	सारस्वतसुषमा वाराणसी	1972
मार्कण्डेय मिश्र	वर्णस्फोटविचारः	दरभंगा	1977
मधुकान्त झा	महाभाष्य प्रकाशः	वाराणसी	1949
माधव झा	लृकारोच्चारणम्	विश्वमनीषा दरभंगा	1975
मणिनाथ झा	1. शब्दानामर्थपरत्वं शब्द परत्वं वा	मिथिला विद्यापाठ दरभंगा	1970
	2. वा विभाषा अन्यतरस्याम् इत्यादेरर्थ भेदः	प्राच्यविद्या	1986
	3. ज्ञापकादर्शः (अप्रकाशितः)	सम्मेलन	1986
मीनाकुमारी	सकर्मकोऽकर्मश्च	दरभंगा	1982
मुनीन्द्र झा	1. शाब्दवोधः	विश्वमनीषा दरभंगा	1983
	2. वाक्यार्थवादः	दरभंगा	1983
	3. प्रातिपदिकाविवेचनम्	दरभंगा	1983
यशोदानन्द झा	गमृधात्वर्थ विचारः	विश्वमनीषा दरभंगा	1994
योगेश्वर झा	मध्यपाणिनीयम्	वाराणसी	1990
रमाकान्त ठाकुर	प्रवन्धामृतम् (ग्रन्थः)		1955
रंगेश्वरनाथ मिश्र	धात्वर्थ विचारः	दरभंगा	1981
रामचन्द्र झा	लघुसिद्धान्तकौमुदी व्याख्या	वाराणसी	1962
	मध्यसिद्धान्तकौमुदी व्याख्या	वाराणसी	1982
	अनुवाद कौमुदी	वाराणसी	1982
रुद्रधर झा	महाभाष्यतत्वालोक	वाराणसी	1956
रमेश झा	1. व्याकरणशास्त्रीय निवन्ध	मधुवनी	1994
	2. व्याकरणशास्त्रीय पारिभाषिक	मधुवनी	

रामविलास चौधरी	निरुक्तालोचनम्	विश्वमनीषा दरभंगा	1975
शंकरजी झा	1. व्याकरणतत्वमंजरी (ग्रन्थः)	इशदपुर, मधुवनी	1986
	2. शाब्दबोधेऽभिसहितान्वयान्विताभिधानवादौ	लगमा, दरभंगा	1989
	3. व्याकरणदर्शने सृष्टि, प्रक्रिया	हावड़ा	1986
शशिनाथ झा	1. प्रयोगपल्लवः	दरभंगा	1984
	2. हकारिष्वकार उच्चारणार्थः	विश्वसंस्कृतम् होशियारपुर	1975
	3. धातुसम्बन्धे प्रत्ययाः	लखनऊ अजस्रा	1980
	4. कारप्रत्ययः	लखनऊ अजस्रा	1980
	5. बाह्याभ्यन्तरयोर्यत्नभेदः	शोधप्रभा दिल्ली	1982
	6. पाणिनीयशिक्षाद्वयविवेचनम्	हरिद्वार	1989
	7. महाभाष्यकार पतंजलि	लगमा, दरभंगा	1989
शशिशेखर झा	प्रथमाव्याकरणम्	वाराणसी	1980
शुकदेव झा	1. महाभाष्यादर्श	वाराणसी	1949
	2. वैयाकरणभूषणसारप्रकाशः	वाराणसी	1962
	3. परिभाषेन्दुशेखर प्रश्नोत्तरी	वाराणसी	1962
शोभाकान्त झा	लघुशब्देन्द्रकला	वाराणसी	1988
शोभाकान्त झा	जयदेव 1. परमलघुकला	वाराणसी	1951
	2. भूषणसारकला	वाराणसी	1951
श्रीवर्द्धन ठाकुर	स्फोटस्योदावकः पाणिनिः स्फोटायनोवा	अखिलभारतीय प्राच्यविद्या सम्मेलन	1986
श्रीनारायण मिश्र	1. दुर्घटवृत्तिव्याख्या सम्पादनम्	वाराणसी	1973
	2. काशिका पदमंजरी सम्पादनम्	वाराणसी	1973
	3. सम्पादनम् परिभाषेन्दुशेखर व्याख्या	वाराणसी	1973
	4. ब्रह्मा नवा शब्दानुशासनस्य प्रथमः प्रवक्ता	सारस्वत सुषमा	1971

सतीशचन्द्र झा	1. कात्यायनवार्तिकानां भाषाशास्त्रीमध्ययनम्	मुजफ्फरपुर	1985
	1. वाक्यविचारदृष्ट्या वार्तिकानुशीलनम्	विश्वमनीषा दरभंगा	1981
	2. मुखं व्याकरणं स्मृतम्	दरभंगा	1986
	3. भट्टिकाव्ये स्त्रीप्रत्यय सम्बन्ध वैशिष्ट्यम्	1985	
	4. कात्यायनवार्तिकानां प्रत्यभिज्ञानम्		1985
सदानन्द झा	1. समासशक्तिदीपिका (व्याख्या)	लखनौर मधुबनी	1987
	2. सिद्धान्तकौमुद्या बालमनोरमा तत्वबोधिन्योर्वैमत्यम् (शोधग्रन्थः)	वेंकटेश प्रकाशन नई दिल्ली	1995
	1. पाणिनीय व्याकरणस्यैव-वेदाङ्गत्वम्	विश्वमनीषा दरभंगा	1984
	2. व्याकरणशास्त्रे पक्षताविचारः	लगमा दरभंगा	1989
	3. सिद्धान्तकौमुद्याउद्भवः विकासश्च	रांची	1995
	4. नागेशकृताव्यय विमर्शः	अजन्ना लखनऊ	1996
	5. मनोरमाशब्दरत्न प्रकाशिका विमर्शः	पटना	1998
	6. स्थानिवत्सूत्रेण गतार्थना	दयानन्द वि. वि. रोहतक	1995
	7. शाब्दिकमतेऽपिव्यञ्जन-निवार्या	सरिसव मधुबनी	1999
सुरेश झा	श्लोकसिद्धान्त कौमुदी श्लोकलघुसिद्धान्त कौमुदी (अप्रकाशिता)	वाराणसी	1982
सुभद्रा झा	प्राकृत चन्द्रिका	नई दिल्ली	1962
हर्षनाथ मिश्र	1. परिभाषेन्दुशेखर दुर्गा टीका	नई दिल्ली	1970
	2. चान्द्रव्याकरणस्य समीक्षात्मक-मध्ययनम्	नई दिल्ली	1967

स्वातन्त्र्योत्तरकाले न्यायशास्त्रमधिकृत्य मैथिलानामवदानम्

किशोरनाथ झा

स्वातंन्त्र्योत्तरकालेऽपि न्यायशास्त्रमधिकृत्य मैथिलनैयायिकैर्विहितं चिन्तनं सन्तोषावहं मन्ये। त्रिविधा प्रवृत्तिरेषामस्माकं दृष्टिपथातिथ्यं भजति। तथा हि (1) स्वतन्त्रग्रन्थप्रणयनं (2) रुचिकराणां ग्रन्थानां व्याख्यानं (3) शोधनिवन्ध-प्रणयनं चेति। कदाचिद् भाषान्तरतः संस्कृते अनुवादकार्यमपि सञ्जातमिति पश्यामः। क्रमशः प्रस्तूयते परिचयोऽत्रैषां यथामति।

विद्यावाचस्पतिः शशिनाथ झा

मधुवनीमण्डलस्य ने दीयसि क्रोशमिते दूरे विद्यमानस्य राँटी ग्रामस्य निवासी दरभंगास्थ मिथिलासंस्कृतशोधसंस्थानस्य सम्मानितोऽध्यापकः प्रसिद्धदार्शनिकस्य धर्मदत्त (बच्चा) झाशर्ममहाशयस्य साक्षादन्तेवासी शताव्द्या अस्या पूर्वार्धतोऽधिक-कालं यावद् विद्यमानः विद्यावाचस्पतिः शशिनाथ झा महाशयः नव्यन्याये मौलिकं ग्रन्थं *त्रितलावच्छेदकतावादाभिधं* आचार्योदयनस्य कृत्योः लक्षणावली लक्षणमालयोः व्याख्याञ्च प्रणीय मिथिला संस्कृतशोधसंस्थानतः यथाक्रमं 1954, 1957 ख्रीष्टाब्दयोः प्राकाशयदिति विदितं न्यायशास्त्ररसिकेषु।

यथा प्रासादे द्वित्रास्ततोऽधिका वा तलाः निर्मीयन्ते तथैवावच्छेदकताया अपि त्रयास्ततोऽधिका वा तलाः भवितुमर्हन्ति विवेचनायामिति त्रितलावच्छेदक तावाद-नाम्नस्तात्पर्यम्। तस्मादेवास्य ग्रन्थस्य भूमिकायामवच्छेदकतायाः स्वरूपं प्रकारं प्रयोजनं महत्त्वं वैशिष्ट्यञ्च प्रतिपादयन् लेखकः नीलो घट इत्यस्य वाक्यार्थवोधे त्रितलावच्छेदकतायाः क्रीडां पञ्चाशीतिमितेषु पत्रेषु प्रादर्शयदिति ग्रन्थं वीक्ष्य कोऽपि निमज्जेदाश्चर्य सरसि। विदितमेव नैयायिकानां यदियमवच्छेदकता देशकालधर्मसंसर्गादिभेदेन भिन्नापि प्रतिनियतव्यवहारोपपत्तये नितरामावश्यकी

विलक्षणा च प्रतियोगितानुयोगिता प्रकारतादिभ्यः। न्यायदर्शनस्य महत्त्वपूर्णः सिद्धान्तः कार्यकारणभावः प्रतिवध्य प्रतिवन्धक भावादिश्च नोपपद्यते विनावच्छेदक तयेति ज्ञातमेव विद्यते तद्वित्सु।

यद्यपि शास्त्रार्थसभायां विजिगीषूणामस्त्रस्वरूपस्यात एव प्रतिपक्षिणां दुखबोधाय जटिलवागाडम्बरात्मकस्य गुरुपरम्परा यां विद्यमानस्य त्रितलावच्छेदकतावादस्याविष्कारो नूनं पाण्डित्यस्य प्रकर्षं प्रदर्शयितुमेव विद्यते। गुणकीलनतया प्रसिद्धिरस्य तदानीन्ततेषु नैयायिकसमाजेषु विद्यते स्म। त्रितलावच्छेदकतावाद्स्य तथापि श्लाध्यतां याति सूक्ष्मतम-चिन्तनचमत्कारोऽत्रेति विना विचिकित्सया कोऽप्यभ्युपच्छेत्।

उदयनाचार्यस्य *लक्षणावली* समानतन्त्रस्य वैशेषिकस्य प्रसिद्धानां सप्त पदार्थानां सप्रभेदं लक्षणं प्रस्तौति *लक्षणमाला* च न्यायशास्त्रानुमतानां प्रमाणादि षोडशपदार्थानां सप्रकारं लक्षणमभिलपति। *उभयोरानने झा महाशयेन कृता व्याख्या* व्युत्पन्नानां व्युत्पिसूनां चोपकृत्यै कल्पते। अवधेयं पुनरत्रेदं यत् प्रागियं लक्षणमाला ओरिएन्टल जर्नल इत्यत्र शिवादित्यमिश्रस्य कृतिरूपेण मद्रास' (चेन्नई) नगरतः प्रकाशिताऽभूत्। पश्चादयं झा महाभागः स्वकीयानुसन्धानवलेन मौलिकयुक्तिकदम्वेन चोदयनाचार्यस्य कृतिरूपेणेमां प्रतिष्ठितामकरोदथ च व्याख्यां विधाय प्राख्यापदस्याः समुचितं यथार्थं च महत्त्वम्। तत्त्वानुभूतिः प्रमेति लक्षणमत्रत्यं प्रभायाः दार्शनिकमहाकविना श्रीहर्षेण खण्डनखण्डखाद्ये खण्डितमिति न तिरोहित विद्वल्लोचनेभ्यः स्वगुरूग्रन्थस्य व्युत्पत्तिवादगूढ़ार्थतत्त्वालोकस्य अनेन प्रणीतार्थ दीपिका व्याख्या उक्तसंस्थाया एव (1977 ख्री.) प्रकाशमागता इति त्रयोऽस्य व्याख्याग्रन्था एका च मौलिकी रचना प्रसिद्धयन्ति कीर्तिञ्चाक्षुण्णां दिक्षु प्रसारयन्ति।

नैयायिकः कृष्णमाधव झा

मुम्बईमहानगर्यां वल्लभसंप्रदायस्याचार्याणां गोस्वामिकुलभूषणानां गोकुलनाथजी महाराजश्रीचरणानामश्रितेन महामहोपाध्याययोः फणिभूषण तर्कवागीशवामाचरणभट्टाचार्यमहाशययोरन्यतमेनान्तेवासिना शताब्धा-अस्याः स्तृतीयचरणे यावद् विद्यमानेन नैयायिक मूर्धन्येन कृष्णमाधवझा महाभागेन नव्यन्यायपद्धतिमनुसृत्य प्रणीता अनेकाः कृतयः समक्षमस्माकं विद्यन्ते। यासु धर्मदत्त (बच्चा) झाशर्मप्रणीतस्य सिद्धान्तलक्षण गूढ़ार्थतत्त्वालोकस्य सुबोधिनीव्याख्या महत्त्वमधिकं विमर्ति। प्रथमतो ह्ययमेव गूढ़ार्थतत्त्वालोकममुं व्याख्यातुं प्रावर्तत साफल्यञ्चाध्य गच्छत् इत्यस्य सूक्ष्मचिन्तनरुचिपाटवे न्यायविद्यां

प्रति सहजं प्रेम च प्रकाशितानि भवन्ति। प्रयागस्थ गंगानाथझाकेन्द्रीयसंस्कृत-विद्यापीठत्तः (1982 तमे ख्रीष्टाब्दे) प्रकाशितेयं सुवोधिनी उत्तरप्रदेशसंस्कृतसंस्थानतः सर्वोच्चशङ्करपुरस्कारेण समाजिता सर्वत्र नैयायिकवृन्देन च सामोदं समादृताभूदिति व्याख्याया अस्या महत्त्वमाकल्यते।

कुवलयानन्दस्यालङ्कारलक्षणानि नव्यन्यायरीत्या परिष्कृत्य अलङ्कारविद्योतनं नाम मौलिकं ग्रन्थं प्रणीय कविशेखर पुष्पाञ्जलौ (1974 तमे ख्रीष्टाब्दे) प्राकाशयदयम्। यद्यप्यलङ्कारशास्त्रीयोऽयं ग्रन्थस्तथापि नैयायिका एवात्र ग्रन्थाभिप्रायं तत्त्वतोऽवगन्तुं प्रभवेयुरिति तदुल्लेखोऽत्र नानौचित्यं भजति। सप्तदशशतकीयेन विश्वेश्वराचार्येण अलङ्कारकौस्तुभे मन्ये इदृशीं परम्परां प्राचाल यत् पश्चात् महामहोपाध्यायेन बालकृष्णमिश्रेण मैथिलेन लक्ष्मीश्वरीचरितव्याख्यायां स्वोपज्ञायामनुसृता ततश्चायमत्र प्रभावितः सन् नव्यन्यायरीत्यालङ्कारलक्षणानि पर्यस्करोदिति प्रत्येमि।

पण्डित महेश झा

महामहोपाध्याययोः वामाचरणभट्टाचार्य फणिभूषणतर्कवागीशयोरथ च सर्वतन्त्रस्वतन्त्रस्य पण्डितराजराजेश्वरशास्त्रि द्रविडमहाशयस्यान्तेवासी मधुवनीमण्डलस्य षट्क्रोशमिते दूरे गंगौली नाम्नि ग्रामे लब्धजन्मा विहार प्रान्तीय सुल्तानगञ्जसंस्कृतमहाविद्यालयस्य प्राचार्यः प्रसिद्धपाण्डित्यः महेशझामहाशयः तर्कप्रदीपामिधं मौलिकं ग्रन्थं निर्माय (1978तमे ख्रीष्टाब्दे) दरभंगास्थ मिथिलासंस्कृतशोधसंस्थानतः प्राकाशयत्। सन्त्यत्र नवतितमप्रकरणानि, येषु षट्त्रिंशदधिकद्विशतमिताः विचार्यविषयाः सविशेषमालोचिताः। तर्कगादाधरी विद्यते ग्रन्थस्यास्याधार उपजीव्यो वा। अतएव तत्रत्याः विषयाः अध्यापनसरण्या तथोपपादिताः यथा जिज्ञासूनामल्पायासेन बोधगम्या भवेयुमृत्यस्य ग्रन्थस्य वैशिष्ट्यं महत्त्वञ्चाकलनीयम्। तर्कमधिकृत्य प्राचीननवीनाचार्ययोः समग्रं चिन्तनं तर्कस्य स्वरूपं प्रकारः प्रयोजनं महत्त्वञ्चेत्यादि सर्वं सोदाहरणं सोपपत्तिकं चात्र साधु संकलितं समालोचितञ्चेत्यस्य उपादेयत्वं निर्विवादं सिद्ध्यति। तस्मात् लेखकस्यावदातं गम्भीरतमं च वैदुष्यं सर्वथाभ्युपगन्तव्यम्।

नैयायिकः रूपनाथ झा

नवद्वीपतः नव्यन्यायमधीत्य 'मिथिलायां नैयायिकश्रेष्ठतया प्रतिष्ठितस्य नीलाम्बरझामहाशयस्य तनूजन्मा दरभंगामण्डलस्थित •उजानग्रामवासी काश्यां महामहोपाध्याययोः फणिभूषणतर्कवागीशवामाचरणभट्टाचार्ययो श्चान्तेवासी

बिहारप्रान्तीयराजकीयमहाविद्यालये न्यायाध्यापकः रूपनाथझामहाभागः गादाधर्याः सामान्यनिरुक्ते सुबोधां विमलप्रभामिधां व्याख्यां विधाय दरभंगास्थ मिथिलासंस्कृत-शोधसंस्थानतश्च 1966 तमे ख्रीष्टाब्दे प्रकाश्य महद्‌यशः समुपार्जयत् उत्तरसाधकानामुपकारेण सह स्वकीयं वैदुष्यमपि सफलयां चकार। सुबोधया ध्यापनसरण्या सरलया भाषया च ग्रन्थाभिप्रायं बोधयितुं बद्धपरिकरोऽपि व्याख्याकृदत्र सत्यवसरे निर्मलां गभीरां सम्प्रदायानुमतां च विवेचनां पुरस्करोति इति न भवति गतार्थेयं पूर्वजकृतव्याख्याभ्य इत्यवधेयम्।

पण्डित उग्रानन्द झा

मधुबनीमण्डलस्य ककरौड ग्रामे लब्धजन्मना मैथिलपण्डित पुण्डरीक मार्तण्डस्य महामहोपाध्यायबालकृष्णमिश्रस्यान्तेवासिना वाराणसीस्थ श्यामा महाविद्यालयस्य प्रधानाध्यापकेन अस्याः शताब्द्याः पूर्वार्धतोऽधिकं कालं यावद् विद्यमानेन प्रसिद्धन्यायपाण्डित्येन उग्रानन्दझाशर्मणा व्युत्पत्तिवादस्य तरणी व्याख्या निर्मिता वाराणसीस्थ चौखम्बासंस्कृतसिरीजसंस्थातः 1972 तमे ख्रीष्टाब्दे प्रकाशिता जिज्ञासूनां धीधनानां चोपकारिका सती व्याख्यातुरसाधारणं न्यायपाण्डित्यं प्रकाशयति।

नैयायिकः खङ्गनाथमिश्रः

मधुबनीमण्डलस्य पूर्वस्यां दिशि षट्क्रोशपरिमिते दूरे लालगञ्ज नाम्नि ग्रामे लब्धजन्मा प्रथममुदयपुरनगरीये महाराणासंस्कृतमहाविद्यालये पश्चात् जयपुरे महाराजा संस्कृतमहाविद्यालये प्राचार्यवरः धर्मदत्त (बच्चा) झा महाभागानां प्रधानशिष्येष्वन्यतमस्य षष्ठीनाथमिश्रस्य तनूजन्मा शिष्यश्च नैयायिकश्रेष्ठः शताब्द्या अस्याश्चतुर्थचरणं यावद् विद्यमानः खङ्गनाथमिश्रः ग्रन्थद्वयं शाब्दबोधादि-पञ्चकप्रकाशे सिद्धान्तलक्ष्मणतत्त्वालोकप्रकाशञ्च मौलिकमेकमपरञ्च व्याख्यात्मकं प्रणीय यथाक्रमं (1990, 96 ख्रीष्टाब्दयोः) जयपुरस्थ केन्द्रीयसंस्कृत- विद्यापीठतः राजस्थानविश्वविद्यालय जयपुरतश्च प्राकाशयदिति प्रमोदस्य विषयः।

प्रथमे ग्रन्थेपञ्चविषयाः प्राधान्येन द्वौ चानुषङ्गतः इति संकलनया सप्तविषयाश्चिन्तिताः सपरिष्कारम्। तथाहि वैयाकरणमीमांसकनैयायिकानां दृष्टयः शाब्दबोधमधिकृत्य प्रदर्शिताः सरलया सुबोधया च भाषया न्यायमतं च प्रतिष्ठापितं सिद्धान्तरूपेण। आख्यातवादे गंगेशोपाध्याय रघुनाथ शिरोमण्योः ग्रन्थयोर्व्याख्यानं विहितम्। विधिव्याप्तिग्रहोपायवादौ च गंगेशोपाध्यायस्य व्याख्यातौ।

कारणतावादमधिकृत्य जगदीशभट्टाचार्य महादेवपुणतामकर राजेश्वरशास्त्रिमहाभागानां मतैः साकं स्वकीयमभिप्रायमपि वैशद्येन विवेचितम्। अनुषङ्गतश्चात्रान्वितभिधानाभिहितान्वयवादौ द्वितीयार्थकर्मत्वञ्च परिष्कृत्य पुरस्कृतानि। अपरस्तु बच्चाझामहाभागस्य तत्त्वालोकमधिकृत्य प्रस्तुतं व्याख्यानम्।

पण्डित नन्दिनाथ मिश्रः

नव्यन्यायेऽनुमानखण्डस्य क्रोऽपत्ररूपां गंगानिर्झरिणीं व्याख्यां निर्माय विख्यातस्य वाराणस्यां न्यायाध्यापने लब्धकीर्तेः शिवदत्तमिश्रमहाभागस्य कृतविद्येनान्तेवासिना प्रसिद्धमैथिलदार्शनिकशङ्करमिश्रस्य वंशधरेण वाराणसीस्थ-श्यामामहाविद्यालयस्य न्यायाध्यापकेन मधुबनीमण्डलान्तर्गत लालगञ्जग्रामवासिन नन्दिनाथमिश्रमहाशयेन नव्यन्यायमधिकृत्य न्यायनिबन्धावली विरचिता शारदा-लाइब्रेरीवाराणसीतः 1950 तमे ख्रीष्टाब्दे प्रकाशमागता सा। छात्राणामुपकृत्यै अत्राष्टौ निबन्धाः संकलिताः विद्यन्ते येषु प्राचीननवीनमध्यमाचार्याणां मतानिसम्यगालोच्य सिद्धान्ता साधूपपादिता इति निबन्धानां प्रामाणिकतायां नौदति संशीतिलवोऽपि।

एते पुनर्निबन्धा नामभिर्विषयस्य प्रत्यक्षकरणत्वविचारः, पाकजविचारः द्वित्वाद्यपेक्षाबुद्ध्योः कार्यकारणभावविचारः, रूपादेर्व्याप्यवृत्तित्वाव्याप्यवृत्तित्व विचारः, चित्ररूपविचारः, प्रभावाष्पयोः प्रत्यक्षताविचारः, विषयनिष्ठदोष-प्रतिबन्धक भावविचारः, वेगनाश्यनाशकभावविचारश्चेति सन्ति प्रसिद्धाः।

अखिलभारतीयप्राच्यविद्यासम्मेलनस्य चतुर्दशतमे दरभंगाधिवेशने प्रथमाविचारमधिकृत्य लिखितो निबन्धः वैदुष्यपूर्णस्तदीयविभागीय पण्डित परिषदि पठित आलोचितः प्रशंसतिश्चः।

डॉ. काशीनाथ मिश्रः

प्रख्यात नैयायिकस्य सदानन्दझामहाशयस्य प्रमुखः शिष्यः पटना विश्वविद्यालयस्य संस्कृतविभागीयाध्यक्षपदतः प्राप्तऽवकाशः, दरभंगास्थमिथिला-संस्कृतशोधसंस्थानतः पूर्वनिदेशकः सम्प्रति कामेश्वरसिंह दरभंगा संस्कृत-विश्वविद्यालयस्य कुलपतिः विद्वद्वरेण्यस्य धर्मशास्त्रपटीयसः गङ्गाधरमिश्रस्य तनूजः सहर्षामण्डलान्तर्गत च यनपुरग्रामवासी डॉ. काशीनाथ मिश्रः न केवलमुच्चतम-कक्षाध्यापने पटीयानपि तु ग्रन्थलेखनेऽपि निपुणतमः। साहित्यअकादमीदिल्ली-संस्थातः प्रकाशिता कृतिरस्य उदयनाचार्य नाम्नी न्यायशास्त्रे पाण्डित्यप्रकर्षं प्रकाशयति। अत्रात्मतत्त्वविवेक न्यायकुसुमाञ्जल्योः सर्वेऽपि विषयाः समासेन

विवृताः सरलयासरण्य तादृश्या भाषया सालोचनम्। उभयत्र ज्ञानश्रीमित्रप्रभृतिभिः धर्मकीर्तिमतप्रतिष्ठापनपरैबौद्धाचार्यैः विहितानामाक्षेपाणां निराकरणाय आचार्योदयनस्य न्यायमतसंरक्षणाय पराक्रमः विद्वत्सु प्रसिद्ध एव। तत्रापि विकल्पजालोत्थापनेन परमतेषु दोषं प्रदर्श्य न्यायमतप्रतिष्ठा कियत्काठिन्यं बिभर्ति इति नतिरोहितं तद्वित्सु। तत्र स्वशैल्या विषयाणां सालोचनं विवरणं किं विना पाण्डित्येन संभवति।

पण्डित श्याम सुन्दर झा

'सूरतनगरनिवासिनां वल्लभसम्प्रदायस्याचार्याणामाश्रितः ठाढीग्राम वासिनां प्रसिद्धनैयायिकानां विश्वनाथझाशर्मणां शिष्यपरम्परायां विद्यमानः पण्डितश्यामसुन्दरझा मधुवनीमण्डलान्तर्गत साडीब्रह्मपुरग्रामवासी व्याप्तिपञ्चक माथुरीजागदीश्योः सिंहव्याघ्रलक्षणजागदीश्याश्च चन्द्रिका नाम्नीं व्याख्यां विरच्य वाराणस्याः चौखम्वासंस्कृतसिरीजतः (1957 ई.) प्राकाशयत्। व्याख्येयं छात्राणामत्र प्रवेशसौलभ्याय सोपानायमाना पंक्त्यक्षरावबोधाय तत्परा विषयस्थलेषु लक्ष्यलक्षण-संघटन पथोपदर्शन पुरस्सरा नातिविस्तरा नातिसंक्षिप्ता च यावदुक्तो-पपन्नात्मनश्चन्द्रिका सञ्ज्ञामन्वर्थयति।

रामचन्द्रमिश्रः

विद्यावाचस्पतिः महाकविश्च रामचन्द्रमिश्रः साहित्यविद्याध्यापने लब्धयशाः विहारप्रान्तीयराजकीयमहाविद्यालयेषु लब्धाध्यापनावसराः जगदीशभट्टाचार्यस्य तर्कामृतं शिष्योपकाराय संस्कृते व्याख्यातवान्। वाराणस्याः चौखम्वासंस्कृतसिरिज् संस्थातः 1965 खीष्टाब्दे प्रकाशिताभूत सा।

रामचन्द्र झा

अयं वैयाकरणः दरभंगामण्डलान्तर्गततरुवनीग्रामवास्तव्यः पण्डित महेशझा-शर्मणश्छात्रः काश्यां जीवनयापनं विदधन् तर्कसंग्रहस्य व्याख्यामकरोत् 1965 खीष्टाब्दे उक्त चौखम्वासंस्थातः प्रकाशमागच्छत्सेति ज्ञेयम्।

डॉ. उमारमण झा

लखनऊ नगरीयकेन्द्रीयसंस्कृतविद्यापीठस्य प्राचार्यः न्यायशास्त्रस्य लब्धप्रतिष्ठो विद्वान् डॉ. उमारमणझामहोदयः भासर्वज्ञाचार्यस्य न्यायसारमधि-कृत्यालोचनात्मकं प्रबन्धं न्यायसारविचारामिधं प्रणीतवान् प्रकाशयञ्च जम्मूनगरीय रणवीरकेन्द्रीय संस्कृतविद्यापीठितः 1982तमे खीष्टाब्दे। अनेन तर्कप्रवेशामिधं

के.सी.वरदाचार्यकृतस्य इन्ट्रोडक्सन टूलौजिक इत्यस्यानुवादकार्यमपिविहितं यत् उपर्युक्त विद्यापीठतः 1987 ख्रीष्टाब्दे प्रकाशितम्।

डॉ. किशोरनाथ झा

पंक्तेरस्या लेखकस्तु किशोरनाथ झा प्रसिद्ध नैयायिकस्य प्रो. अनन्तलाल ठाकुरमहाभागस्य पितुश्च कृष्णमाधवझाशर्मणोऽन्तेवासी न्यायदृष्टया आत्मवादानुचिन्तनं नाम मौलिकं प्रबन्धं प्रणीय दिल्लीस्थनागप्रकाशनतः (1993 ख्री.) प्राकाशयत्। अत्र न्यायसूत्रमारभ्य आत्मतत्त्वविवेकं यावत् अध्यात्मवादं समागतानां विचाराणां सङ्कलनमालोचनं चैतिहासिकशास्त्रीय दृष्टिभ्यां विहितं, कालक्रमेण सिद्धान्तानां पल्लवनप्रदर्शने पूर्वोत्तरपक्षाभ्यां प्रस्तुतौ प्रतिस्पर्धिनां बौद्धाचार्याणां मतान्यपि समीक्षितानि संक्षेपेण दर्शनान्तर सिद्धान्ता अति संगृह समालोच्य सन्निवेशिताः तेन पूर्णाङ्गतां याति विषयः, अस्य समीक्षा नागपुरवासिना नैयायिकवरेण्येन प्रो. नारायणशास्त्रीद्रविड महाशयेन हंसवृत्त्या विहिता भारतीया दार्शनिकानुसन्धानपरिषदः शोधपत्रिकायां प्रकाशिता च विद्यते।

न्यायशास्त्रानुशीलनेऽस्य विभिन्नासु शोधपत्रिकासुप्रकाशितानां पञ्चदश निबन्धानां संकलनं विद्यते। प्राचीन न्यायपरम्परायां पूना विश्वविद्यालये प्रदत्तानां भाषणानां संकलने विद्यत इत्यप्यवधेयम्।

अधुनाः निबन्धलेखकेषु प्रतिष्ठितानां नैयायिकानां नामानिनिर्दिश्यन्ते येषां निबन्धविवरणं विवृतमधस्ताद् यथानिर्देशम्। तथाहि न्यायशास्त्र निष्णाताः कृष्णमाधवक्तारामसेवकझा, महेशझा, दुर्गाधरझा, आनन्दझा, खड्गनाथमिश्र, शोभितमिश्र, अनिरुद्धमिश्र, श्रीनारायणमिश्र, सुखेश्वरझा, रामजी ठाकुर, बाबूमिश्र, भगीरथमिश्र, बौआनन्दनझा, फूलकुमारझा, बुद्धिनाथझा, कृष्णमाधवझा, शोभाकान्त जयदेव झा, किशोरनाथ झा, कीर्त्यानन्द झा प्रभृतयः विभिन्नासु शोध पत्रिकासु स्वकीयं वैदुष्यपूर्णं निबन्धं प्रणीय प्राकाशयन्।

कृष्णमाधव झा

अयं हि अखिलभारतीयप्राच्यविद्यासम्मेलनस्य चतुर्दशतमे दरभंगाधिवेशने (1948 ख्रीष्टाब्दे) नव्यन्यायरीत्या त्रीन् निबन्धान् प्रस्तौत् येषां विवरणं तदीयसारसंग्रहे समुपलभ्यते। ते च (1) अभाव विचारः (2) कर्मानुक्तत्व विचारः (3) काव्यलक्षणविचारः। सम्मेलनस्य विभागीय सदस्सु पठिताः समीक्षिताः प्रशंसिताश्चैते इति कर्णपरम्परयावगतमस्माभिः।

(क) राम सेवक झा—अध्यक्षः कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयीय दर्शनविभागस्य चत्वारोऽस्य सन्ति निवन्धा स्ते यथा

1. कुतो बाधान्तो न्यायः पण्डितपत्रिका 1974 पृ. संख्या नैवास्ति ज्ञाता।
2. व्यधिरणधर्मावच्छिन्नाभाव प्रतियोगिता AIOC (1968) वाराणसी अधिवेशनम् !
3. प्रमात्वं परतो ग्राह्यम् विश्वमनीषा (10-2) 1986 ई. पृ. 1-5, दरभंगा।
4. समासशक्ति विचारः विश्वमनीषाः (11) 1989 ई. पृ. 64-71, दरभंगा।

(ख) महेश झा—तर्कप्रदीपस्य लेखकः

एक एव निवन्धोऽस्य समुपलभ्यते

(1) तर्कनिर्वचनम् मिथिलासंस्कृतशोधसंस्थानदरभंगा पत्रिका (बुलेटिन ऑफ एम. आर. आई.) 2/1 (1966 ई.) पृ. 87-93

(ग) दुर्गाधरझा हिन्दी रूपान्तरकृत् न्यायलीलावत्याः न्यायकुसुमाञ्जलेः न्याय कन्दल्याश्च प्रसिद्धपारिडत्यः

अस्य द्वौ निवन्धौ उपलभ्येते

1. विभागजो विभागः मिथिला संस्कृतशोधसंस्थानपत्रिका दरभंगा बुलेटिन ऑफ एम. आर. आई खण्डः 4-6 द्वि. भा. 1970 ई. प्र. 85-89
2. सविकल्पकप्रत्यक्षस्यापि प्रामाण्यम्

वाराणसी सारस्वतीसुषमा खण्डः 17, 3-4, पृ. 403-406

(घ) आनन्द झा लखनऊ विश्वविद्यालयस्य प्राच्यविद्याविभागे न्यायाध्यापक आसीत्। अस्य द्वौ निवन्धौ सारस्वतीसुषमा पत्रिकायां यथासमयं प्रकाशितौ

(1) माताधीनामेयसिद्धिः एकादशखण्डः सारस्वतीसुषमा भागः 3-4 पृ. 180-185

(2) समवायखण्डनखण्डनम् सप्तदशखण्डः सैव भाग 3-4 पृ. 393-401

(ङ) खड्गनाथमिश्रःशाब्दबोधादिपञ्चकप्रकाशस्य प्रणेता प्रसिद्ध नैयायिकः।

(1) अनेन लिखितः निवन्धः उदयनस्येश्वरविचारः सारस्वतकुसुमाञ्जलौर् डॉ. जयमन्तमिश्रअभिनन्दनग्रन्थे, दरभंगा तः प्रकाशितः 1994 खीष्टाब्दे।

(च) शोभितमिश्रः स्वसमयस्य प्रसिद्धतम् आसीद् विद्वान्। अस्य निवन्धः

(1) मानाधीनामेयसिद्धिः वाराणसीतः प्रकाशितायां सारस्वती सुषमायां एकादशखण्डस्य तृतीय चतुर्थ भागे 186-189 पृष्ठेपु प्रकाशितः।

(छ) अनिरुद्धमिश्रः, मिथिलायां प्रसिद्धतमस्य तरौनीग्रामस्यनिवासी द्वौ शोधनिबन्धौ विलिख्य मिथिलासंस्कृतशोधपत्रिकायां सारस्वती सुषमायां प्राकाशयत्।

(1) परमाणुविचारः मिथिलासंस्कृतशोधसंस्थापत्रिका (बुलेटिन ऑफ एम. आर. आई दरभंगा) 1967 तृतीय खण्डस्य द्वितीय भागः पृ. 93-98।

(2) मानाधीना मेयसिद्धिः सारस्वती सुषमा 1971 पृ. सं. अज्ञात

(ज) श्रीनारायणमिश्रः बनारसहिन्दूविश्वविद्यालये संस्कृतविभागाध्यक्षः अनेकेषां ग्रन्थानां लेखकः सम्पादकश्चाध्यापने लब्धयशाः। अस्य निवन्धद्वयं प्रकाशितमुपलभ्यते।

(1) न्यायवैशेषिक प्रतिपादिताः बौद्धसिद्धान्ताः मिथिलासंस्कृतशोध संस्थान पत्रिका (बुलेटिन ऑफ एम. आर. आइ.) दरभंगा 1970 ई. खण्डे 4-6 द्वि भागे पृ. 108-117,

(2) श्रीवासाचार्य उदयनाचार्येण संबन्धश्च सारस्वतीसुषमा वाराणसी 1972 ई. पृ. से. अज्ञातं

(झ) सुखेश्वर झा, भागलपुरविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरे[illegible] एकं निबन्धं प्राकाशयत् वाराणस्यां सारस्वतीसुषमायाम्।

(1) न्यायवैशेषिकयोर्भेकदकतत्त्वम् सारस्वतीसुषमा पञ्चदशखण्डस्य 1-4 भागः पृ. 311-318

(ञ) रामजी ठाकुर, एल.एन.मिथिलाविश्वविद्यालयस्य रीडर पदतो प्राप्तावकाशः एकं न्यायसंबंधितलेखं पं. गोविन्द झा अभिनन्दनग्रन्थे 1997 तमे वर्षे प्राकाशयत् तद्ग्रन्थ पृष्ठ संख्या 56-58

(1) निवन्धस्तु मिथिलया नैयायिको गोविन्द ठक्कुरः

(ट) श्रीबाबूमिश्रः प्रसिद्ध पाण्डित्यः मिथिलासंस्कृतशोधसंस्थानस्य दरभंगास्थस्य लब्धप्रतिष्ठोऽध्यापकः निबन्धद्वयं व्यरचयत्

(1) न्यायशास्त्रतात्पर्यम् विश्वमनीषा (2191) 1975 पृ. 7-15

(2) व्युत्पत्तिवादगूढार्थतत्त्वालोक सारांशः 1977 ई. व्युत्पत्तिवाद गूढार्थतत्त्वालोकस्यार्थ दीपिकाव्याख्यायाः सम्पादनावसरे लिखिता भूमिकेयं नितरां व्युत्पादिका।

(ठ) भगीरथमिश्रः कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयस्य दर्शनाविभागेऽध्यापकश्चतुरः निबन्धान् विलिख्य विश्वमनीषा पत्रिकायां प्रकाश्यत्।

(1) जन्मान्तरम् दरभंगातः प्रकाश्यमाना विश्वमनीषा (913) 1975 ई. पृ. 34-37

(2) न्यायदृष्ट्यावेदप्रामाण्यम्, विश्वमनीषा (1-4) 1977 ई., पृ. 21-23।

(3) परमाणोः सावयवत्त्व खण्डनम्, विश्वमनीषा (4-3) 1978 ई. पृ. 60-64।

(4) भारतीयदर्शनेऽवयवाः विश्वमनीषा (5-1) 1981 ई. पृ. 26-30।

(ङ) बौआनन्दझा कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालये न्यायाध्यापकः

(1) ईश्वरसिद्धिविषयमादाय निवन्धमेकं विम्श्वमनीषा प्राकाशयत् विश्वमनीषा (दरभंगा) (11-1) 1989 पृ. 54-63

(ढ) फूलकुमारझानामा नैयायिकः दरभंगा विश्वविद्यालयीयः निबन्धमेकं प्राकाशयत्

(1) वैशेषिकमतविवेचनम्, विश्वमनीषा (6/4) 1983ई. पृ. 52-54

(ण) बुद्धिनाथझा नामा नैयायिकः विश्वमनीषायां निबन्धमेकं प्राकाशयत् न्यायविद्या, विश्वमनीषा (1/1)1974 ई. पृ. 14-16।

(त) शोभाकान्त जयदेवझादरभंगास्थ मिथिलासंस्कृतशोधसंस्थानस्य लब्ध प्रतिष्ठोऽध्यापकः अखिलभारतीयप्राच्यविद्यामहासम्मेलनस्य चतुर्दशतमे दरभंगाधिवेशने 'समासशत्तय भाव विमर्श' विषयकं निबन्धं प्रापैषीत् तत्रत्य शोधसार ग्रन्थे समुपलभ्यते।

(थ) कीर्त्यानन्दझामहाशस्य लब्ध यशसोऽध्यापने निबन्धमेकं सागरिका पत्रिकायां प्रकाशितमपश्यम् विवरणं न स्मरामि

(1) प्रत्यक्षतत्त्वविमर्शः सागरिका 1987

(2) व्युत्पत्तिवादगूढार्थतत्त्वालोकस्य सम्पादनावसरे लिखिता भूमिका नितरां व्युत्पादिका पाण्डित्य प्रकर्षमस्य विद्योतयति।

(द) किशोरनाथझागंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठे कार्यरतः प्राचीनन्याय-मधिकृत्यत्रिंशत्तोऽप्याधिकान् निबन्धान् विलिख्य प्राकाशयत् न्यायशास्त्रानुशीलने प्राचीनन्यायपरम्परायां च द्रष्टव्यम्

(1) प्रमाणैरर्थपरीक्षणम् दरभंगास्थ विश्वमनीषायां (213) 1985 ई., पृ. 42-64 प्रकाशितम्। इति यथामति प्रयासेन संकलितं विवरणम् प्रस्तुतम्।

परिशिष्टम्

ग्रन्थः—*त्रितलावच्छेदकतावादः*
लेखक :—शशिनाथ झा
प्रकाशन स्थानम्—मिथिलासंस्कृतशोधसंस्थानम् दरभंगा (विहार)
प्रकाशन वर्षम्—1954 ई.

ग्रन्थः—*लक्षणमालाव्याख्या*
लेखकः—शशिनाथ झा
प्रकाशन स्थानम्—मिथिलासंस्कृतशोधसंस्थानम् दरभंगा (बिहार)
प्रकाशन वर्षम्—1957 ई.

ग्रन्थः—*लक्षणावली व्याख्या*
लेखकः—शशिनाथ झा
प्रकाशन स्थानम्—मिथिलासंस्कृतशोधसंस्थानम्, दरभंगा (विहार)
प्रकाशन वर्षम्—1957 ई.

ग्रन्थः—*गूढ़ार्थ तत्त्वालोकार्थ दीपिका*
लेखकः—शशिनाथ झा
प्रकाशन स्थानम्—मिथिलासंस्कृतशोधसंस्थानम् दरभंगा (बिहार)
प्रकाशन वर्षम्—1977

ग्रन्थः—*सिद्धान्तलक्षण सुबोधिनी*
लेखकः—कृष्णमाधव झा
प्रकाशन स्थानम्—गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्, इलाहाबाद
प्रकाशन वर्षम्—1982

ग्रन्थः—*अलङ्कार विद्योतनम्*
लेखकः—कृष्णमाधव झा

प्रकाशन स्थानम्–कविशेखर अभिनन्दनग्रन्थप्रकाशनसमितिः दरभंगा .
प्रकाशन वर्षम्–1974 ई.

ग्रन्थः–*तर्कप्रदीपः*
लेखक ः–महेश झा
प्रकाशन स्थानम्–मिथिलासंस्कृतशोधसंस्थानम्, दरभंगा (बिहार)
प्रकाशन वर्षम्–1978

ग्रन्थः–*सामान्यनिरुक्तिव्याख्याविमलप्रभा*
लेखकः–रूपनाथ झा
प्रकाशन स्थानम्–मिथिलासंस्कृतशोधसंस्थानम्, दरभंगा (बिहार)
प्रकाशन वर्षम्–1966 ई.

ग्रन्थः–*व्युत्पत्तिवादस्य व्याख्या तरणी*
लेखकः–उग्रानन्द झा
प्रकाशन स्थानम्–चौखम्बा संस्कृत सिरीज
प्रकाशन वर्षम्–1972 ई.

ग्रन्थः–*सिद्धान्तलक्षणगूढार्थतत्त्वालोकप्रकाशः* (व्याख्यात्मकः)
लेखकः–खड्गनाथ मिश्रः
प्रकाशन स्थानम्–राजस्थान विश्वविद्यालयस्य जयपुरस्य दर्शन विभागः
प्रकाशन वर्षम्–1996

ग्रन्थः–*शाब्दबोधादिपञ्चकप्रकाशः* (मौलिकः)
लेखकः–खड्गनाथ मिश्रः
प्रकाशन स्थानम्–जयपुरस्थितं केन्द्रीय संस्कृत विद्यापीठम्
प्रकाशन वर्षम्–1990

ग्रन्थः–*न्यायनिबन्धावली* (मौलिको ग्रन्थः)
लेखकः–नन्दिनाथ मिश्रः
प्रकाशन स्थानम्–शारदालाइब्रेरी वाराणसी
प्रकाशन वर्षम्–1950

ग्रन्थः—*उदयनाचार्यः* (मौलिको ग्रन्थः)
लेखकः—डा. काशीनाथ मिश्रः
प्रकाशन स्थानम्—साहित्य अकादमी दिल्ली,
प्रकाशन वर्षम्—1996

ग्रन्थः—1. *व्याप्तिपञ्चकस्य जागदीशी माथुरी व्याख्यायोश्चन्द्रिका व्याख्या*
2. *जागदीशीसिंहव्याघ्रलक्ष्मणस्य चन्द्रिका*
लेखक :—श्याम सुन्दरझा
प्रकाशन स्थानम्—चौखम्वा संस्कृत सिरीज वाराणसी
प्रकाशन वर्षम्—1957

ग्रन्थः—*तर्कामृतव्याख्या*
लेखकः—रामचन्द्रमिश्र
प्रकाशन स्थानम्—चौखम्वा संस्कृत सिरीज वाराणसी
प्रकाशन वर्षम्—1965

ग्रन्थः—तर्कसंग्रहव्याख्या
लेखक :—रामचन्द्र झा
प्रकाशन स्थानम्—चौखम्बा संस्कृत सिरीज वाराणसी
प्रकाशन वर्षमुः—1965

ग्रन्थः—*न्यायसारविचारः* (मौलिकः)
लेखक :—डॉ. उमा रमणझा
प्रकाशन स्थानम्—रणवीरकेन्द्रीयसंस्कृतविद्यापीठं, जम्मू
प्रकाशन वर्षम्—1982

ग्रन्थः—*तर्क प्रवेश* (अनुवादः)
लेखक (अनुवादक) :—डॉ. उमा रमणझा
प्रकाशन स्थानम्— रणवीरकेन्द्रीयसंस्कृतविद्यापीठम्, जम्मू
प्रकाशन वर्षम्—1987

ग्रन्थः—*न्यायदृष्ट्या आत्मवादानुचिन्तनम्* (मौलिकम्)
लेखक :—किशोरनाथझा
प्रकाशन स्थानम्—नागप्रकाशन दिल्ली

ग्रन्थः—*न्यायशास्त्रानुशीलनम्*
लेखकः—किशोरनाथझा
प्रकाशन स्थानम्—इलाहाबाद स्वयं लेखकः
प्रकाशन वर्षम्—1998 ई.

ग्रन्थः—*प्राचीनन्यायपरम्परा*
लेखकः—किशोरनाथझा
प्रकाशन स्थानम्—CASS, Poona
प्रकाशन वर्षम्—1999 ई.

भारतस्य स्वतन्त्रताया अनन्तरं मिथिलायां संस्कृते सांख्ययोगयोः रचना

कृष्णानन्द झा

मिथिलाया, ज्ञानविज्ञानयोर्विषयभूतासू विविधासु विद्यासु विशेषेण दर्शनविद्यासु महती प्रसिद्धिरस्तीति नाविदितं विदुषाम्। अत्र जाता विद्वद्विभूतयः संस्कृतभाषया महत्त्वपूर्णानि ग्रन्थरत्नानि अनुसन्धानपरान् निबन्धाँश्च दर्शनविषये व्यरीरचन्। तत्र सांख्ययोगशास्त्रयोरपि कृतभूरि परिश्रमा योगिनोऽत्र बभूयरिन्युपनिषत्पुराणस्मृति-ग्रन्येभ्यो विज्ञायते। योगतत्त्वविदां राज्ञां महर्षीणाञ्च वर्णनमुपनिषदादिषूपलभ्यते। तथा च 'बृहदारण्यकोपनिषदि' जनक याज्ञवल्क्यप्रसङ्गः—

"जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे, तत्र ह कुरुपाञ्चालानां ब्राह्मणा अभिसमेता बभवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कः स्विदेषां ब्राह्मणाना-मनूचीनतम इति"[1] इत्यादि।

'बृहद्विष्णुपुराणे' मिथिलामाहात्म्ये—
राजानश्च महाभागा ज्ञानविज्ञानदर्शनाः।
जीवन्मुक्ता विदेहाश्च देहवन्तो विचक्षणाः[2]।।

'याज्ञवल्क्य स्मृतौ' आचाराध्यायोपक्रमे—
योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन्।
वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः।।
मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाऽब्रुवीन्मुनीन्[3]।।

तत्र भारतस्य स्वतन्त्रताया अनन्तरं मिथिलाया विद्वद्वर्यैः सांख्ययोग-

1. बृ. उप. 3/1/1//
2. बृ. वि. पु. मि. मा. 14/64
3. या. स्मृ. 1/1, 2

दर्शनयोर्विहितानां प्रकाशितानाञ्च ग्रन्थानां निवन्धानाञ्च सङ्कलनस्य प्रसङ्गे यथोपलब्धं केषाञ्चन ग्रन्थानां महत्त्वपूर्णानामनुसन्धानपूर्णप्रबन्धानाञ्च विवरणमिहोपस्थाप्यते। संस्कृतभाषानिवद्धशास्त्राणां यद्यपि संस्कृतभाषया मुख्यतयाविवेचना प्रचलिताऽस्ति तथापि स्वतन्त्रता प्राप्तेरनन्तरं क्रमशो भाषान्तरेषु अपि तद्विवेचना प्रारव्धा मनीषिभिः। सांख्ययोगयोरपि मिथिलाया मनीषिणां मैथिलीहिन्दीप्रभृतिषु भाषासु विषयाणां विवेचना विहितोप लभ्यते।

अत्र विशिष्ट ग्रन्थेषु 1952 ई. वर्षे दरभंङ्गातप्रकाशिता पण्डितप्रवरक्षेमधारिसिंहशर्मणाविरचिता *सांख्यरवद्योतिका* विराजते। महर्षिकपिल प्रणीतेषु सांख्यसूत्रेषु बहुनि आख्यायिका सूत्राणि विलसन्ति, येषु दार्शनिक विषयाणां सरलसरण्याऽवबोधाय तत्सम्वद्धा तत्सदृशी आख्यायिका पुराकथा संकेतिताऽस्ति। तासामाख्यायिकानां प्रतिपादनं तत्सम्वद्धविषयबोधनञ्चास्मिन् ग्रन्थे विहितमस्ति तत्रदिङ्मात्रमुदाह्रियते—

(क) "निराशः सुखी पिङ्गलावत्"[4] (सां. सूत्रम) अस्य व्याख्यानम्। यथा—"आशा हि दुःखमूलम्। अतएव तत्त्वजिज्ञासुभिर्निराशैर्भाव्यम्। यथा पिङ्गलानाम्नी काचिद् वेश्या प्रणयि प्रतीक्षायां प्रतिरात्रं चिररात्राय निद्रान्न लेभे। कदाचित् सा तत्पक्षतो निवृत्ता सुखं सुपृवती।

(ख) "अनारम्भेऽपि परगृहे सुखी सर्पवत्[5]" (सा. सू.) .अस्योपपादनम् —"गृहरचनामन्तरेणापि सुखित्वं सूचैणा नेन समर्थ्यत। विरक्तभावेन विचरणेऽपि सुखमस्त्रीति गृहरचनानिरपेक्षः सर्प उदाहरणरूप उपन्यस्तो य पर गृहेऽपि सुखी निवसति।

योगिवैद्यविभूषणपण्डितप्रवरठक्कनझाशर्मणा विरचिता डॉ. किशोरनाथझा, डा. भक्तिकरझा महानुभावाभ्यां सम्पाद्य 1989 ई. वर्षे प्रकाशिता 'योग रत्नावली' द्वितीयाऽप्यद्वितीया कृतिरस्ति। तत्र चतुस्सपृतिः कारिकाः सन्ति तद्विवरणमपि स्वतन्त्रेन कृतमस्ति। अत्र प्रथमेगुच्छके 14 कारिकाः सन्ति। तत्र मङ्गलाचरणपूर्वकं योगस्वरूपप्रकारप्रयोजनानि निरूप्य यमनियमयोनिरूपणं विहितमस्ति ग्रन्थ

---

4. सां. सू. 4/11
पिङ्गलाख्यानं श्रीमद्भागवतम् पुराणेस्था—
आशा हि परमं दुःख नैराश्यं परमं सुखम्।
यथा संद्धि छात्राणां सुखं सुष्वाप पिङ्गला।। 11/8/44.

5. सां. सू. 4/12।।

कृता।[6]" द्वितीय—13 कारिकासु आसन प्राणायामप्रत्याहाराणां निरूपणमस्ति। तृतीये—25 कारिकास्सन्ति। तासु ध्यानधारणासमाधयः वैराग्यादिविषयाश्च निरूपिताः। चतुर्थे—13 कारिकासु सिद्धि समाधिञ्च निरूप्य पञ्चमे—कैवल्यमुपपादितं ग्रन्थकारेण।

डा. कीर्त्यानन्द झा महोदयेन पातञ्जलयोगसूत्राणां म. म. वाचस्पति मिश्रप्रणीताया। 'स्तत्त्ववैशारद्या'श्च हृद्या पूणिमाख्याव्याख्या विहिताऽस्ति। एवमेव वेदोचार्येण पण्डितश्री धीरेन्द्र झा महोदयेन "वैदिकयोगविज्ञान नामा" विस्तृतोग्रन्थो विनिर्मितः।

तार्किकचक्रचूड़ामणिना पं. दुर्गाधरझाशर्मणा *सांख्यशास्त्र* नामक ग्रन्थो मैथिली भाषायामुपनिवद्धः सरलतया सांख्यदर्शनस्य विषयवबोधाय परमोपयुक्तोऽस्ति अयं हि 'मैथिली अकादमी पटना' इति संस्थया 1979 ई. वर्षे प्रकाशितः।

सांख्ययोगयो मैथिलानार्विभिन्नपत्रिकास्मृतिग्रन्थादिषु शोधपूर्ण प्रवन्धा अपि एतददधौ प्रकाशिता अप्रकाशिताश्च वहवो विलसन्ति। तेषां विवरणमिदानीं प्रस्तूयते—

क्र. सं.	प्रवन्धः	लेखकः	प्रकाशकादिविवरण
1.	*श्रीमद्‌भागवतीयं सांख्ययोगदर्शनम्*	पं. रमानन्द झा	अप्रकाशितः (पाण्डुलिपिः डॉ. कृष्णनम् झा गृहे) 1951 ई.
2.	*मोक्ष एव पुरुषार्थः*	प. विश्वम्भर झा	'विश्वमनीषा' 1974
3.	*योगिसम्राट् योगदत्तः*	डा. रामजी ठाकुर	वि. म. 1994
4.	*योगदर्शने ईश्वरः*	प. चिरञ्जीव झा	वि. म. 1975

6 तथा च ग्रन्थोपक्रमः

"प्रणम्य मातापितरौ गुरुं ठक्कनशर्मणा।
योगरत्नावली एत्नात कचारिकाकृत्य वन्यते।।
त्रिगुणात्मचित्तरज्ज्वा नियधितश्चिरमविद्यया पुरुषाः।
कपिरिव नव्या भ्रमितः श्रात्तोयुक्यै श्रयेद् योगम्।। (यो. र. 1/1, 2)

एतत्पुस्तकप्रकाशसंकेतः—
डॉ. किशोरनाथ झा
गङ्गानाथझा केन्द्रीय संस्कृतविद्यापीठम् इलाहावाद।

5.	*कुण्डलिनी प्रकाशः*	प. रामेश्वर झा	सारस्वती सुषमा 20/1
6.	*सांख्यापर्वर्गसमीक्षा*	डॉ. लक्ष्मीनाथझा	वि. म. 1977
7.	*योगदर्शनम्*	प. रामचन्द्रमिश्र	वि. म. 1975
8.	*विरुद्धप्रस्थानानामपि दर्शनानांवेदांश्नेपासकत्वेन सप्रयोजनत्वविचारः।*	म. म. शशिनाथ झा	वि.म. 1983
9.	*योगिनां सिद्धिविमर्शः*	पं. राकेश झा	अ. भा. प्राच्य वि.स. अहमदाबाद 1985
10.	*सांख्यतत्त्वकौमुयां सन्देहः*	डा. उमेश मिश्र	दीनवन्धु स्मृतिग्रन्थः 1978
11.	*सांख्यतत्त्वकौमुयाः सन्देह विध्वंसनम्*	म. दै. दीनबन्धु झा	दीनवन्धु स्मृतिग्रन्थः 1978
12.	*योगविज्ञानस्य परिचय उपदियता*	डा. उदय कान्त झा	पातेपुर सं.म. वि. स्मारिका 1998
13.	*योग का महत्त्व*	डॉ. सीताराम जी झा'श्याम'	कल्याण योगतत्त्वाङ्क 1991
14.	*व्याकरण में योग*	आचार्य पं. श्री आद्याचरण झा	कल्याण योगतत्त्वाङ्क 1991
15.	*मिथिला के सिद्धयोगी-परमहंसश्रीलक्ष्मीनाथ-गोस्वामी*	आचार्य डा. श्रीजयमन्तमिश्र	कल्याण योगतत्त्वाङ्क 1991

स्वातन्त्र्योत्तर मिथिलायां धर्मशास्त्रचर्चा

इन्द्रनाथ झा

संस्कृतवाङ्मयस्य सर्वेष्वेव क्षेत्रेषु मैथिलविदुषां योगदानं दृश्यते। न्याय व्याकरणसाहित्यादिषु सर्वमैव मिथिलास्था मनीषिणः प्राचीनकालादेव स्वकीयाः रचनाः प्रस्तुतवन्तः। सर्वेष्वेव संस्कृतशास्त्रेषु तेषां यशः प्रसृतमस्ति। एतेषु शास्त्रेषु भारतस्य सर्वेष्वेवभागेषु विद्वांसोऽभवन्, ये खलु स्वकीय रचनाभिः संस्कृतसाहित्य-भाण्डारं प्रपूरितवन्तः। किन्तु धर्मशास्त्रक्षेत्रेषु मैथिल विदुषां कृतयः सर्वोपरि तिष्ठन्ति। मिथिलायां धर्मशास्त्रचिन्तनस्य बलवती धारा विद्यमाना दृश्यते। भारतीयपरम्परैव धर्मप्राणास्सन्ति किन्तु तथापि मिथिलाया धर्मप्राणता सुविदिताऽस्ति। अत्रत्या दैनन्दिनव्यवहारा अपि धर्मनिष्ठास्सन्ति। 'गतावेदविद्या गतं धर्मशास्त्रम् इत्यामाणकं कदापि न प्रवर्तितम्। बौद्धादि वैदिकधर्मप्रतिकूलकाले़ऽपि अत्रत्याः संस्कृतयो-दुष्प्रभाविता नाभवन्। धर्मभीरुमैथिलानां धर्मनिष्ठा सदैवाक्षुण्णाऽतिष्ठन्। कालान्तरे यदा विभिन्नक्षेत्रीयसभ्यता-संस्कृतीनां सम्मिश्रणमभवत् तदापि मैथिलचिन्तनधारा सर्वतः पृथक् प्रतीता। पूर्वं गौतम याज्ञवल्क्यादिधर्मशास्त्र प्रवर्तकैर्मिथिला धन्याऽभवत् पश्चाच्च श्रीकर[1] श्रीदत्त-चण्डेश्वर-हरिनाथ-रुद्रधर-मिसरूमिश्र-वाचस्पतिमिश्र-महेशठाकुर-नरसिंहठाकुर-विद्यापति ठाकुरादि मनीषिणां कृतिभिः मैथिलधर्मशास्त्रसाहित्यभाण्डारं प्रपूर्णमभवत्। धर्मशास्त्रचिन्तनप्रवणतायाः प्रभावान्मुगलाक्रमणात् आंग्लशासनाच्चात्रत्या धार्मिकता विप्लुता नाभवत्।

धर्मशास्त्रेलेखनं सम्पूर्णदेशवासिनां कृते भवतुलाभप्रदमित्यस्ति महती उदार भावना। किन्तु अष्टमशतक प्राये क्षेत्रीयताभावना धर्मशास्त्र चिन्तनेऽपि समुत्पन्ना। मिथिलाऽपि पृथक्नासीत्। इदमेव पार्थक्यमात्मवैशिष्टयञ्च प्रदर्शयितुं मैथिलचिन्तकाः प्राचीनधर्मशास्त्राणां सूत्रग्रन्थानां रामायण-महाभारतपुराणादि शास्त्राणां चोपयोगिसामग्रीमेकत्रीकृत्य तेषांसमालोचनाम्प्रति प्रवृत्ता अभवन्।

धर्मशास्त्र का इतिहास—पी. वी. काणे—पृष्ठ 68

इयमेवालोचनाप्रवृत्तिर्निबन्ध ग्रन्थरूपेण प्रवर्तिता समाजे। राजशास्त्रादि ग्रन्थान्प्रतिविमुखा विद्वांसो धर्मशास्त्रलेखनम्प्रति समुत्सुका अभवन्। प्रसिद्धराजशास्त्रविद्वान् चण्डेश्वरठाकुरोऽपि सामाजिक जनमानसमनुभूय स्वकीयमहाग्रन्थे धर्मशास्त्र विषयवस्तूनां पर्याप्तं सन्निवेशं कृतवान्। अस्यामेव धारायां मैथिलकविकोकिलो विद्यापतिरपि धर्मशास्त्रलेखनप्रवृत्तोऽभवत्। विंशति शतके विद्यावाचस्पतिः म.म. मधुसूदन झा, म.म.प. मुकुन्द झा 'बख्शी' म. म. प. परमेश्वर झा प्रभृति विद्वांसोऽनेकान् धर्मशास्त्रनिबन्धग्रन्थान् व्यरचन्। प्रवहमाणायामस्यामेव धारायां स्वातन्त्र्योत्तरावधौ बहवो विद्वांसो निबन्धग्रन्थरचना-प्रवृत्ता दृश्यन्ते। वस्तुतः प्रवृत्तिरियं सामाजिकीआवश्यकतामनुभूयैव विद्वत्सु समुत्पन्ना। एषु प्रमुख रचनाकाराः सन्ति—स्व. प. त्रिलोकनाथमिश्रः, महावैयाकरणः पण्डित दीनबन्धुझा, पण्डित कृष्णमाधवझा—प. लक्ष्मीनाथझा स्व. प. सीतानाथ झा, प. रमाकान्त ठाकुरः स्व. पण्डित कुशेश्वर कुमारः, स्व. प. तेजनाथ झा, स्व. प. रामचन्द्र झा, ज्योतिर्विद् रामचन्द्र झा —डा. प्रभु नारायण शर्मा—पण्डित माधव झा, डा. शशिनाथ झा प्रभुतयः। एतेषां कृतयो मिथिला प्रान्तेषु समादृताः सन्ति। उद्धृतेषु रचनाकारेषु अधिकांशास्तु यशः शरीरैरेव तिष्ठन्ति किन्तु सन्ति कतिपये जीविताः, येषु प. माधव झा—डॉ. शशिनाथ झा अन्यतमा सन्तिः। न केवलं धर्मशास्त्रचिन्तनएव प्रत्युत लेखनेऽपि डा. झा[2] निपुणस्तिष्ठति। डा. झा प्राचीनपुराणधर्मशास्त्रादिग्रन्थानधीत्याश्रित्य च स्व निबन्धग्रन्थद्वयं विलिख्य धर्मजिज्ञासोः समाजस्य महान्तमुपकारं कृतवानस्ति।

न केवलं ग्रन्थलेखनमेव प्रत्युत स्वातन्त्र्योत्तरावधौ मैथिलजनैः शोधकार्यमपि धर्मशस्त्रमधिकृत्य विहितम्। शोधपत्र प्रस्तुतिस्तु प्रचुरतयाऽभवत। प्रकृतलेखके-नापि पञ्चतन्त्रमाश्रित्य स्वकीय डी. लिट्. शोधप्रबन्धे ग्रन्थेकृद्विश्वशर्मव्यक्तित्व प्रख्यापनप्रसंगे तस्य धर्मशास्त्रीयं ज्ञानं साधु प्रतिपादितम्। न केवलं नीतिशास्त्रकार एवं प्रत्युत धर्मशास्त्रकारोऽपि विष्णुशर्माऽऽसीत इति तत्र प्रतिपादितमस्ति। अनेकानि शोधपत्राणि विभिन्नशैक्षणिकसंस्कृतसम्मेलनेषु जनैः प्रस्तुतानि मिलन्ति। अनेके लेखाविभिन्नशोधपत्रिकासु प्रकाशितास्सन्ति। बह्वः शोधलेखा विभिन्नाभिनन्दन ग्रन्थेष्वपि प्रकाशितास्सन्ति येषामुपयोगिता धर्मशास्त्रच्छात्राणां कृते प्रकर्षेणानुभूयते। स्वतन्त्रभारते प्राचीनमिथिलाक्षरनिबद्धपाण्डुलिपिनां प्रकाशनं

2. संस्कृतविश्वविद्यालयदरभंगातः प्रकाशितेषु प्राचीनग्रन्थेषु बहूनां सम्पादकानां डॉ. शशिनाथ झा अन्यतमोऽस्ति। शुद्धि कौमुदी शूद्रविवाह पद्धतिश्च तस्य निबन्धग्रन्थद्वयमादृतमस्ति।

सम्पादनं च द्वावेवविधी दृश्येते। लेखनं-सम्पादनं पुनः प्रकाशनं चेति सर्वाण्येव कार्याणि धर्मशास्त्रसाहित्यसेवैव सन्ति। अन्यथा प्राचीनसंस्करणन्तु कालकवलितमपि भवितुं शक्यते। प्रचारभावनयाऽनेकेषां धर्मशास्त्रनिबन्धग्रन्थानां मातृभाषाऽनुवादोऽपि विद्वद्भिः कृतोऽस्ति।[3] अनुवादविधा मूर्तग्रन्थस्य लोकप्रियताया महत् कारणम्भवति।

मैथिल पण्डिताः स्वक्षेत्रस्य महत्त्वम्प्रख्यापयितुम् अन्यतः पृथक् मन्त्रव्यं प्रस्तुतवन्तः। अद्यापि मिथिलाप्रान्तस्य धार्मिकव्यवहार अन्यक्षेत्रेभ्यः पृथग् दृश्यन्ते। सम्प्रदायभेदेन धार्मिकमतभेदो भवति। धर्मशास्त्रग्रन्थे कोऽपि नियमः समेषां कृते भवति किन्तु सम्प्रदायानुसारं जनाः स्वस्थसामाजिक व्यवहारमेवानुव्रजन्ति। यथा—उपनयनसंस्कारे आचार्य-ब्रह्माणः पूर्वदिने केशवपनं न कुर्वन्ति। केशवपनं विनैन स्वकार्यसम्पादनं कृत्वा ते कृतकृत्याभवन्ति। इयम्परिपाटी अन्यत्रतु विद्यते एव, मिथिलायामपि सामान्य ब्राह्मणा न केशवपनं कुर्वन्ति न वा तस्मिन दिने एकभुक्तं कुर्वन्ति। किन्तु मैथिलेष्वेव श्रोत्रियब्राह्मण समाजे पूर्वदिने केशवपनानन्तरमेवाचार्यब्रह्मणः एक भुक्तं कुर्वन्ति। एवमेव विवाहे वरः कन्यादानकर्त्ता च केशवपनमेकभक्तं चावश्यकमनुभवतः, यद्यपि साम्प्रतं किञ्चिच्छैथिल्यमपि दृश्यते प्रतिकूलसामाजिकवातावरणात्। अशौचेसत्यपि केंचित् क्षौरकर्म आवश्यकं न मन्यन्ते किन्तु तेषां मानसिक विकृतिमपाकर्तुं निवन्धग्रन्थनिर्माणमपि विद्वद्भिः कृतमस्ति। शुभ कर्मस्वपि शरीरशुद्धये केशवपनमनिवार्यं, मरणे तु यथाविधि कर्तव्यमेव इति विषये मैथिलनिबन्धकाराः सचेष्टा दृश्यन्ते। न केवलं प्राचीनकाल एव अपितु साम्प्रतमपि केशकर्तनस्य प्रासंगिकता विद्यते किन्तु आधुनिकम्प्रगतञ्चात्मानं मन्यमानः पाश्चात्त्यसंस्कृतिप्रेरितो जनो विवाहे वरस्य केशवपनं निराकरोति। प्रतिशतं पञ्चजना एव केशवपनं विना विवाहं कुर्वन्ति। यद्यपि परिस्थितिजन्यां वैवाहिकसमस्यामवलोक्य वृद्धजना अपि एतादृशीमव्यवस्थां तत्कालं न निन्दन्ति किन्तु परोक्षत एतादृश्याः प्रवृत्तेरद्यापि कुचेष्टाभवति। वरस्य केशवपनमावश्यकमेवास्ति, यः कोऽपि पराङ्मुखोभवति स निन्दाभागेव भवति। मम तु इदमेव मन्तयं वर्तते यत् आधुनिकतावरणे प्रतिकूलाचरणं न कुर्यात्। मिथिलाया धर्मव्यवस्थायां यद् वैशिष्ट्यमस्ति तत्कदापि न उपेक्षणीयम्। एवं

---

3. स्व. पण्डित लक्ष्मीनाथ झा कृता वाजसनेयिनां छन्दोगानाञ्च विवाहपद्धतेः मैथिलीश्लोकात्मिका व्याख्याऽद्यावधि अप्रकाशितास्सन्ति। प. जयानन्दमिश्रेणापि उक्तद्वयो पद्धतयोमैथिलीभापायां सरलानुवादः कृतोऽस्ति।

कन्यादान कर्ता, वरः, ब्रह्मा च केशवपनानन्तरमेव कार्यसंलग्ना भवेयुरिति मेऽनुरोधः।

"[4]यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।
वर्णानां सान्तरालानां च स सदाचार उच्यते।"

इति मनु वचनं विचार्य स्थानीय व्यवहारोपेक्षा न स्यादित्येव प्रतिष्ठास्पदं वर्त्तते। *शुद्धिकौमुदी* ग्रन्थे प्राचीनस्मृतिकाराणां वचनान्युद्धृत्य एतादृग वैनट्यं निराकर्तुं महान् प्रयासः कृतो मिलति। न केवलमशौचे प्राप्ते क्षौरकर्मण एव समाधानं ग्रन्थकारेण प्रतिपादितम् परन्तु शरीर-भूमि-वस्त्र-जलान्नयात्रादि शुद्धिव्यवस्थापि सरलपद्धत्या निरूपिताऽस्ति।

अशौचं व्यापकमस्ति किन्तु साम्प्रतं व्यवस्था लोपसंकटम्पश्यामः। यदा कोऽपिम्रियते तदा तस्यान्त्येष्टिसंस्कारेः कश्चिज्जन्मेगरवाऽपि क्षौरकर्मनकरोति अत्र "दहित्वा च वहित्वा च त्रिरात्रम-शुचिर्भवेत्।" इति वचनं साम्प्रतमुपेक्षित प्रायमेव विद्यते। शास्त्रस्य वचनं अधिकांशैर्नाद्रियते। सापिण्ड्य करणे ब्राह्मणस्य दशाहाशौचं शास्त्रगतमेव साम्प्रतं प्रतीयते यतो यस्य या इच्छाभवति तदेव विधीयते। न कोऽपि कमपि किमपि कथयितुं क्षमः प्रतिभाति। यथा पितृमरणे तत्कालं तु दशाहेनैव शुद्धिर्भवति मात्रादेश्च तथैव किन्तु इदमशौचं दैनिकक्रियाकलाप-सम्पादनायैव वर्तते, विशिष्टधार्मिक-वैदिक कार्याणि दशाहानन्तरमेव सम्पादयितुं-नाहर्यन्ते। दृश्यताम्-पितृमरणे वर्षमात्रं मातृमरणे षण्मासं यावत्, भार्याचास्त्रैमासिकं भ्रातृपुत्रयोश्च सार्धैकमासं यावत् अशुचिर्भवतीतिव्यवस्था वर्तते धर्मशास्त्रस्य यथाहसिद्धान्तशिरोमणौ[5]–

पितुरब्दमशौचं स्यात् षण्मासं मातुरेव च।
त्रैमासिकं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः।।

अनेन वचनेन पितृमरण दिनादेकवर्षपर्यन्तं पुत्रस्योपनयनादि मांगलिकं कर्म न विधैयम्। एवं मातुः षण्मासपर्यन्तम्, स्त्रियास्त्रैमासिकमशौचम्। भ्रातृपुत्रयोः सार्धैकमासमशौचम्। किन्तु इदमपि वचनं साम्प्रतं गतसमयमेव प्रतीयते। यतः पितृमरणानन्तरं द्विमासवधावेव पुत्रो विवाहमकरोदिति पश्यामः। मत्परिचितोऽप्येको जनः पितृ मृत्युमासानन्तरमेव स्वविवाहमकरोत् तच्चान्तर्जातिय इति। ब्राह्मणस्य सर्वेषु वर्णेषु विवाहाधिकार इति मनुप्रोक्तमस्ति, यद याज्ञवल्क्येन निराकृतम्।

---

4. यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।
श्रुतिस्मृत्यविरोधे न सदाचारः स उच्यते।। इति पाठभेदः। *कृत्यसारसमुच्चये,* पृ. 105

5. *कृत्यसारसमुच्चये*–पृ. 98-99

याज्ञवल्क्येन स्पष्टं कथितं यत् द्विजातीनां शूद्रादेर्दारोपसंग्रहः कथितोऽपि समीचीनो मे न प्रतिभाति।[6] साम्प्रतं न मनुमतं ग्राह्यं मनसाऽस्ति न याज्ञवल्क्यस्यैव। यस्य या इच्छाभवति तदेव तेन क्रियते न कोऽपि प्रतिबन्धः समाजस्य तदुपरि दृश्यते। अतः सामाजिकजनो निरङ्कुशो जातः। धर्मशास्त्रस्य तु 'मन्ये, मान्यतैव छिन्ना। अस्मिन् प्रसंगे मदीयन्तु दृढ़ं मतमस्ति यत्पूर्णतो वैज्ञानिको धर्मशास्त्र- सम्मतश्च हिन्दूजातिव्यवहारः सदापालनीयो रक्षणीयश्च। यदि दैशिकसदाचारश्छिन्नो भवति तर्हि समाजो गर्तं यास्यति। एवं शास्त्रमतमनुसरणीयमेव।

समाजे यदा कस्यचिन्मृत्युर्भवति तदाऽशौचप्राप्तेः प्रसंगः समायाति अत्र भिन्नभिन्न मतं प्रचलितं किन्तु सर्वव्यापि किमपि नास्ति। मिथिलायां चिरकालादशौचेसति धर्मशास्त्र प्रोक्तं मतं ग्राह्यमासीत् किन्तु साम्प्रतं किमपि सर्वग्राह्यं मतं नास्ति। अत्र न परिपाट्यनुसारमशौचमुक्तिर्भवति किन्तु यस्य कृते श्रद्धाऽस्ति तस्यैव निकटसम्बन्धिनो मृत्योरन्यस्य शुभचिन्तकस्याचाशुचिर्जायते। अशौचापाकरणार्थ क्षौरकर्म अनिवार्यं न मत्वा वाञ्छनीयं मन्यन्ते आधुनिकपरिवेशगतजनाः। किन्तु प्राचीनव्यवस्था एतदर्थं स्वीकर्तव्यैव। सर्वमिदं 'शुद्धि कौमुदी' त्याख्ये ग्रन्थे डा. शशिनाथझाशर्मणाऽऽलोचितम्। को भवतुश्राद्धाधिकारी इति विषयोऽपुत्रे सति विचारणीयो भवति किन्तु शुद्धिकौमुदयां वस्त्विदं साधुविमर्शितमस्ति। धातुनिर्मितपात्राणामूर्णकार्पासादिवस्त्राणां शुद्ध्युपकरणानि ग्रन्थे साधुविवेचितानि सन्ति। अयं दरभंगास्थ कामेश्वरसिंहदरभंगासंस्कृत विश्वविद्यालयेऽध्यापनं कुर्वन् व्याकरणविभागे, विभिन्न प्रकाशनेषु निरतस्तिष्ठति। ग्रन्थकारस्य शूद्रविवाहपद्धतिरपि प्राचीन पौराणिक व्यवहारानुसारं प्रणीताऽस्ति। स्वमन्तव्यं द्रढयितुं तेन प्रसंगानुकूला पौराणिक मन्या अपि यत्र तत्र सन्निवेशिताः। मिथिलायां शूद्राणां कर्णकायस्थानां च कृते ग्रन्थोऽयमुपयोगीवर्तते। यथा शूद्राणां विवाहपद्धतिः विरचिताऽस्ति तथैव डॉ. तेजनाथ झा महोदयः पाहीग्रामस्थः शूद्र श्राद्धपद्धतिमपि रचितवानस्ति। अन्यो मैथिलविद्वान् दीपग्रामवास्तव्यः पण्डिततेजनाथझा महाशयश्छन्दोगानां वाजसनेयिनां च कृते पृथक् पृथक् पद्धतिं लिखितवान्।

स्वातन्त्र्यानन्तरं मधुबनीमण्डलस्य लोहनाग्रामस्थ महेश्वरलतासंस्कृत विद्यापीठस्य दरभंगास्थस्य रमेश्वरलतासंस्कृतमहाविद्यालयस्य च पूर्वप्रधानाचार्यः

6. यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः।
नैतन्ममतं यस्मात्तत्रायं जायते स्वयम् ।। *याज्ञवल्क्य स्मृतौ*।। 56

पण्डितप्रवरस्त्रिलोकनाथमिश्रः 'पितृकर्मनिर्णय' इत्याख्यं ग्रन्थं निर्माय मैथिलजनानां कृतेऽन्येषाञ्चाविस्मरणीयमुपकारं कृतवान्।

लौकिकजीवनेऽनेकाः समस्या उत्पद्यन्ते यासां निराकरणं बुद्धिव्यायामसाध्यं भवति। धर्मशास्त्रमर्मज्ञोविद्वान् समुपस्थितसमस्यां निराकर्तुं तद्विषकं ग्रन्थमाश्रयते किन्तु यदा दृढ़वचनं किमपि न प्राप्यते तर्हि स बुद्धिकौशलमपि प्रदर्शयति। 1988 खीष्टाब्दे मिथिलाया विख्यात सरिसवपाही ग्रामे श्री मित्रनाथझा शर्मणो विमातामृता। अष्टम दिने तस्य स्व माताऽपि मृता। श्री झा स्वयं ज्येष्ठत्वेन श्राद्धाधिकारी (कर्ता) आसीत्। एकस्मिन्नेव कर्तरि सति मातृद्वयस्य श्राद्धकरण-समस्या उत्पन्ना। श्री झा विमातुः अन्त्येष्टि संस्कारं कृत्वा पुनः स्वमातुरपि संस्कारमपरम् 'उत्तरीयं' धृत्वा कृतवान् किन्तु श्राद्धसमस्या ग्रस्तोऽभवत्। सामान्यरूपेण यदा श्राद्धसम्पादनसमस्या निराकरणं नाभवत् तदा मिथिलायाः प्रसिद्ध धर्मशास्त्रविदः पण्डितश्यामसुन्दरझा महाभागस्य महरैलग्रामस्थस्याग्रे समस्येयमुपस्थापिता। किंकर्तव्यविमूढ़ः पण्डितझास्वयमन्तर्द्वन्द्वग्रस्तोऽभवत् तथा च अनेकेषां प्राचीनधर्मशास्त्राणां निबन्धग्रन्थानाञ्चाध्ययनं विधाय "उपाय" अन्वेषणं कृतवान्। बृहत पराशरस्मृतिग्रन्थमाश्रित्य स समस्या निराकरणं कृतवान्। 19 दिनानि यावत् गले उत्तरीय धारणं कुर्वता कर्मा पूर्वं (ज्येष्ठाया) विमातुः श्राद्धं कार्यं संक्षेपेण (पुरुषसूक्तादि दीर्घमन्त्र संक्षेपं विधाय) पश्चाच्च स्वमातु' रिति पण्डित श्यामसुन्दरशर्मणा स्वाभिमतिः प्रकटिता। एतादृशी समस्या प्रायः पूर्व नोत्पन्ना भवेदिति अहं मन्ये किन्तु चातुर्यपूर्णं समस्या निराकरणं कृत्वा पण्डित झा महाभागेन परवर्तिकाले मार्गदर्शनमेव कृतम्। एतादृश्यैव समस्या यदि पुनरन्यत्र आगच्छेर तर्हि वृत्तमिदमनुसरणीयम्। वस्तुतो यथा समस्यासमाधानं सरलरीत्या भवेत्तथा करणीयम् न खलु गूढ़समस्यामेव अपरामुत्पादयेदिति मे मन्तव्यम्।

विवाहसमस्या मिथिलायां जटिलाऽऽसीत्। अष्ट वर्षा न व वर्षा दशवर्षा वा कन्यामेव विवाहयेदिति धर्मशास्त्रमतमासीत्। विभिन्न कारणैरियं व्यवस्थाशास्त्रे कृता। अन्धविश्वासोऽपि अत्र कारणमासीत्।" "रोमोद्भवे शशीभुङ्क्ते गन्धर्वः कुचदर्शने। अनलस्तु रजो योगे स्त्रियो भुङ्क्तेतुनान्यथा।" इति बृहस्पतिवचनं देशकालपरिस्थित्यानुसारमासीत नात्र तर्कसंगतं किमपि अस्ति। अथवा म्लेच्छादि

---

7. महरैसग्रामस्य संस्कृतमहाविद्यालयस्य आँग्लविषयाध्यापक श्रीखेलानाथ झा (श्राद्धकर्तुर्भगिनीपतिः) महाभागो वृत्तान्तमिमंश्रावितवान्। विषयोऽयं द्वयोर्मरणकाले श्राद्धेसमस्या समुत्पन्ने च चर्चापरको जात इति स्मर्यतेमयापीति।"

दुष्टजातिभः कन्या विवाहपूर्वं दूष्या न भवतु अन्यथा विवाहसमस्या भविष्यतीत्येव कारणमत्र भवेत्। धर्मशास्त्रं सामाजिकव्यवहारं विचार्यैव निर्मीयते। यदि साम्प्रतं धर्मशास्त्रं निर्माणं भवेत् तर्हि गौरी-रोहिणी-कन्या-विवाहव्यवस्थानकदापि तत्र सन्निवेशिता भविष्यति यतः साम्प्रतिक शासकीय विध्यनुसारेण अष्टादशवर्षात् पूर्वं कन्यायविवाहोनकार्यः एकविंशतिवर्षात् पूर्वं च यदि कोऽपि, स्व-बालकं वा विवाहयति तर्हि स दण्डमाग्भवति। अतः समकालिको विधिरेव भवेत् अनुसरणीयः न खलुं धर्मशास्त्रानुसारं विवाहं कृत्वा कारयित्वा वा दण्डमर्हेत्।

'मुण्डे-मुण्डे मतिर्भिन्ना' इतिवचनानुसारं मैथिलविद्वत्सु पर्व निर्णय सम्बन्धे पर्याप्त मतभेदस्तिष्ठति। पर्वसम्बन्धे अनेकानि मतानि समुपस्थितानि भवन्ति। अतो यदा-कदा दुर्गापूजा—भ्रातृद्वितीया-प्रतिहारषष्यादि विभिन्नपर्वसु मतभिन्नता जायते। स्वतन्त्रताप्राप्तेरनन्तरं षष्टितमे दशके मासनिर्णयमतभेदात् श्रीदुर्गापूजा द्विमासावधौ द्विवारमभवत्। मिथिला यामपि स्थितिरियं समुत्पन्ना। भ्रातृद्वितीया-प्रतिहारषष्ठी-मकर-संक्रान्त्यादि विभिन्नपर्वाणि कदाचित् भिन्न-भिन्न दिनेषु भवन्ति। एतानिसर्वाणि निराकर्तुं यदाकदा धर्मशास्त्र विदां ज्योतिर्विदामन्येषां च संस्कृतविदुषां सम्मेलनमपिभवति। इदमेव सर्वमाधृत्य पण्डितकुशेखरकुमरः 'पर्वनिर्णय' इत्यभिधेयं महानिबन्धग्रन्थं प्रणीतवान् येनपर्वनिर्णयः विदुषां मध्ये विप्रतिपत्तेः सम्भावना न्यूना भवेत्।

प्राचीननिबन्धग्रन्था मिथिलाक्षरनिबद्धाः पाण्डुलिप्यामेव आसन्। तदुद्धारकार्यं महता श्रमेण संस्कृतविश्वविद्यालयदरभंगायामभवत्। विश्वविद्यालयीयः पुस्तकालयः दरभंगाराजप्रदत्तोऽस्ति; यत्र महाराजद्वारा एकत्र प्राचीन मातृकाः सुरक्षितास्तिष्ठन्ति, यासां प्रकाशनं विश्वविद्यालयेन बहुशः कृतम्। म. म. वाचस्पति मिश्र, म. म. गोकुलनाथ, म. म. महेश ठाकुर, म.म. नरसिंहठाकुर, म. म. विद्यापति प्रभृतीनां प्राचीन निबन्धकाराणां हस्तलेखान् संस्कृतविश्वविद्यालयोऽत्रत्यैः प्राध्यापकैरन्यैश्च विद्वद्भिः प्रकाश्यमानीतवान्, यस्मात् मिथिलाया धर्मशास्त्रचिन्तन-रचनाप्रवृत्तिः जगति ख्याताभवति। एवमेव विश्वविद्यालयद्वाराऽन्येविद्वांसः प्रोत्साहिताभवन्ति। फलतस्तेषामपि उपयोगिन्योधर्मशास्त्ररचनाः प्रकाशिता जाताः।

स्वातन्त्र्योत्तरमिथिलायां धर्मशास्त्रसम्बन्धिन्योरचनाः मैथिलजनानधि-कृत्यापि केवलमत्रैव नाभवन्। मैथिलार्थमपि कृता रचना वाराणसी-पटनादिषु विभिन्नस्थानेषु प्रकाशिताः। अत्र सुष्ठु प्रकाशनं कारणमस्ति। शुद्ध-संस्कृतभाषानिबद्धरचनाप्रकाशनं वाराणस्यां साधुभवतीति सर्वज्ञेयमस्ति। अस्मिन्

प्रसंगे चौखम्बाप्रकाशनसंस्थानानि, मास्टरखेलाडीलालठाकुर प्रसादबुकसेलरादीनि च स्मर्तव्यानि सन्ति। यत्र मैथिलधर्मशास्त्रज्ञैर्विद्वद्भिः स्वस्वरचनाः प्रकाशिताः।

बिहारप्रान्तस्थ पटनास्थ प्रकाशकैरपि भिन्न-भिन्न मुद्रणालयेषु कतिपय रचनाः प्रकाशिताः। येषु मोतीलाल बनारसीदासोर्वशीप्रकाशनादि संस्थानानि प्रशंसास्पदानि सन्ति।

दरभंगास्थ संस्कृतविश्वविद्यालयातिरिक्ता अन्या अपि संस्था धर्मशास्त्र-विषयप्रकाशने सन्नद्धास्सन्ति यासु मिथिलासंस्कृतशोधसंस्थानम्-रमेश्वरप्रेस इत्यादिनि मुख्यानि सन्ति।

एवं दृढतया इदं वक्तुं शक्यते यन्नकेवलं प्राचीनकाले किंवा विंशतिशताब्दस्य पूर्वार्ध एवं प्रत्युत स्वतन्त्रताप्राप्तेरनन्तरमपि विभिन्ना धर्मशास्त्रनिबन्धग्रन्था स्वतन्त्ररूपेण सम्पादिताः प्रकाशिताश्च। केचिद्धर्मप्राणैमैथिलैः ग्रन्थातिरिच्य यत्रतत्र भिन्न-भिन्न शोधपत्रिकासु समाचार पत्रेषु—अभिनन्दनग्रन्थेषु अन्यत्र च स्वरचनाः प्रकाशयन्ते, यस्माद्धर्मशास्त्र साहित्यप्राचुर्यपराकाष्ठा दृश्यते, भारते च मिथिलाया धर्म प्रवणता सर्वैरभिन्द्यत इति।

स्वातन्त्र्योत्तर मिथिलायां धर्मशास्त्रलेखनम् सूची

स्वातन्त्र्योत्तरमिथिलायामनेकप्रामाणिकप्राचीनग्रन्थानामस्तित्वात् धर्मशास्त्रमाश्रित्य मूलरचनायाः प्रवृत्तिः कुण्ठितप्राया दृश्यते। यत एतादृशीनां रचनानामावश्यकतैव जनैर्नानुभूताः। सामाजिकसमस्या निराकरणाय प्राचीन धर्मशास्त्रस्य ग्रन्था एव प्रमाणभूताः पर्याप्ताश्च सन्तीति धिया तेषामेव समीक्षणं सर्वैः इच्छितम्। पूर्वप्रणीतानां मिथिलाक्षरे तिरहुतायां वा निबद्धानां हस्तलेखानामेव प्रकाशनं साम्प्रतिकैर्मनीषिभिर्विशेषेण मिथिलास्थैर्विद्वद्भि र्विचिन्तितम्। किन्तु किञ्चिद्-बहिर्भूत्वा जनैः धर्मशास्त्रविषयमधिकृत्य शोधकार्यमपि विहितम्। न केवलमेतदेव किन्तु विभिन्नशोधपत्रिकासु अभिनन्दनग्रन्थादिषु चानेकानि शोधपत्राणि प्रकाशितानि मिलन्ति। इदं सर्वं धर्मशास्त्रलेखनं तत्सेवनं चैव वक्तुं शक्यते। अत्र मया तमेवविषयमाश्रित्य लेखकानामकारादि क्रमेण उल्लेखं कृत्वा प्रकाशनवर्षादीनि उपस्थाप्यन्ते। ये सन्ति प्राचीनतालपत्रनिबद्धग्रन्थास्ते समुचित संरक्षणाभावे नष्टप्राया दृश्यन्ते। तेषां प्रकाशनं विभिन्नसंस्थानैः कृत्वा धर्मशास्त्रसाहित्यस्य सेवाकार्यं चिन्त्यते इति प्रमोदविषयः। अस्मिन् प्रसंगे दरभंगास्थ संस्कृत

विश्वविद्यालयसेवास्मर्तव्याऽस्ति। पटना-वाराणसीस्थ प्रकाशन संस्थानानि मैथिललेखकानां मैथिलसम्प्रदायगतरचनाप्रकाशनं विधाय प्रशंसास्पदानिसन्ति। यदि मैथिलरचनाकाराः सुस्पष्टप्रकाशनाय वाराणस्यादावेव प्रकाशनं वाञ्छन्ति तर्हि भौगोलिकसंकीर्णता न चिन्तनीया यतः सर्वाणि रचनाप्रकाशनानि मिथिलास्थमुद्रणालयेषु सम्भवानि न सन्ति। सौविध्यं विचार्यैव इमानि प्रकाशनानिमिथिलातोऽन्यत्राभवन्। केवलं मिथिलायामेव नहि प्रत्युत मैथिलावाराणसीप्रभृतिस्थानेषु निवसन्तोऽपि स्वक्षेत्रसेवाभावनया तत्रैव यदि रचनाः कुर्वन्ति तर्हि ताः मिथिलास्थ रचना एव वक्तुं शक्यन्ते अतो मया सर्वमिदं विचिन्त्य तासामपि समावेशोऽत्र कृतोऽस्ति। वाराणसीस्थ चौखम्बाप्रकाशनेषु तेषां ग्रन्थसूचिषु 'मैथिलसम्प्रदाय' इत्यपि उल्लिखितं मिलति। एवमुदारभावना प्रदर्शनीयऽत्र।

प्रकाशितग्रन्थसूचि :

	लेखकनामानि/ (सम्पादक नामानि)	प्रकाशनवर्षम्	रचनाः	प्रकाशनस्थानम्
1.	स. आनन्द झा-जयमन्तमिश्रः	1982	दानवाक्यावली (विद्यापतिः)	कामेश्वर सिंह दरभंगासंस्कृत विश्वविद्यालयः दरभंगा
2.	स. आमोद झा-सदानन्दझा	1987	तिथिद्वैधनिर्णयः (म.म. शुभंकर ठाकुरः)	दरभंगा
3.	स. उदयनाथ झा	1996	लघुहाटीतस्मृतिः	वाराणसी
4.	काशीनाथ झा 'विद्यालांकारः'	1962	गयापद्धतिः	वाराणसी
5.	सं. काशीनाथ मिश्रः	1978	महेश ठाकुरकृता 'धर्मशास्त्र निबन्धावली'	मिथिलाशोध संस्थानम्, दरभंगा
6.	कुशेश्वर कुमरः सं.(नागेन्द्र कुमारः)	1981	पर्वनिर्णयः (महानिबन्ध)	राजराजेश्वरी पुस्तकालयः, कालभैरव, वाराणसी

निबन्धकारस्य पण्डित कुशेश्वरकुमरस्य ग्रन्थमियं सम्पादके नागेन्द्रकुमारः साधु-सम्पाद्य आंग्लभाषात्मकं ग्रन्थसारांशसंवलितं प्रकाशितवान्। अत्र पर्वद्वैध विषये प्रख्यातधर्मशास्त्र-

मनीषिणां शतसंख्यकानां निर्णयोमिथिला विद्वत्परिषदः समायोजकत्वेन पण्डित कुशेश्वरशर्मणा सभाद्वारानिर्णीय संगृहीतः। एतदनुसारं मिथिलायां व्रतपर्वादिविषये सर्वसम्मतोनिर्णयः प्राप्यते। वस्तुतोधर्मशास्त्रजिज्ञासूनां कृते महदुपयोगी ग्रन्थोऽयमस्ति। प्रायः समेषां पर्वणां द्वैधरव निराकरण प्रयासः पण्डित कुमरेण कृत इति दृढतया कथयितुं शक्यते। वस्तुतो ग्रन्थसम्पादकः प्रकाश्यतामानीय महती समाजसेवां कृतवान्। एतत्सदृशोमहानिबन्धोऽर्वाचीनकाले विरल एवेति।

7.	स. कृष्णानन्दझा	1983	वाचस्पतिमिश्रकृतः आचार चिन्तामणि	दरभंगा

ग्रन्थस्यास्य सम्पादनं संयुक्तरूपेणाचार्य डा. जयमन्तमिश्र धर्मनाथझा डॉ. शशिनाथ झा शर्मभिः कृतमस्ति।

8.	कृष्णकान्त झा	1997	दुर्गापूजापद्धतिः	बरदाहा मधुबनी
9.	कृष्णमाधव झा	1964	धर्मशास्त्रेणमलमास विचारः	मुम्वई
10.	कृष्णमोहन ठाकुरः	1952	म. म. अमृतनाथकृत कृत्यसार-समुच्चयस्य सम्पादन (तृतीयं संस्करणम्)	वाराणसी
11.	गणेश रायः	1980	छन्दोगानां वाजसनेनियनां च सदाचार पद्धती	पटना

धर्मकर्मणोः प्रतिकूल परिस्थितावपि प. रायः ब्राह्मणवर्गे संस्कारनिर्माणाय ग्रन्थमिमं लिखिता महत्कार्यं कृतवानस्ति।

12.	गंगाधर झा	1967	महानवमीव्यवस्थासार समुच्चयः	महिषी, सहरसा
13.	गंगेश्वर झा	1957	मासविमर्शः	वाराणसी

दैवज्ञ लेखकस्यास्य निर्णयालोकः (अप्रकाशितः) अपि संक्रान्तिकृत्य जन्ममास-रविव्रत-वटसावित्रीगजच्छाया जीवत्पुत्रिकाऽशौचसंकराशौच-सन्ध्यावन्दनादिविषयानाश्रित्य साधु-विवेचनं कृतवानस्ति। प्रकाशनापेक्षी ग्रन्थोऽयं धर्मप्राण जनानां कृते महानुपयोगी भविष्यतीतिचिन्तये।

14.	चिरञ्जीव शर्मा	1952	वाजसनेयिनामाह्निकं कृत्यम्	रमेश्वरप्रेस दरभंगा
15.	सं. जयमन्त मिश्रादयः	1984	म.म. वाचस्पति मिश्रकृतस्य 'कृत्यप्रदीप'स्य	दरभंगा

16.	जयानन्दमिश्रः	1980	छन्दोगानामुपनयन-पद्धतिः	वाराणसी
		1980	छन्दोगानायविवाह पद्धतिः	वाराणसी
		1980	वर्षकृत्यम्	वाराणसी
17.	जीवनाथ झा	1986	नाममहिमा	दरभंगा
18.	तुलानन्द झा	1978	सापिण्डय निर्णयः	लखनौर, मधुवनी

नारायण झा इति नाम्ना प्रथितोऽयं पण्डितोऽल्पकायमिमं ग्रन्थं लिखितवानस्ति। वैशिष्ट्यं किमपि नास्ति।

	तेजनाथ झा दीपग्रामस्थः	1985	छन्दोगानां विवाहादि-संस्कारपद्धतिः	दरभंगा
		1977	वाजसनेयिनांविवाहदि-संस्कारपद्धतिः	दरभंगा
	तेजनाथ झा पाही ग्रामस्थः	1986	शूद्रश्राद्धपद्धतिः	दरभंगा
	त्रिलोकनाथ मिश्रः	1951	पितृकर्मनिर्णयः	वाराणसी

पण्डितप्रवरेण त्रिलोकनाथमिश्रेण ग्रन्थमिमं निर्माय सामाजिकजनानां विशेषेण मैथिलानां कृते महानुपकारो विहितः। अस्मिन् ग्रन्थे सामयिकोपस्थित समस्यानां निराकरणं समीक्षणं वा सर्वत्र कृतं मिलति। मरणादारभ्य जनानां समस्त समस्यानां निराकरणमत्र कृतमस्ति। पूर्वं श्राद्धशब्दं समीक्ष्य शववाहनाद्यशौच-शवदाहादि प्रेतोदकदान-मृतोद्देश्यकरोदननिषेध-पर्णनरदाह-जातश्राद्धस्य पुनरागमने-शुद्धिनिर्णय-पिण्डदाननिर्णय-सपिण्डीकरणादीनां समेषां विषयाणामत्र सम्यक् समालोचनं प्राचीनवचनान्युदाहृत्य कृतमस्ति। मिथिलायां सम्प्रति यथा मासपर्वादौ कृत्यसारसमुच्चयस्य स्थानमस्ति तथैवपितृकर्मविषये पण्डितत्रिलोकनाथशर्म प्रणीतपितृकर्मनिर्णयस्य महत्त्वं विद्यते।

19.	दीनबन्धुझा महावैयाकरणः	1952	जीमूतवाहनव्रतनिर्णयः	दरभंगा
20.	सं. दुर्गाधर झा	1972	द्वैतपरिशिष्टम् (केशवमिश्रः)	वाराणसी

कतिपय धर्मशास्त्रीय विषयाणां समाधानमस्मिन् ग्रन्थे कृतमस्ति। सम्पादकमहोदयस्य प्रयत्नः श्लाघ्यः।

1972 हर्षनाथप्रणीत

1972 "संस्कारदीपकः"

याज्ञवल्क्यस्मृतेर्मिताक्षराव्याख्यायाः 'दायभाग' प्रकरणस्यापि व्याख्या पं. झा-महाभागेन विस्तरेण कृताऽस्ति।

21.	सं. धर्मनाथझा	1984	मासमीमांसा (गोकुलनाथ कृता)	दरभंगा
			समयप्रदीपः (श्रीदत्तकृतः)	दरभंगा
			प्रमाण-पल्लवः (म. म. नरसिंह ठाकुर कृतः)	दरभंगा
22.	सं. प्रभुनारायण शर्मा	1985	वाचस्पतिकृतस्य 'व्यवहार-चिन्तामणिः' इत्यस्य सम्पादनम्	दरभंगा
		1984	'पितृभक्तितरङ्गिणी' वाचस्पति प्रणीता तस्याः सम्पादनं रामचन्द्र झा रामसेवक झा शर्मभ्यां सह।	दरभंगा

पितृभक्तितरङ्गिणी ग्रन्थेन सहास्मिन्नेव संस्करणे म. म. अमृतनाथ शर्मकृत 'प्रायश्चित्त व्यवस्थासारसमुच्चयः' अपि सम्पादितस्तैर्महानुभावैरिति। पितृभक्ति (कर्म) विषये यथा *पितृभक्तितरङ्गिणी* ग्रन्थस्य महत्त्वमस्ति तथैव पातकोपपातकमहापातकानां निराकरणाय प्रायश्चित्तविधानपुरस्सरस्य प्रायश्चित्त व्यवस्थासारसमुच्चयस्यास्ति मिथिलायामिति।

23.	बुद्धिधारीसिंहः 'रमाकरः'	1977	दुर्गाश्यामापूजा-पद्धति	वाराणसी
24.	माधव झा	1996	दीक्षा	पटना
25.	रमाकान्तठाकुरः	1955	पौरोहित्यकर्मसारः	दरभंगा

लोहनाग्रामस्य स्व. ठाकुरः हिन्दूजीवनपद्धतौ सन्ध्यावन्दनात् प्रभृति दैनिक जीवनस्यावश्यक-कर्मप्रति अस्माकं ध्यानाकर्षणं कृतवानस्तीति।

26.	सं. रामचन्द्र झा 'ज्योतिर्विद्' (जयदेवपट्टी दरभंगास्थः)	1985	तिथिनिर्णयः (सपरिशिष्टः) (राजनाथीयः)	दरभंगा
		1983	शुद्धि-दीपिका (म. म. कोणेश्वरः)	दरभंगा
27.	स. रामचन्द्रझा वैयाकरणः (तरौनी-दरभंगास्थः)	1950	अशौचनिर्णयः	वाराणसी

	1960	आहितकपञ्चदेवता पूजा पद्धतिः	वाराणसी
	1982	एकादशीव्रतोद्यापन पद्धतिः	"
	1985	कन्यादान-तत्त्वविमर्शः कार्तिकमाशत्म्यम्	"
	1997	कूपोत्सर्गपद्धतिः	"
		कार्तिकमाशरम्यम्	"
	1980	कूपोत्सर्गपद्धतिः	"
	1970	गृहोत्सर्गपद्धतिः	"
	1978	छन्दोगानामुपनयनपद्धतिः	वाराणसी
रामचन्द झा वैयाकरणः	1980	छन्दोगानांपार्वण-पद्धतिः	"
	1982	छन्दोगानां विवाहपद्धतिः	"
		छन्दोगानां संक्षिप्तमाह्निकम्	"
	1972	तिथिनिर्णयः (राजनार्थायः)	"
	1948	प्रतिहारषष्ठी (विवस्वत् षष्ठी) व्रत पद्धतिः	"
	1972	वर्षकृत्यम् 1-2 भागौ	"

'वर्षकृत्य' ग्रन्थस्य पूर्वभागे समेषां मासानां विभिन्नानां पर्वणां तिथिनिर्णयं विधाय पूजा-कथादयो वर्णिताः। उत्तरे भागे मातृकापूजाऽऽभ्युदयिकश्राद्धविध्यादयोऽन्त्येष्टि संस्कारविध्यादयश्च विशदेन वर्णितास्सन्ति। ब्राह्मणादि वर्गानां समस्तकर्मणां विषयेऽत्र वर्णनं मिलति। धर्मशास्त्रनिबन्धग्रन्थेषु भागद्वयान्वित वर्षकृत्यग्रन्थस्यातिमहत्त्वं विद्यते विशेषतया मिथिलायामिति।

	1996	वाजसनेयिनामुपनयनपद्धतिः	वाराणसी

		1993	वाजसनेयिन्नामेको-द्दिष्टपद्धति (परिवर्धित संस्करणम्)	"
		1996	वाजसनेयिनां मैथिलविवाहपद्धतिः (द्वितीयं संस्करणम्)	"
		1978	वाजसनेयिनां श्राद्धपद्धतिः (श्रीदत्तानुसारिणी)	"
27.	रामनारायणमिश्र 'शास्त्री'	1965	छन्दोगानामेकोद्दिष्ट-पद्धतिः	दरभंगा
		1965	छन्दोगानां पार्वणपद्धतिः	दरभंगा
		1965	छन्दोगानां श्राद्धपद्धतिः	"
28.	सं. रामसेवक झा	1984	पितृभक्तितरङ्गिणी सम्पादिता	"
29.	स. ब्रजकिशोर झा	1988	म. म. दामोदर ठाकुरकृत 'महादान निर्णयः' सम्पादितः	"
30.	शशिनाथ झा	1982	वामदेवोपाध्यायकृत 'गूढर्थि दीपिका' सम्पादिता	"
		1984	शुद्धिकौमुदी	"
		1998	वर्षकृत्यम्	पटना

मूलधर्मशास्त्रस्य निवन्धग्रन्थस्य च लेखनाप्रवृत्तिकालेऽपि डा. शशिनाथझा स्वतंत्रनिवन्धग्रन्थस्यास्य निर्मितं विधाय समाजे यशः प्राप्तो जातः। ग्रन्थकारेणात्र अशौच-शरीर भूमि-वस्त्र जलान्नपात्रादि शुद्धि प्रकारः सरल पद्धत्या निरूपितः। शूद्राणां कुलाचारानुसारं दशाहाशौचं-विगोत्राशौचं-श्रद्धाधिकारि—इत्यादि विषयं सामायिकसामाजिक स्थितेरनुरूपं विवरणं प्रस्तुतम्। मिथिलायां विगोत्राशौचविषये प्रसिद्धिर्व्यवहारश्चास्ति यत् स एवाशौचं लभते यस्य मातामहपितामह सन्ततिर्मृत-व्यक्तिर्भवति अथवा मृतव्यक्तेर्मातामहपितामह सन्ततिर्योभवति। एतस्य हेतोः

धर्मशास्त्रीयं किमपि वचनं नास्तीति केचित् कथयन्ति। परन्तु ग्रन्थेऽस्मिन् प्रतिपादितमस्ति यदि दंमतं शास्त्रीयमस्ति—"शिष्यर्त्विग् बान्धवेषु च" इतिवचन-स्थबान्धवपदस्थै-र्व्याख्यातमिदं मतम्। त्रिविधाबान्धवा भवन्ति, यथा-आत्मबान्धवाः पितृबान्धवा मातृबान्धवाश्च। तत्रपितृपदे न पितामहादेरपि, मातृपदेनच पितामही-मातामहीप्रभृतीनामपि ग्रहणम्। सम्बन्धस्योभयनिष्ठत्वादेवं व्यवस्था कृतेति।

धातुनिर्मितपात्राणां क्षोमोर्ण-कार्पास-पट्टचीनादि वस्त्राणां शुद्ध्युपकरणानि सम्प्रत्यपि परमोपयोगीनि विद्यन्ते। किञ्च कतिपयशब्दानां परिचायका मैथिलीभाषात्मकाः शब्दाऽपि उपयुक्ताः। यथा क्षोमवस्त्रं—रेशमी इति। पट्टवस्त्रम्-पटुआ इति। चीनवस्त्रम्-मलमल इति प्रसिद्धम्। एवं दृढतया इदं कथयितुं शक्यते यत् 'शुद्धिकौमुदी' ग्रन्थः साम्प्रतिकेऽपि प्रतिकूलवातावरणे जनानां कृते महदुपयोगीति।

शशिनाथ झा 1984 शूद्रविवाहपद्धतिः पटना

अत्रनिबन्धकारेण प्रसंगानुसारं विविधाः पौराणिकमन्त्राः संगृह्य यत्र तत्र सन्निवेशिताः। मुख्यतो मिथिलायां मैथिलकायस्थ (कर्णकायस्थ इति) समाजे प्रचलित व्यवहारानुसारं पद्धतिरियं प्रणीतेति।

शशिनाथ झा 1985 म.म.सचलमिश्रकृत 'स्मृतितत्त्वसमुच्चयः' सम्पादितोग्रन्थोऽस्ति दरभंगा

शशिनाथ झा

1984 'स्मृतिदीपिका' (म. म. उमापति कृता) दरभंगा

स्वातन्त्र्योत्तरमिथिलायां धर्मशास्त्रसम्बन्धि प्रकाशितशोधपत्राणि—

लेखक नाम	प्रकाशन-वर्षम्	शोधपत्र नाम	पत्रिका नाम संस्करणम्	पृष्ठम्
1. अमरनाथ झा	7.7.1983	पलपैतृकादि निर्णयः	विश्वमनीषा (शोधपत्रिका) (दरभंगा)	60-67
2. अर्जुन झा	7.3.1983	श्राद्धतत्त्वविमर्शः	विश्वमनीषा	18-23
3. आनन्द झा	4.1.1977	संसर्पेदुर्गापूजा विचार	विश्वमनीषा	33-37
4. इन्द्रनाथ झा	1995	गौतमधर्मसूत्र ग्रन्थस्य प्रासंगिकता	सारस्वत कुसुमाञ्जलिः (डा. जयमन्त मिश्राभिनन्दनग्रन्थः)	242-44

		1992	निबन्धकारोऽमृत नाथः	अखिलभारतीय संस्कृतसम्मेलने सिवान, बिहारे पठितः समर्पितश्च शोधलेखः	
		1993	विष्णुशर्मणो धर्मशास्त्रज्ञत्व विवेचनम् (विष्णु शर्मणो वैदुष्यम्) दण्डनीतिसिद्धान्ताः पञ्चतन्त्रे तदुपयोगाश्चइति डी. लिट् शोध प्रबन्ध	बिहार विश्वविद्यालय मुजफ्फरपुरस्य डी. लिट्. शोध प्रबन्धे	61-66
5.	उपेन्द्र झा	1982	पञ्चमहायज्ञानामनि वार्यत्वम्	शोधप्रभा, दिल्ली	
6.	काशीनाथ झा	1990	भोजने नैवेद्यनिरूपणम्	A.I.O.C हरिद्वार शोधपत्रसार (समपर्ति शोधपत्रम्)	40
7.	जयकृष्ण मिश्रः	1995	आश्रमग्रहणकाल-विचारः	सारस्वत कुसुमाञ्जलिः	225-30
8.	जीवनाथ झा	3.1.76	आचारः परमोधर्मः	विश्वमनीषाः	43-45
		2.3.76	क्षयमासविचारः	"	24-25
9.	दीनवन्धु झा	3.2.77	विजयदशमी-निर्णयः	"	5-9
			श्राद्धाधिकारिनिर्णयः	"	40-45
10.	द्वारिकानाथझा	9.4.86	दिव्यस्योपादेयत्वम्	"	75-82
		10.2.86	मिथिलायां पञ्चदेवोपासना	"	75-82
11.	परमानन्द झा	12.1.94	धर्ममर्ममीमांसा	"	52-61
12.	प्रभुनारायण शर्मा	1995	अशौचसंकरस्वरूप विमर्शः	सारस्वत कुसुमाञ्जलिः	220-24
		9.1.76	व्यवहारस्वरूप विमर्शः	सारस्वत दरभंगा	
		9.1.76	श्राद्धस्वरूपविमर्शः	सारस्वत दरभंगा	
13.	लक्ष्मीनाथ झा	9.2.76	संस्काररूपविमर्शः	विश्वमनीषा	

	1974	पुरुषार्थनां निपुराय	कविशेखर पुष्पाञ्जलिः	420-25
14. विदेश्वर झा	2.1.75	षाण्मासिकंरवि व्रतम्	विश्वमनीपा	53-60
15. वेचन झा	1974	अभिज्ञानशाकुन्तले धर्मशास्त्रम्	कविशेखर पुष्पाञ्जलिः	371-76
16. शशिनाथ झा	8.3.84	शिवरात्रिव्रतानिर्णयः	विश्वमनीषा	17-23
17. श्रुतिधर झा	1989	व्रतानांस्वरूप वैचित्र्यम्	A.I.O.C विशाखापतनम (Summaries of Papers)	379

Sanskrit Mahākāvyas in Orissa after Independence

ARUN RANJAN MISHRA

Although the handwritten manuscripts of the *Paippalāda Saṁhitā* of the *Atharva Veda* are found in different parts of Orissa and the Sanskrit tradition has a pretty long past in the Orissan soil, it is difficult to assert that the classical Sanskrit writings were an ancient endeavour is the state. The inscriptions of Ashoka and Khāravela in Orissa, which happen to be the earliest epigraphs of this country, are not in Sanskrit. They are in the Brāhmi script too. The Bhadrak[1] Inscription of Gana, which is only next to the Hatigumpha Inscription in point of artiquity, is in Prakrit. It is only when Kālidāsa (1st century B.C. or A.D.) and Bhāravi (5th century A.D.) had already added glory to the classical Sanskrit poetry (i.e. from the 5th century A.D. onwards) that we come across inscriptions which give an idea about the spread of classical Sanskrit Writings in Orissa. All the early epigraphic records of Orissa belonging to the Gupta and post-Gupta periods have been written in Sanskrit prose of great perfection. From the 7th century A.D., the epigraphic records in Orissa came to be composed or written mostly in Sanskrit poetry, though they are sometimes found in both (prose and poerty). The rulers of Medieval Orissa generally appointed vastly learned Sanskritists in their courts and these Sanskritists composed the epigraphs that have come down to us. The Bhauna copper plate grants, in their *praśasti* portions, provide us with very good specimen of Sanskrit poetry. From the Bhauna Period (736 AD to 945 AD), the Orissan Sanskritists seem to have developed a love for composing poetry with equivocal meanings—a clear influence of Bhāraṅ and Māgha.[2]

The origin of the *Mahākāvya* literature in Orissa can be traced back to the twelfth century A.D. when two poetic giants appeared on the arena of Sanskrit poetry—Jayadeva and Śrīharṣa. Tradition says—when the former was living at Kenduṇiva on the bank of ancient Prācī river in the Puri district, the latter migrated to Kanauj with his father Śrihīra as the court-pandit of Jayachandra. When Jayadeva took Vaiṣṇavism and Jagannātha-cult as the background of his गीतगोविन्द-महाकाव्यम् of twelve cantoes and pioneered a trend of lyrical *Mahākāvyas* on the theme of Rādhā and Krishna, Śrīharṣa followed the path of his previous *Mahākavis* like Bhāravi and Māgha to take a theme from *Mahābhārata* and took inspirations from *Kumārasambhavam* for delineating eroticism as the primary emotion in his नैषधीयचरितम्. These two poets of twelfth century A.D. were the source of inspirations for a very rich tradition of Sanskrit *Mahākāvyas* in Orissa. Their undisputed influence can be seen not only in Sanskrit, but also in Oriya *Mahākāvyas*. So the Sanskrit Paṇḍitas of the post-independence Orissa thought those Oriya *mahākāvyas* fit to be translated into Sanskrit and did this dilligently.

After Jayadeva and Śrīharṣa of the twelfth century A.D., कृष्णानन्द (13th century A.D), one of the forefathers of Visvanātha[3] took his mighty pen to compose सहृदयानन्द-महाकाव्यम् on the life-story of Nala - a theme once loved by Śrīharṣa.

Viśvanātha (14th century A.D.), the author of *Sāhityadarpaṇa*, is the next prominent Sanskrit *Mahākavi* in Orissa. While illustrating *Mahākāvya* (after giving its definition) in the Sixth *Pariccheda* of *Sāhityadarpana*, he refers to his *Mahākāvyas* by saying 'यथा—रघुवंशशिशुपालवध-नैषधादयः। यथा वा मम राघवविलासादिः।' Thus it seems he had some *mahākāvyas* to his credit. Till now, the traditions of Orissa ascribe him of two *mahākāvyas*—1. राघवविलासमहाकाव्यम् and 2. नरसिंहविजयमहाकाव्यम्।[4]

Orissa of the fifteenth century A.D. produced another great poet Kavicandra Ray Divākara Miśra who wrote two *Mahākāvyas*—1. भारतामृतमहाकाव्यम्[5] of twenty seven cantoes and 2. अभिनवगीतगोविन्दमहाकाव्यम् of ten cantoes. The second one was

written by him in the name of his patron, the king of Utkala, Gajapati Puruṣottama Deva (1466-1497 A.D.).

Then arose two *mahākavis* in the 16th century A.D.— Nārāyaṇa Bhañja Deva and Mārkaṇḍeya Miśra. The रुक्मिणी-परिणय-महाकाव्यम् of Nārāyaṇa Bhañja Deva deals with the love and marriage between Kṛṣṇa and Rukminī in six cantoes. Mārkaṇḍeya Miśra's दशग्रीव-वध-महाकाव्यम् describes poetically the story of Rāmāyaṇa up to the coronation of Rāma after the death of Rāvaṇa. It has twenty powerful cantoes.

In the seventeenth century A.D. there were four major *Mahākāvyas* in Orissa produced by three *Mahākavis*. The twenty two-cantoed वसन्तोत्सव-महाकाव्यम् is a poetic presentation of sciences, scenes on the background of which serenely flows the stream of Jagannātha cult. This outstanding and extra-odinary *Mahākāvya* was written by Haladhara Miśra (1611-1647 A.D). Mahākavi Jatīndra Raghūttama Tīrtha (1620-1680 A.D.)[6] wrote मुकुन्दविलासमहाकाव्यम् of twelve cantoes apparently presenting a vast erotic poem on the divine love between Kṛṣṇa and gopīs and internally illustrating the *advaita* philosophy.

Agnicit Paṇḍita Nityānanda (1680-1734 A.D). is another *mahākavi* who, in the last quarter of 17th century A.D. wrote शिवलीलामृतमहाकाव्यम् of ten cantoes and attributed its authorship to his patron Gadādhara Māndhātā (1657-1689 A.D), the Rājā of Navadurga of the ex-state of Nayagarh in the district of Nayagarh. He proceeded to Khaṇḍapaḍā, another state in the present Nayagarh district in the beginning of the 18th century A.D. (Probably after the death of the king Māndhātā) and wrote his second Mahākāvya—श्रीकृष्णलीलामृतमहाकाव्यम्—and attributed its authorship to his new patron Vanamāli Jagaddeva, the then chief of Khaṇḍ- apaḍā State (1723-1734 A.D.). When his first *mahākāvya* is a description of the glory of Bhuvaneśvara (Lord Śiva) of Ekāmrakṣetra of Orissa on the background of different episodes in various *purāṇas*, the second one is a description of the līlā between Rādha and Kṛṣna (the most popular subject of art and literature of the 17th century India) in eight centres.

Mahākavi Śītikaṇṭha was a famous poet in the 18th century Orissa. On the request of his patron Janardana Deva, the king of the Shergad State of the Ganjan district (in the second half of the 18th century A.D), he wrote *गीतसीतावल्लभमहाकाव्यम्,* a mega-poetry of twelve cantoes on the life of Rāmacandra upto his coronation at Ayodhya. *प्रद्युम्नसम्भवम्* of Govinda Miśra is another epic.

The flourishing trend of Sanskrit *Mahākāvyas* gradually died out after the fall of the Orissan Emperor Samrāt Mukunda Deva (1560-1568 A.D), the last Hindu Emperor of India. After Mukunda Deva, Orissa experienced the administration of Akbar—first indirectly through Sulaiman Karrani, the Sultan of Bengal and then directly since 1576 A.D. A change to a foreign administration and rise of Oriya *Mahākavis* gradually ungreased the wheels for a final halt in the nineteenth century A.D,. Fortunately 20th century saw a renaissance in Sanskrit studies in Orissa. As a result, we find, though rarely, two types of Sanskrit *Mahākāvyas* in the post-independece era—(1) Original Sanskrit *Mahākāvya* and 2. creative Sanskrit translations of Oriya *Mahākāvyas.*

Original Sanskrit Mahākāvyas:

Late Pt. Ananta Tripathy Sharma[7] has written a useful essay, "विंशशताब्यामुत्कलस्य संस्कृतसाहित्यावद्यनम्" in his collection of essays in Sanskrit entitled *निबन्धमाला.*[8] Here, he has briefed about some of the Sanskrit *Mahākavis* in the post-independence Orissa.[9] We learn from him that विश्वनाथ महापात्र, late principal of Sadāshiva Sanskrit Vidyāpītha at Puri wrote a Mahākāvya named *काञ्चीविजयम्.* Dr. Sharma writes about it in the following words—"अस्य रचना कविकुलगुरोः कालिदासस्य रचनेव निसर्गसरसा भावप्रवणा वैदर्भी रीति-भासुरा सहृदय मनास्यार्जयितु क्षमा।"[10] He also mentions about महाकवि यति-राजाचार्य, the author of the *mahākāvya* named माधवविलासम्।[11] We shall discuss more about him, later, as the most prominent Mahākavi of Orissa in the post-independence era. रामनाथ नन्द विद्याभूषण, the court poet of the king Vikramadeva Barman of Jayapur, of the Koraput district, Orissa, wrote a historical

Mahākāvya called *जयपुर-राजवंश-चरितम्*. The *Mahākavi* is famous for his mini-*Khaṇḍakāvya* called *शतार्थपद्यम्* that has one hundred meanings as expositioned by himself. Pt. Sharma describes his works saying "अस्य रचना निसर्गमधुरा भावपूर्णा सरसा च।"[12] Another *Mahākavi* गणेश्वर तर्कवाचस्पति flourished in Bhawanipatna and was the courtpoet of the king of Kalahandi before independence. Pt. Sharma enlists his *Mahākāvya पुरुषोत्तमदेवविजयं महाकाव्यम्*, known for its pedantry and vividity.[13]

The mega-poet सरस्वती श्री दामोदर शर्मा was the chief of the Paṇḍitas in the royal court of Kanikā. He was conferred with the title सरस्वती and was regarded as the male form of सरस्वती by the king of Kanikā. He has numerous Sanskrit works including *नैषधसारः* a summary of the *नैषधीयचरितम्* of Śrīharṣa, and a *Mahākāvya* named *कनकवर्षचरितम्*, that poetically expositions the history of the kingdom of Kanikā.[14]

Rādhāmohan Baxi an extraordinary Sanskrit Paṇḍita who lived at Chikiti (in Ganjam district in the post-independence Orissa, wrote a *Mahākāvya* named भारतानुवर्णनम्।[15]

विश्वनाथ वर्मा, a local king of Orissa has written Mahākāvya named *रुक्मिणीपरिणय* with the help of his court-pundit भुवनेश्वर रथशर्मा[16]. He has written a *Mahākāvya* named *सुलोचना परिणयम्*[17]. But Pt. A.T. Sharma does not mention anything of their whereabouts.

The Mega-poet Yatirājācārya

Mahākavi Yatīrājācārya (1900-1979 A.D.) seems to be one of the very rare and most talented Sanskrit poet in the post-independence India. Just as Kālidāsa aroused his poetic genius through the perfection (Siddhi) in the incarnation of सरस्वतीमंत्र, Śrīharṣa through the चिन्तामणिमन्त्र and Upendra Bhañja (a highly talented medieval Oriya Mahākavi) through the रामतारकमन्त्र, Yatirājācārya took very extremes steps in order to attain हयग्रीव-मन्त्रसिद्धि under the guidance of his grandfather

Pt. Nārāyanācārya who himself was a devotee of हयग्रीव. The enormous and amazing poetic talent and pedantry that showered upon Yatirājācārya on account of the supernatural impact of the *mantra* can be guessed from a small list of his works given here under.

Among his numerous works, *कलाकरविलासः* (भाण), *कंसनिसूदनम्* (व्यायोग), *स्यमन्तकाभ्युदयम्* (नाटक), *भगवत्-स्मृति-शतकम्* (शतककाव्य), *सम्प्रदायप्रदीपः*, (धर्मशास्त्र) *परमार्थप्रदीपः* (आत्मविद्या), *सुदर्शन-यज्ञ-पद्धतिः* (which includes *अनन्तवासुदेवयज्ञ* for offsprings, *हयग्रीव-यज्ञ* for knowledge and wisdom and दृष्टियज्ञ for eyesight) औषधिप्रकरणम्' (आयुर्वेद), *सटीक-पञ्चसूक्तम्* (a commentary work on पुरुषसूक्त and लक्ष्मीसूक्त etc.) and above all *माधवविलासमहाकाव्यम्* are primary ones.[18]

Born in a very gifted and orthodox Brahmin family in the village Suvarṇapura of the Ganjam district in south Orissa, he grew to be the court-poet of the then king of the Jaradā, whose royal fort was not far off. The great-grandson of *Paṇḍita Śrīkarācārya*, the celebrated author of *सारस्वतब्रह्म संहिता*, the *Mahākāvi* had a strong cultural background to his poetic talent.

माधवविलासम् is called as a काव्य by the poet himself. But since it is not a poetry of a small encompassment, it cannot be categorised as a *Khaṇḍakāvya*. Pt. A.T. Sharma has also called it a महाकाव्य[19]. When the poeticians including विश्वनाथ accept the minimum limit of eight *sargas* to term a poetry as *Mahākāvya*, यतिराजाचार्य's work contains huge fifteen *sargas*. At the end of the last canto, the *Mahākavi* writes in the colophone—तस्य श्रीहयशीर्षमन्त्र-महिम-स्तोमावदातात्मनो ह्याचार्यान्वय-भूषणस्य यतिराजाख्यस्य संख्यावतः चञ्चत्पञ्चदशात्मकेन नितरां सर्गेण सत्राधुना काव्यं नव्यमिदं हि माधवविलासाख्यं गतं पूर्णताम् ।। श्री हयग्रीवार्पणमस्तु ।'' All the characteristics of a *Mahākāvya*, as described in the *Sāhityadarpaṇa* (6th *pariccheda*) of Viśvanātha are also found in माधवविलासम्—with the only exception that it takes its theme neither from रामायण nor from महाभारत, but from भागवत (which is conspicuous with the

absence of राधा). The *Mahākāvya* employs *bhakti* or भगवत् शृंङ्गार as its primary emotion and describes, with all poetic freshness and ecstatic play of *yamaka* and *anuprāsa*, the supernormal love and valour of the Lord Kṛṣṇa right from his birth to the death of Kaṇsa.Taking the occasion of *Kṛṣṇa's* rāsa with the *gopa*-girls described by him so flavourously in the 13th canto (written in *upajāti* metre) as the pivatal point, the *Mahākavi* has named his work as the माधवविलासम्. Viśvanātha's राघवविलासम् might have been a source of inspiration for coining such a name. Even the मुकुन्द-विलासमहाकाव्यम् of Jatindra Raghūttama Tirtha can be seen as a possible ideal before यतिराजाचार्य for the name as well as the theme of his *Mahākāvya*. But a keen observer would find that he was eager to accept as his ideal a poet not less than the stature of Śrīharṣa. Moreover the Mādhava-cult is very famous in Orissa as a sprinting fallout of the Jagannātha-cult. The Rādhā-Mādhava and Nīla-mādhava temples formed the central points of the Kṛṣṇa-cult in order to provide the glorified and deified eroticism as a psychological ammunition against the Śaiva-cult in Orissa. Inspired by the philosophy of this cult, Jayadeva wrote his गीतगोविन्दम् wherein the word 'माधव' occurs serveral times. Thus the *Mahākāva* माधवविलासम् symbolises not only the *Mādhava*-cult, but also the literary union of two streams generated by Jayadeva and Śrīharṣa.

In the post-Kālidāsion era the themes of *Mahākāvyas* were usually collected from *Mahābhārata* and were having *vīra-rasa* as the main emotion, probably because the *Mahākavis* were afraid of the Jainas and Buddhists who were bitterly, critical of Kālidāsa's eroticism. It is Śrīharṣa who revived the eroticism of कुमारसम्भवम् in his own *Mahākāvya*, seeing the fame of Jayadeva and drew his theme from *Mahābhārata* as well. यतिराज combined Jayadeva's sublime eroticism and Śrīharṣa's articulate and well-measured style. His inclination towards Śrīharṣa is easily understood from the features of his work. Like Śrīharṣa, he has given his identity at the end of each canto. For exemple, at the end of the ninth canto, he says:—

आसीद् गौतमवंश-दुग्ध-जलधेर्मुग्धेन्दु-लीलायित-
श्रीनारायण-सूरिराय-तनय-श्रीमोहनाचार्यजः
विस्फुर्जज्जरठा-नरेश-परिसद् वित्तरो भूसुरः
शूरः श्रीयतिराज-पण्डितवरः श्रोश-प्रपत्यादरः।।
साहित्य-त्रिविधागमान्त-निगमाचारोक्ति-शब्दाश्रया
वाणी-क्राणभुजी च यस्य वदने स्वैरं नरीनृत्यते
भव्ये नव्यतरे च माधवविलासाख्ये सुकाव्येधुना
तस्यायं नवमो जगाम नितरां सर्गो निसर्गोज्ज्वलः।।

(There was an outstanding Brahmin pundit, in the court of a valourous king of Jarada, who was the son of Śrī Mohanācārya, the son of Śrī Nārāyana—a beautiful moon dangling in the ocean of milk of Gautama clan. He was the head of Panditas (in the court), a greatman having inclination to the devotion for Viṣṇu. His name is Śrī Yatirāja, in whose mouth wishfully dance the goddess Sarasvatī (or speech in general) settled on the words of poetry, three Vedas, Vedāṇga and Upaniṣads—and the particles of Paṇinian grammar in the form of (fried) rice-grains . Here ends the naturally lusturous ninth canto of the beautiful and new epic named *Mādhavavilāsam* of that pundit.)

Śrīharṣa used to give such a verse of self-introduction at the end of each of his *Mahākāvya*. For example—

श्रीहर्षः कविराज-राजि-मुकुटालङ्कार-हीरस्सुतं
श्रीहीरस्सुसुवे जितेन्द्रियचयं मामल्लदेवी च यम्
द्वैतीयीकतया मितोऽयमगमत तस्य प्रवन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः।।

(नैषधीयचरितम्, 2/110)

In every nook and corner of the माधवविलासम्, Yatirāja has made his presence felt as the king of emotions. He is proved to be a very unusual and desirable combination of an outstanding pundit and appeasing *rasika*. The tremendous control over the apt usage of words is his striking similarity with Śrīharṣa. Although it is not unmanifest that he sincerely wishes to protect the flow of *rasa*, by the *Kavaca* of words, from the non-aesthetes and non-pundits, the curve of magnetic meaning, the uninhibited flight of

imagination and the jingling juggle of words he has served for the learned and aesthete were rarely found in the post-Śrīharṣan India. It is easy to pick up any verse of his epic for demonstrating the fact. He worships at the feet of Nārāyaṇa (which is again the same of his *sādhanā-guru* and grandfather) in the following manner—in the first verse of the first canto :

नमन्निलिम्पावलि-मौलि-विस्फुरत्
किरीट-माणिक्य-मरीचि-रोचिभिः
चिराय निराजन-राजि-राजितं
स्मरामि नारायण-पाद-सारसम् ।। (*माधवविलासम्* 1/1)

Thus the alliterative magic has given no way to unintelligibility. Similarly, in the second verse, he pays his obeiscence to Sarasvatī whose mercy inspired him to write poetry—

सरस्वती-पाद-सरोरूहोदर-
स्फुरत्पराग-प्रसर-प्रसादतः
भवे भवेयं कविता-वितानकः
प्रकल्पनारम्भ-विजृम्भिताननः ।। (*माधवविलासम्* 1/2)

After demonstrating a part of his prowess in *anuprāsa* in the first verse, he now gives a short flash of his expertise in *yamaka* in the second one. He is a master both, but never at the cost of the clarity of meaning. In the third verse, he pays his *praṇāma* to Hayagrīva, the giver of his *Mantrasiddhi*, for collecting the power and patience in order to cross over the ocean of writing a new epic—

रस-प्रसङ्ग-प्रसर-प्रसन्नतो-
न्नतोक्ति-काव्य-ग्रथनार्णव नवम्
हयाननोदार-पदारविन्दयोः
समेत्य सेवातर्राणं तराम्यहम् ।। (*माधवविलासम्* 1/3)

Writing on epic, as described by the poets, is as difficult as boating across a defiant and furious ocean. So Kālidāsa has said in the beginning of रघुवंशम्–

क्वसूर्यप्रभवो वंश क्व चाल्पविषया मतिः
तितीर्सु दुस्तरं मोहाद् उडुपेनास्मि सागरम् ।।
(*रघुवंशम्*, 1/2)

Such a poetic humility (काव्यविनय) is an Indian tradition. Keeping himself in the tradition Yatirāja says:

सुनव्य-काव्य-व्यवसायिनं सतां
समक्षतो यत् कविधर्ममुत्सहे
सुधांशु तारो-रुचिरे नभोजिरे
चिरणे खद्योत इवास्मि केवलम्।। (*माधवविलासम्* 1/5)

Expressing, again, his humility the poet apprehends that his epic is bereft of the sweetness of emotions and expects that his beloved reader would lend their mind to it since it is nothing but a description of the glory of Lord Krishna:

मम प्रवन्ध रस-साधु माधुरी
धुरोणभावैर्विधुरीकृतो यदि
तथापि दास्यन्ति मनांसि सज्जना
र्जनार्दनस्यात्र तु कीर्त्ति-कीर्त्तनात्।।
(*माधवविलासम्,* 1/6)

This verse reminds us a verse of Śrīharṣa, who says that although his language is not very much distilled, the sacred theme of the Nala-episode shall cleanse it to serenity:

पवित्रमत्रातनुते जगद्युगे
स्मृता रसक्षालनयेव तत्कथा
कथं न सा मद गिरमाविलामपि
स्वसेविनोमेव पवित्रयिस्यति।। (*नैषधीयचरितम्,* 1/3)

The अरसिकs and poetry-haters are always rebuked in our tradition in the phrases like 'साक्षात् पशुः पुच्छ-विषाणहीनः' or 'अरसिकेषु रसस्य निवेदनं शिरसि मा लिख मा लिख मा लिख'. Being in the tradition of praising the good readers (साधु) and rebuking the poerty-haters (दुर्जन) यतिराज says that although his poety is powerful enough in serving the sweetness of emotions by becoming the flow or moon-light, it shall not be pleasant to the ears of non-aesthetes and unexpertised readers and shall lose its prestige, just as a Brahmin girl loses her prestige after landing upon the court-yard of a low-caste man habituated of eating the flesh of dogs:

सुधांशु-धारायित-काव्य-सद्रस-
प्रसाधु-माधुर्य-धुरन्धरापि वाक्
न शोभते दुर्जन-कर्ण-चत्वरे
द्विजाङ्गनेव श्वपचाङ्गणं गता।। (*माधवविलासम्* 1/7)

Another similar verse—

सदा सदास्वाद्यतमं कवेर्वचः
खलस्य किं स्वाद्यतमं समञ्चति?
यथा चकोरीचय-चित्त-मोदिनी
न चन्द्रिका पेचक-रोचनीयका।। (*माधवविलासम्* 1/8)

In the beginning of the story, the poet describes व्रजनगरी in the following manner:

पुरन्दरोदार-पुरी-सहोदरी
व्रजाभिधाना नगरी गरीयसी
मणिधृणिश्रेणी सूरामणीयका-
मुदा वरीवर्त्ति सदा सदाश्रया। (*माधवविलासम्*, 1/12)

A description of a morning in that imaginary city stretches reader emagination in order to create a preparatory mood for reading the *Mahākāvya*—

यदीय-गारुत्मत-चारुमन्दिर-
प्रवाल-जालोचित-शेखरच्छविः
जहार पूर्वांचल-मौलि-सम्मिलत्
प्रभात-हेलि-स्फुटमण्डल-श्रियम्।। (*माधवविलासम्* 1/17)

Similarly—

यदीय-सौधाग्र-नटत-पताकिकास्त्र
प्रजात-वातायन-वर्त्मगोनिलम्
दिवि प्रशंसन्ति विलासमन्दिरे
रतान्त-विश्रान्त-विलासिनीजनाः।। (*माधवविलासम्* 1/18)

(In that Braja city, the winds produced from the flags fluttering on the top terrace of the buildings enter the bed-room's sky through the windows and are thankfully praised by the love-languid women).

This verse reminds the description of morning in Ujjainī by Kālidāsa:

यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इवं प्रार्थना-चाटुकारः।। (*मेघदूतम्* 1/32)

In the description of the market road of the Braja city. यतिराज has Kālidāsa in mind—

अगण्य-पण्य-व्रजसम्पदां पदं
पदे पदे भाति यदोल्वणापणः
इतस्ततस्तद् व्यवहार-वर्त्तिभिः
जनैः समन्तात् परिपूर्णमण्डलः।।
स्फुरन्महन्मौक्तिक-हार-भारिणी
मणीगणालङ्करणातिवन्धुरा
सुवर्णकारादृत-पण्य-वीथिका
विभर्ति यस्मिन् पणिताधिकश्रियम्।। (*माधवविलासम्* 1/55-56)

The beatitude of the description of the *parikhā* surrounding the Braja city is eye-catching:

विशाल-चन्द्रोपल-सेतु-हेतुना
महागभीरा परिखा समन्ततः
निशीन्दु-पाद-श्रुत-वारि-धारिणी
विभाव्यते यत्र सदा सुदुस्तरा।। (*माधवविलासम्* 1/64)

It is again a real pleasure to read the description of the King Nanda of that city:

पुरन्दरोदार महामहातपा
धनाधिपश्रीः पुथुतुन्द-सुन्दरः
अमन्दजानन्द्यु रत्र वन्दितो
ननन्द नन्दाख्य-मही पुरन्दरः।। (*माधवविलासम्* 1/67)

King Nanda's bountifulness has made him more attractive than the heaven—

यदीय-विश्राणन-कीर्त्ति-विश्रुतौ
जनै र्न कर्णादरता कृता तथा
अपारिजातं तमुपाश्रयन् जनो
न पारिजाताश्रयणे मनो ददौ।।[20] (*माधवविलासम्* 1/67)

The water shed during the declarations of sumptuous gifts by Nanda filled the rarely dry ponds where swam his fame in the form

of white swans :

अमुष्य विश्राणन-नीर-पूरकैः
प्रपूरिते शुष्क-जलाशयोदरे
अदो यशोव्रात-मराल-मालया
व्यखेलि तत्रैत्य च मोदमानया।। (*माधवविलासम्,* 1/71)

In the second canto, Earth (भूदेवी) frightened by the oppression of Kaṁsa is going to meet Brahmā—

अथ दृप्तधरावरासुरै
र्गजयूथैर्नलिनीव मर्दिता
परमेष्ठिपुरं दरातुरा
वर-गोरुपधरा धरा ययौ।। (*माधवविलासम्* 2/1)

Any verse of यतिराज is exceptional in one or other way. Let us see the super-human beings attending upon Brahmā:

वर-झर्झर-पालिकाधरा
नव-विद्याधरपल्लवाधरां
कलयन्ति च गानतानता-
लय-सन्धान-विधान-कौतुकम्।। (*माधवविलासम्* 2/7)

Similarly, when Brahmā leads the gods to Hari reposing in the milk-ocean and informs him of the havoc raked up by Kaṁsa, he says—

चरणं भवतः कृपानिधे
शरणं न सततं हतौजसां
भरणं हृदयस्य यद् विभो
स्मरणं ते विपदां विदारणम्।। (*माधवविलासम्,* 2/23)

The description of the rising moon in the 13th canto materialised the उद्दीपन-विभाव for the रास of the Gopa-girls with Kṛṣṇa:

पौरन्दरी-दिग्वनिताङ्ग-सङ्ग-
स्फुटाङ्गरागारुण-चारुमूर्त्तिः।
नक्षत्रमाला-रुचिरोम्वरश्रीः
रराज राजा निजमण्डलाढ्यः।। (*माधवविलासम्* 13/12)

The moon-lit atmosphere encouraged Kṛṣṇa to invite the *gopāṅganās* through the magic of his flute:

शीतद्युतिं वीक्ष्य विराजमानं
तत्कौमुदी-दीपित-काननं च
रन्तुं हरि र्गोपविलासिनीभि
र्वंशी-निनादं कलयाञ्चकार।। (*माधवविलासम्* 13/13)

The galvanising impact of that flute-play is described beautifully at a good length. The first verse of the description is—

तन्नादमाकर्ण्य विधूर्णमाना
निर्गीर्ण-कर्णामृत-वर्णपूर्णम्
तूर्णं तदभ्यर्णमितुं प्रयुक्ताः
पूर्णेन्दुवक्त्राः पशुपालकानाम्।। (*माधवविलासम्*, 13/14)

Throughout the epic यतिरात has expresssed in unalloyed instinct for *anuprāsa* and *yamaka* and decorates his poetry with the adorning sounds of his choicest poetic words—without hindering the progress of the story and without marring the steady flows of emotions. He has seen poetry as a beautiful goddess and himself as a poetic decorator. Perhaps Bāṇabhaṭṭa's 'कथा जनस्याभिनवा वधूरिव' was his philosophy of poetry. And he is so hopeful of the future of Sanskrit poetry—

सुशास्ति चेद् वाग् अनुसज्जनानना-
सनासनादात्म सनातनोत्तरम्
कवे र्भवेद दुर्जन-वाक्य-दुर्जरा-
पवादसादा किमु सारभारती? (*माधवविलासम्*, 1/10)

[In its post-Vedic form, if the words of a poet (in Sanskrit)] resting on the seat in the form of the mouths of learned readers, imparts right education, then can the speech or Sarasvatī languish at the sentences missiled by *durjanas*?]

Mahākāvyas in Sanskrit Adaptation

There is another trend of creating Sanskrit *Mahākāvyas*, i.e. that of translating the celebrated Oriya *Mahākāvyas* into Sanskrit. The leading trend-setter in this line is Pt. Ananta Tripathy Śarmā who translated Upendra Bhanja (1680 A.D)'s celebrated Oriya *Mahākāvya—Lāvaṇyavatī.* His adept and highly creative translation of this unique and classic work of the first decade of

eighteenth century has given him the honour of a *Mahākavi*. A few renderings of the second canto (description of the kingdom of Simhala)—

रत्नाकरोरसि चकास्ति विचित्ररूपो
रत्नांशुकैरुपहसन्नपरान् प्रदेशान्।
दानेन कर्णमधरं परिकल्पयद्भि–
र्द्वीपो युतोऽतिधनदै किल सिंहलाख्यः।।1।।
यस्मिन् कदर्थित-महेन्द्र-पुर-प्रभावे
हर्म्याणि स्वर्णकलसैरुपशोभितानि।
तावद्भिराढ्य-जनता-विभवानुरूपैः
प्रत्येक-कोटि-कनकायमनु प्रक्लुप्तैः।।2।।
गोरोचनेव शवरै मृगनाभिजातं
विक्रीयते खलु पुरातन-वस्त्रखण्डैः।
वामाश्च कुङ्कुम-रजोऽञ्चित-चारुगात्रा
नो जातु मानसपटे दधते हरिद्राम।।3।।
मार्गस्य शोधनकृते रज आप्तुकामा
भारै र्वहन्ति मनुजा रजनीकरौघम्।
वैद्यै र्हरीतक-फलानयने प्रयुक्ता
जातीफलानि र्बहुशः शकटै र्वहन्ति।।4।।
सिंहै र्विदीर्ण गज-मस्तक-मौक्तिकानि
रक्ताञ्चितानि रजनीविगमे शवर्यः।
संचिन्त्य शोधनपरा वदरीभ्रमेण
कम्यानि नेति परितो विपिने क्षिपन्ति।।5।।

X X X

पद्माकरः खलु पुरं विलसन्ति पद्मा
स्तासां च दास्यमितरा ललनाः श्रयन्ते।
गायन्ति किन्नरगणाः सह किन्नरीभिः
स्वर्गो नु भाति भुवने विहतावतारः[21]।।2।।

चन्दामामा—चन्दामामाप्रकाशक चन्दामामाभवन चेन्नईद्वारा प्रकाशिता विभिन्न-भाषाविषयका पत्रिका *चन्द्रमामा* नाम्नेति। तत्र *चन्दामामा* संस्कृतमासपत्रिकायाः प्रकाशनं 1983 वर्षतः जायते। सचित्रकथा प्रधानपत्रिकायमत्र विविधविषयकाः वालमनोरञ्जिनी कथाः प्रकाश्यन्ते। अन्यासु भाषाष्वपि एषा पत्रिकातीव लोकप्रिया सर्वजनग्राह्या चास्ति। अस्या सम्पादकः नागरेड्डिमहोदयः परं कर्गजाभावात् 1998 वर्षस्य नई मासतः एषा पत्रिकास्तंगता प्राय।[11] एतेन एकस्याः मनोरम-सुन्दर-ललित सरसभाषाऽप्लावितायाः पत्रिकायाः अवसानम् अनुभूयते।

लोकसुश्री—लोकभाषाप्रचारसमिते मासिकीमुखपत्रिका *लोकसुश्रीः* 1987वर्षतः लोकभाषाप्रचारसमितिः बड़ओडियामठ-पुरी-उडीसातः प्रकाश्यते। एषा राधा-वल्लभमठाधीशः श्रीकृष्णचरणदासमहाराज्ञः संरक्षकत्वे प्रकाशतामेति। अस्यां पत्रिकायां सरलसंस्कृतभाषया लेखाः कविता कथाः भवन्ति सहैव संस्कृतभाषायाः प्रचाराय प्रसाराय कृतभूमिश्रमस्य लोकभाषा प्रचारसमितेः सम्पूर्णे विश्वे आयोजितानां संस्कृतकार्यक्रमाणां शिविरविवरणानां सविस्तरं विवरणं भवति। अस्या संस्थायाः शाखा सम्पूर्णे देशे वर्तते एव तत्र नेपाल-इण्डोनेशिया-मारिशस-हांगकांग प्रभृतिदेशेषु समितेः प्रचारकाः संस्कृतस्य प्रचारं कुर्वन्तः सन्ति। अस्याः सम्पादकाः

समितेः सचिवाः श्रीसदानन्ददीक्षितमहोदयाः संस्कृतप्रचाराय संलग्नाः सन्ति। अस्याः पत्रिकायाः वार्षिकं शुल्क विंशतिरुप्यकाणि सन्ति।

सत्यानन्दम्—श्रीसत्यानन्ददेवायतनम् संस्थायाः संस्कृतपत्रिका *सत्यानन्दम्* 1 आई. पी .रोड़ यादवपुरम् कलिकातातः 1987 वर्षतः प्रकाश्यमानास्ति। अस्याः उपदेष्ट्रमण्डल्यां सत्यानन्दमानसकन्या श्रीअर्चना पुरीमाता अन्ये च विख्याता विद्वांसः। अस्याः सम्पादकौ श्री मृगानन्दः डॉ. कुमारनाथभट्टाचार्यश्च भास्करनाथभट्टाचार्यः सहसम्पादकः वर्तते। अस्याः पत्रिकाया मुख्यमुद्देश्यं साधारणजनानां मध्ये सरलसंस्कृतस्य प्रसारमाध्यमेन संस्कृतं प्रति सुप्तानुरागस्य पुनर्जागरणम्। सरलसंस्कृतभाषया हिन्दूधर्मस्य संस्कृतेश्च प्रचारमाध्यमे उच्चत्तरमूल्यबोधस्य जागृतिः तथा दिव्य जीवनचर्चायाः दिङ्निर्देशः। व्यवहारिकभाषारूपेण संस्कृतस्य प्रयोगमाध्ययेन गृहे-गृहे शान्तेः तथा आनन्दस्य वाणीवितरणम्। तथाहि—

संस्कृतात् सत्यमानन्दम् विन्दमानाः शिवास्पदम्।
श्रीगुरुं संस्कृतात्मानं सत्यानन्दं भजामहे।।

सम्प्रति पत्रिकेयं हरिसत्यानन्दचैरिटिबलट्रस्टस्य स्वामीहीरानन्दस्य संरक्षकत्वे प्रकाश्यते।

अभिनवसंस्कृतम्—पुनरपि लसतु संस्कृतं गृहे-गृहे इत्युद्घोषेण डा.शिवबालकद्विवेदी-महोदयानां संस्थापकत्वे निदेशकत्वे च 3/129 विष्णुपुरी, कर्णपुरम्, उत्तरप्रदेशतः *अभिनवसंस्कृतम्* मासिकपत्रिका प्रकाश्यते। अस्याः पत्रिकायाः प्रकाशनं 1992 वर्षतः डॉ. सुमनमिश्रा श्रीमती पुष्पाजोशीमहोदययोः सम्पादकत्वे जायते। अस्यां शोधपूर्ण लेखा-समाचाराः तया कस्याप्येकस्याः पत्रिकायाः सविस्तरं विवरणं मिलति। पत्रिकायां चतुर्विशेषाङ्काः प्रकाशिता। अस्याः वार्षिकं शुल्कं 131 रुप्यकाणि सन्ति।

सम्भाषणसन्देशः—प्रकाश्यमानासु सर्वासु मासिकपत्रिकासु *सम्भाषणसन्देशः* स्वसरलसंस्कृतभाषया, सुन्दरमनोहरसङ्गाणकमुद्रितेन आकर्षकसाजसज्जया विविधवर्णवर्णितया लेखादिवैशिष्टयेन विशिष्टं स्थानं भजते। अरक्षम् 8 क्रास II फेज गिरिनगरम् बेंगलूरतः प्रकाशितं पत्रिकेयं 1994 वर्षतः सततं वर्द्धमानास्ति। अस्याः पत्रिकायाः सम्पादकः विश्वासः निर्वाहकसम्पादकश्च जनार्दनहेगड़े वर्तते। अत्र संस्कृतभाषाप्रचारार्थं हितसाधनार्थञ्चविशेषलेखाः-कथा-बालमोदिनी-धारावाहिनी-स्थिरशीर्षकेषु मनोहरा रुचिपूर्णा ज्ञानात्मकाश्च लेखाः प्रकाश्यन्ते।

संस्कृतभाषां प्रतिजनरुचिवर्धिका बालाभिरुचिसंवर्द्धिकाश्च कथा-आख्यानिका व्यङ्गलेखा प्रहेलिका सचित्रं प्रकाश्यते। अस्याः विशेषांङ्क सोत्साहेन पाठकैः पठ्यते। सम्पूर्णेराष्ट्रे अद्यत्वे संस्कृतमासिकपत्रिकासु एषा पाठकानां संख्यादृष्ट्या प्रकाशनदृष्ट्या प्रसिद्धिदृष्ट्या च प्रथमं स्थानमवधारयति। नूनमेषा पत्रिका स्वीकरणीया। अस्या वार्षिकं शुल्कं अशीति रुप्यकानि प्रत्युङ्कस्य च सप्तरूप्यकाणि वर्तन्ते।

रावणेश्वरकाननम्—बिहारप्रदेशसांस्कृतिकराजधानी वैद्यनाथधामतः प्रकाशिता *रावणेश्वरकाननम्* मासिक पत्रिका 1996 वर्षतः प्रो. मोहनानन्द मिश्रमहोदयानां सम्पादकत्वे निरन्तरं प्रकाश्यते। श्री अभयकुमारशर्राफ महोदयस्य संरक्षकत्वे एषा *चिताभूमि* चन्द्रदत्तद्वारीरोड, पो. टी. विलासी-814117 वैद्यनाथधाम, देवधर बिहारतः प्रकाशिता। अस्यां वैदुष्यपूर्ण सम्पादकीय-विविधलेखाः—पद्यानि-ह्रास्यव्यङ्गवार्ता—संस्कृतपाठाश्च प्रकाश्यन्ते। अस्यां पत्रिकायां सरलमाध्यमेन संस्कृतभाषा शिक्षणार्थमेका सरणि प्रारब्धा वर्तते यस्यां संस्कृतभाषायाः ज्ञानं सम्यक् प्रकारेण कार्यते। संस्कृतजिज्ञासूनां कृते नूनमेषा पत्रिका संग्रहणीया। अस्याः पत्रिकायाः वार्षिकं शुल्कं चत्वारिंशत रुप्यकाणि सन्ति।

अमृतभाषा—डॉ. रामकुमारचन्द्रमिश्रमहोदयस्य सम्पादकत्वे हल्दीपरा बालेश्वर उड़ीसातः प्रकाश्यमानां *अमृतभाषा* संस्कृतस्य मासिकपत्रिका वर्तते या 1998 वर्षतः प्रकाश्यते। पत्रिकायाः कलेवरेण समाचारपत्रवत् प्रतिभाति यस्यां राजनीतिकविषयानां समाचारः सरलसंस्कृतभाषया भवति। अमृतभाषा हि संस्कृतमित्युद्घोषेणेयं संस्कृतं राष्ट्रभाषां कर्त्तुं, संस्कृतं पाठ्यक्रमे बाध्यतामूलकं मा भवतु, सर्वेसंस्कृतज्ञाः संस्कृतं वदन्तु, संस्कृतमाध्यमेन पाठयन्तु, संस्कृतस्य प्रचारं प्रसारञ्च करोति। अस्याः पत्रिकायाः वार्षिकं शुल्कं चतुर्विंशति रुप्यकाणि प्रत्यङ्कस्य रुप्यकद्वयम् अस्ति। पत्रिकायाः घोषः वर्तते एकसहस्रं रुप्यकाणि दत्वा अमृतभाषायाः प्रतिष्ठात् सदस्याः भवन्तु अमृतभाषां दैनिकपत्रं कर्त्तुं साहाय्यं कुर्वन्तु इति।

आर्षज्योतिः—श्रीमद्दयानन्दवेदविद्यालयस्य मासिकं पत्रं *आर्षज्योतिः* तमसो मा ज्योतिर्गमय इत्युद्घोषेण एषा मासिक पत्रिका, 119, गोतमनगरम् नव दिल्लीताः-110049 प्रकाश्यत। अगस्त 1998 वर्षतः प्रकाशितायाः अस्याः पत्रिकायाः संस्थापक आचार्यहरिदेवः संरक्षकश्च दिल्लीसंस्कृताकादम्याः सचिवः श्रीकृष्णसेमवालः। अस्याः प्रधानसम्पादकः डॉ. नारायणः वर्तते। पत्रिकाया

लक्ष्यमस्ति संस्कृतं व्यवहारपदं प्रापयितुं सरलोपायेन प्रयासः। अनुपलब्ध प्राचीनसंस्कृतसाहित्यस्य अन्वेषणम्। वैदिकसिद्धान्तानां वैज्ञानिकरीत्या उपादेयत्वं साधयित्वा वेदविज्ञानयो सामञ्जस्य स्थापनम्। पत्रिकेयं प्रतिमासं पञ्चविंशतितारिकायां प्रकाश्यते। अस्याः वार्षिकं शुल्कं पञ्चाशत् रुप्यकाणि प्रत्यङ्कस्य च पञ्चरुप्यकानि वर्तन्ते। अस्यामार्य जीवनदर्शनं गुरुकुलीय पद्धत्या वैशिष्ट्यं सम्यक् प्रकारेण द्रष्टुं शक्यते।

संस्कृतपत्रिकाया अद्य मासिकपत्रिकारूपेणैव जातम्। स्वतंत्र भारते अनेका मासिकीपत्रिकाः प्रकाशिताः तासु काश्चनस्तंगता काश्चन् नूतनाऽऽविर्भूताः। सम्प्रति वींशतीसंस्कृतस्य मासिकपत्रिकाः प्रकाश्यन्ते। ताषु *भारती, संस्कृतामृतम्, पारिजातम्, सम्भाषणसन्देशः रावणेश्वर-काननम्* प्रभृतयः अन्यतमाः सन्ति। नूनं संस्कृतज्ञैः एताः पत्रिकाः संरक्षणीया। स्वरचनाभिः अभिव्यक्तिभिः पत्रिकायाः ग्राहकत्वं स्वीकृत्य च। एतेन संस्कृतपत्रकारिता चिरस्थायी भविष्यन्ति।

स्वतंत्रभारते 1910 वर्षे हरिद्वारतः प्रकाशिता *भारतोदयः* 1924 वर्षे वाराणसीतः प्रकाशिता सूर्योदयश्च भारतस्य उदयद्वयं सूर्यचन्द्रं चोदयतः अद्यापि स्वप्रभया भारतं भारतं करोति संस्कृतपत्रकारिता जगति चकास्तः। इमे द्वे पत्रिके पत्रकारितायाः आधारभूते ये स्वतंत्रतायाः पूर्वम् उत्तरं च योजयतः।

द्वैमासिकम्

मालवमयूरः–अस्याः पत्रिकायाः प्रकाशनं श्रीरुद्रदेवत्रिपाठिमहोदयानां सम्पादकत्वे मन्दसौरः मध्यप्रदेशतः जातम्। 1946 वर्षतः प्रकाशिता इयं पत्रिका मासिक आसीत् अनन्तरं द्वैमासिकरूपेणस्याः प्रकाशनं जातम्।

भारतीविद्या–स्वामीचिन्मयानन्दमहोदयानां सम्पादकत्वे मकरन्दनगर फत्तेहगढ़त *भारतीविद्या* द्वैमासिकपत्रिकायाः प्रकाशनं 1950 वर्षतः प्रारब्धम्। मधुरवाणी-पत्रिकायां सूचना मिलति अस्याः पत्रिकायाः प्रकाशनस्य।

प्रियंवदा–एषा-द्वैमासिक-पत्रिका प्रकाशनसङ्केतः संस्कृतभवनं लोकनायकमार्गः पुरी उड़िसा वर्तते। पत्रिकायाः प्रकाशनं 1988 वर्षतः जायते अस्याः सम्पादकौ श्रीहरेकृष्णमहापात्र प. श्री गदाधरदाशौ आस्ताम्। अत्र सरलसंस्कृतनिबंधाः सुरुचिर्संक्षिप्ताश्च समाजोपयोगिलेखाः शास्त्रचर्चा व्यङ्गपद्यानि रचनाः–कथाः प्रकाश्यन्ते। अस्याः एकाविशिष्टतासीत् यदत्र समस्यापूर्ति शीर्षके जनाः सरुचिं भागं गृहणन्ति। 'मनोरथे मे रथि एव राजते' तथा 'भक्तौ सदैव रमतां हृदयं महीयम्' इत्यादयःसमस्यापूर्तिश्लोकांशाः प्रदत्तासन्। पत्रिकायाः

वार्षिकशुल्कमेकेविंशतिरुप्यकाणि सन्ति।

प्रियवाक्—1992 तमवर्षतः *प्रियंवदा* द्वैमासिकपत्रिकायाः नामपरिवर्तितं *प्रियवाक्* इति जातम्। सम्प्रति एषा पत्रिका MIG-5 केन्द्रीयविद्यालयस्य पृष्ठे पुरीतः प्रकाश्यते। परिचालनसंस्थापकः प्रकाशकश्च डॉ. नागवरप्रसाद-रावचन्द्रपाटि वर्तते। आर्थिकहानिरपि जायते चेत् पत्रिकायाः प्रकाशनं भवति।

भारतमुद्रा—पुरनाकुट्टुरा त्रिपुरनगरं केरलतः प्रकाशिता द्वैमासिक पत्रिका 'भारतमुद्रा' सम्प्रत्यपि निरन्तरं प्रकाश्यते। अस्याः पत्रिकायाः प्रकाशनं 1993 वर्षतः अशोकनपुरनाटुक्रामहोदयस्य सम्पादकत्वे जायते। अस्यां प्रबंधाः नाटकं-कविता-नावले-वार्तादिकाः सरल संस्कृतभाषया प्रकाश्यन्ते। सम्पादकीयमतीव सरलं सुन्दरं च भवति—वार्तासु विशेषेण संस्कृतकार्यक्रमाणां संस्कृतविदुषां विषये विस्तरं विवरणं मिलति। अस्याः पत्रिकायाः वार्षिकं शुल्कं व्यक्तीनां कृते त्रिंशत् रुप्यकाणि संस्थानां कृते च पञ्चचत्वारिंशत् रुप्यकाणि वर्तन्ते।

स्वतंत्रभारते अन्या द्वैमासिकपत्रिकाः वर्तते ताः कानपुरतः प्रकाशिता *वेदान्तसंदेशः* मुजफ्फरपुरतः प्रकाशिता संस्कृतदर्शनञ्च। 1987 वर्षतः एरनल्लूरतः प्रकाशिता *कामधेनुः* बंगसंस्कृतयुता वर्तते। अत्र भारतमुद्रा एव सततं प्रकाशमानास्ति।

त्रैमासिकम्

विद्यालयपत्रिका—1951तमवर्षतः चातुर्वेदसंस्कृतविद्यालय, मथुरातः स्वतंत्रभारतस्य प्रथमा त्रैमासिकापत्रिका *विद्यालय-पत्रिका* प्रारब्धासीत्। अस्याः सम्पादकः प. पुरुषोत्तमशर्माचतुर्वेदीमहोदय आसीत्। विद्यालयस्य प्राध्यापकानां विद्यार्थीनाञ्चेयंपत्रिका अनियतकालिकासीत्।

श्रीरविवर्म-संस्कृतग्रंथावली—त्रिपुन्नुरासंस्कृतविद्यालयसमितेः त्रैमासिक-पत्रिकेयम्। अस्याः प्रकाशनं 1953 वर्षे त्रिपुनिथुरातः जातमासीत्। अत्राप्रकाशितानां ग्रन्थानां प्रकाशनं भवति स्म संस्कृतभाषाया तत्कालीनस्वरूपोपरि लेखा यत्रकुत्रापि अङ्के प्रकाशिताः। पत्रिकायाः सम्पादकः श्री सी. के. रामन् नाम्बियार आसीत्।

संस्कृत प्रभा—भारती प्रस्थानस्यानुसन्धानपत्रिका त्रैमासिकी *संस्कृत-प्रभा* अस्याः प्रकाशनं 1960 वर्षे भारती प्रतिष्ठान् 34 आनन्दपुरी मेरठतः आचार्यद्विजेन्द्रनाथशास्त्रिमहोदयस्य सम्पादकत्वे जातम्। पत्रिकायाः प्रकाशनं प्रथमे वर्षे एव स्थगितम्।

गैर्वाणी—संस्कृतभाषाप्रचारिणीसभाचित्तुरतः 1962 वर्षे *गैर्वाणी* त्रैमासिक-पत्रिकायाः प्रकाशनं प्रारब्धम्। अस्याः सम्पादकः एम. वरदराजनपन्तुलूमहोदयः आसीत्। अत्र सभाविवरण-सुभाषित-आंध्रसंस्कृत-परीक्षासूचना-भाषणादि प्राकश्यन्ते स्म। सम्प्रति एषा पत्रिका क. वे. रामकृष्णामाचार्यस्य सम्पादकत्वे प्रकाशिता भवति।

सागरिका—1962 तमवर्षतः सागरिका समिति सागरविश्वविद्यालय सागर म. प्र. तः सागरिका नाम्नी त्रैमासिकसंस्कृतशोधपत्रिका प्रारब्धा। प्रतिवर्षस्य जुलाई-अक्टूबर-जनवरी-अप्रैलमासेषु प्रकाश्यते एषा पत्रिका। सम्प्रति प्रकाशितासु सर्वासु शोधपत्रिकासु सागरिका स्ववैदुष्यपूर्ण-तर्कसंगत प्रौढ़ लेखप्रकाशनार्थं संस्कृतमनीषाणां जीवनचरितार्थ नवीनसाहित्य प्रकाशनार्थञ्च स्मर्यते। अस्या विशेषाङ्काः अतीव रोचकाः गवेषणात्मकाश्च भवन्ति। विशेषाङ्केषु भारतीयसंस्कृति-विशेषाङ्क-विश्वसंस्कृतसम्मेलन विशेषाङ्क-कालिदास-ज्योतिष-नाट्यवेद-प्राचीन भारतीयसमाजदर्शन-मनुस्मृति विशेषाङ्काः प्रमुखाः सन्ति। सम्पादका अस्याः पत्रिकायाः रामजीउपाध्यायराधावल्लभत्रिपाठिमहोदयाः सन्ति। पत्रिकायाः वार्षिकं शुल्कं त्रिंशद्रुप्यकाणि वर्तत्ते। संस्कृतशोधच्छात्राणां कृते एषा पत्रिका सर्वथा पठनीया सङ्ग्रहनीया च।

विश्वसंस्कृतम्—1965 वर्षे विश्वेश्वरानन्दवैदिकशोधसंस्थानम् साधु-आश्रमहोशियारपुरम्-146021 पंजाबतः *विश्वसंस्कृतम्* त्रैमासिकशोधपत्रिका प्रकाश्यते। अस्या संस्थापकसम्पादकाः श्रीमन्तः विश्वबंधु महोदयाः आसन्। सम्प्रति एषा प्रो. एस. भास्करन् नायरमहोदयास्य प्रवंधसम्पादकत्ले क. र. डा. श्यामदेवपाराशास्यच सम्पादकत्वे प्रकाशतामेति। पत्रिकेयं स्वभाषागाम्भीर्येण परिष्कृतप्रौढ़शोधनिबन्धेन मौलिकरचना प्रकाशनेन प्रसिद्धा वर्तते। अत्र विशेषाङ्काः सविशेषं स्थानं भजत। एषा प्रतिवर्षं चैत्र-आषाढ़-आश्विन्-पौषमाषेषु प्रकाश्यते। पत्रिकायाः वार्षिक शुल्कं चत्वारिंशत् रुप्यकाणि वर्तन्ते।

संस्कृत सम्मेलनम्—विहारराज्यसंस्कृतसाहित्यसम्मेलनस्य त्रैमासिकं मुखपत्रं—'संस्कृतसम्मेलनम्'। एषा पत्रिका श्रीरामनिरंजनमुरारका-संस्कृत महाविद्यालय-चौकपटनानगरात् 1764 वर्षतः प्रकाश्यते। अत्र विविध विषयसम्वद्धाशोधलेखाः कविता—संस्कृतवृत्ताश्च प्रकाश्यन्ते। सम्प्रति अस्याः प्रकाशनं श्रीचन्द्रदीपशुक्ल-महोदयानां सम्पादकत्वे जायते। अस्या अनेकेविशेषाङ्काः यदा-कदा पकाशिताः।

संगमनी—प्रयागस्थ संस्कृतसाहित्यपरिषदः प्रकाशनं वर्तते संगमनी

त्रैमासिकशोधपत्रिका। अस्याः प्रकाशनं 1964 वर्षतः दारागंज प्रयागतः निरन्तरं जायते। एषा संस्कृतवाङ्मयस्य संस्कृतभाषायाः प्रचाराय प्रसाराय गवेषणापूर्णलेखानां परिचर्यानाम् अप्रकाशितानां पाण्डुलिपिनां प्रकाशनं करोति। आचार्य-महामण्डलेश्वर-श्री महेशानन्दगिरिमहोदयानां संरक्षकत्वे डॉ. प्रभातशास्त्रिणः प्रधानसम्पादकत्वे संगमनी संस्कृतस्य निःस्वार्थसेवायां रता वर्तते। अत्र साहित्ये-गतानुसंधानलेखा सविशेषेण पठनीया वर्तते। अस्याः पत्रिकायाः वार्षिकं शुल्कं पञ्चविंशतिरुप्यकाणि सन्ति।

संविद—भारतीयविद्याभवनस्य संस्कृतत्रैमासिकी पत्रिका 'संविद' 1964 वर्षतः कुलपतिमुंशी मार्गः मुम्बईतः प्रकाश्यते। अस्याः पत्रिकायाः सम्पादकाः श्रीमन्तः जयन्तकृष्ण हरिकृष्णदवेमहोदयाः च सह सम्पादकौ भाई शंकरपुराहितसुरेश उपाध्यायौ च। सुचित्रेण सुन्दरेण लेखलिपिभिः सज्जितायामस्यां पत्रिकायां प्रार्थना-सम्पादकीयम्—लेखा—सुभाषित-लघु रूपक-संस्कृत-समाचारपाठकानां प्रतिक्रिया च प्रकाश्यन्ते। अस्यां पठनसामग्रयः समीचीना पठनीया मनोरञ्जनीया च भवन्ति। अस्याः वार्षिकं शुल्कं षष्ठिरुप्यकाणि वर्तन्ते। विद्याभवनस्य संरक्षणे एषा पत्रिका उत्तरोत्तरं वर्धमानास्ति।

गुञ्जारवः—संस्कृतत्रैमासिकपत्रिका *गुञ्जारवः* 1966 वर्षतः गीतायनम् सर्व्हे नं. 39/1/11-अ प्लाट नं. 7 नरहरिनगरसमीपे, गुलमोहर पथः अहमदनगरतः प्रकाश्यते। अस्याः सम्पादकः डा. देवीप्रसादखखंडीकरमहोदयः वर्तते। पत्रिकैषा अहमदनगरस्थया सनातनधर्मसभया पुरस्कृता वर्तते। संस्कृत-संस्कृति विषयमधिकृत्य अस्यां लेखा-नूतन कविता पद्य—समाचार-परितोषपत्राणि च प्रकाश्यते। अस्या विशेषाङ्केषु ज्ञानेश्वर-रामदास-रौप्यमहोत्सवीयाः प्रमुखा वर्तन्ते। अस्याः पत्रिकायाः वार्षिकं शुल्कं पञ्चाशत् रुप्यकाणि वर्तते।

हितकारिणी—त्रैमासिक पत्रिकायाः प्रकाशनं 1964 वर्षे जबलपुरम म. प्र. जातमासीत्।

ऋतम्भरम्—1964 वर्षे अहमदाबादतः *ऋतम्भरम्* त्रैमासिक पत्रिका प्रकाशिता।

मधुमती—1964 तमवर्षे अस्याः पत्रिकायाः प्रकाशनं राजस्थान साहित्य अकादमी-उदयपुरतः जातम्। पत्रिकायाः सम्पादकः श्रीगणेशरामशर्मा महोदयः आसीत्। अस्याः पत्रिकायाः केवलम् एकाङ्क एव प्रकाशितः।

कामेश्वरसिंह संस्कृतविद्यालय—त्रैमासिकीपत्रिकायाः प्रकाशनं 1964 वर्षतः दरभंगानगरतः जातम्।

अमृतलता—अस्याःपत्रिकायाः प्रकाशनं त्रैमासिक रूपेण पारडी गुजराततः 1964 वर्षे जातम्। केचन् पत्रिकामिमां मासिकपत्रिकारूपेण स्वीकुर्वन्ति।[12]

संस्कृतस्रोतस्विनी—अस्याः प्रकाशनं 1964 वर्षे आगरातः जातम्।

संस्कृतसुधा—श्री उमेशशास्त्रिनः सम्पादकत्वे अस्याः त्रैमासिकपत्रिकायाः प्रकाशनं 1964 वर्षे जयपुरतः जातम्। अस्याः प्रकाशनस्थलं डी. 282 मीरामार्गः बनीपार्क जयपुरमासीत्। श्रीयोधराजसारस्वत अस्या प्रबन्ध सम्पादक आसीत्। अस्याः पत्रिकाया मुख्यमुद्देश्यमासीत् विचारात्मकानां गवेषणात्माकानां भारतीयसंस्कृतिविषयानां निबंधानां प्रकाशनम्। वर्षत्रये अस्या अष्टाङ्का एव प्रकाशिताः।

सनातन धर्मशास्त्रम्—कलकतातः प्रकाशिता इयं पत्रिका, धार्मिक पत्रिका रूपेण स्वीक्रियते। अस्याः प्रकाशनं 1964 वर्षे जातम्।

मालविका—भोपाल मध्यप्रदेशतः *मालविका* त्रैमासिकपत्रिकायाः प्रकाशनं 1964 वर्षे जातम्

पाटलश्री—पाटलिपुत्रतः प्रकाशिता *पाटलश्री* एका त्रैमासिकशोधपत्रिका आसीत्। यस्याः प्रकाशनं 1960 वर्षे जातम्। अस्याः प्रकाशन पूर्वराज्यपाल श्री अनन्तशयनअयङ्गरमहोदयस्य प्रयासेन प्रारब्धम्।

स्वर-मङ्गला— रामस्थानसाहित्यसंगमस्य त्रैमासिकशोधपत्रिका-*स्वरमंगलायाः* प्रकाशनं उदयपुरनगरात् 1975तमवर्षे प्रारब्धम्। प्रतिवर्षे अङ्कचतुष्टयेषु प्रकाश्यमाना एषा सम्प्रति राजस्थानसंस्कृतअकादमी वीरेश्वर भवनम् —गणगौरी बाजार-जयपुरतः प्रकाश्यते। इयं पत्रिका नवलेखकानां गद्य-पद्य लेखपराणां विदुषां विविधभावभरितानां शोधात्मकलेखानां। नव्यकाव्यरचनानाञ्च निरन्तरं प्रकाश्य संस्कृत-संस्कृति सौरभ्य प्रसारणे संलग्ना वर्तत्ते। अत्र प्रकाशितासु विशेषाङ्काः अत्युच्चगवेषणात्मकनिबंधयुताः सन्ति तेषु-राधाकृष्णन्-नेहरू-भट्मथुरानाथ-शास्त्रि-राजेन्द्रप्रसाद- पं. गिरधर शर्मा चतुर्वेदि—म. म. गोपीनाथकविराज गुलेरी-बालाङ्काः वेद-व्याकरणदर्शन धर्मशास्त्रादि अङ्काः स्वशोधलेखैः सुसज्जिताः सन्ति। अस्याः पत्रिकायाः वार्षिकं शुल्कं चत्वारिंशत् रुप्यकाणि सन्ति।

परमार्थसुधा—संस्कृतभाषायाः सेवायां तत्परं वाराणसीस्थ सार्वभौमसंस्कृत प्रचारसंस्थानतः श्रीसत्यनारायणशर्ममहोदमानां सम्पादकत्वे श्रीवासुदेवशास्त्रि श्रीविद्याधरद्विवेदिमहोदययोः उपसम्पादकत्वे *परमार्थसुधा* त्रैमासिकपत्रिका प्रकाश्यते स्म। अस्याः प्रकाशनं 1976 वर्षतः D-38/110 हौजकटोरावाराणसी

संस्थानतः एव प्रकाशतामेति। अस्यां विमर्शात्यका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीयाः मौलिकलेखाः काव्यनाटक-चरित्रवर्णन व्यङ्गसम्बन्द्धाः नव्याः कृतयः प्रकाश्यन्ते स्म।

अजस्रा—*अजस्रा* नाम्नी त्रैमासिकी पत्रिका अखिलभारतीयसंस्कृत परिषदलखनऊतः 1977 वर्षे प्रारब्धा। अस्याः पत्रिकायाः प्रकाशनं महात्मागांधी मार्ग हजरतगंजः लखनऊ उत्तरप्रदेशमस्ति। पत्रिकायाः सम्पादक श्री अशोककुमार-कालियास्ति। संस्कृतसम्पदासंरक्षणं विभिन्न पद्धतिजुषां रचनां संवर्द्धनम् प्रातिभनूतनकृतीनां संसर्जनञ्च अस्या उद्देश्यं। अत्र कथा-लेख-कविता-नाटक-शोधप्रधान-निबंधाश्च प्रकाश्यन्ते। अस्याः पत्रिकायाः वार्षिकं शुल्कं त्रिंशत् रुप्यकाणि एकप्रतेश्चाष्ट रुप्यकाणि सन्ति।

अर्वाचीन-संस्कृतम्—डॉ. रमाकान्तशुक्लमहोदयानां सम्पादकत्वे देववाणी-परिषद्-आर. 6, वाणीविहारदिल्लीतः *अर्वाचीन-संस्कृतम्* नाम्नी त्रैमासिकी अर्वाचीना-पत्रिका प्रकाशमाना विद्यते। 1979 वर्षतः प्रकाशमानायामस्यां पत्रिकायां शोधात्मकनिबंधाः कविताः लघुनाटकानि संस्कृतसमाचारैश्च सह अर्वाचीनसंस्कृत-साहित्यानां विपुलं प्रकाशनं भवति। अस्याः मुख्यमुद्देश्यमपि अर्वाचीनानां साहित्यानां प्रकाशनम्। नूतनानां रचनानां च सञ्जीकरणम्।[13] अद्यत्वे सम्पूर्णे विश्वे प्रवर्तमानायाः कारगिलचर्चायाः विषये कारगिल-विशेषाङ्कः पत्रिका स्वनामसार्थकी कुर्वती अस्ति। अत्र कारगिलविषये लिखिताः रचनाः विशेषेण हृदिगम्याः सन्ति। अनेके विशेषांकः पत्रिकाया अर्वाचीनसाहित्यानामाकरः प्रतिभाति। अस्याः वार्षिकं शुल्कं चत्वारिंशत् रुप्यकाणि सन्ति।

संस्कृत-सञ्जीवनम्—बिहारसंस्कृतसञ्जीवनसमाजः 211 पाटलिपुत्र कॉलोनी पटनातः 1982 वर्षतः प्रकाश्यते। *संस्कृतसञ्जीवनम्* त्रैमासिक पत्रिका। अस्याः पत्रिकायाः प्रधानसम्पादिका श्रीमती मिथलेशकुमारीमिश्रा महोदया सम्पादके हरिप्रपन्नद्विवेदीविनाओझामहोदये। अत्र सम्पादकीयम् विविधनिबंधाः कविताश्च प्रकाश्यन्ते। अनेके विशेषाङ्काः प्रकाशिताः वर्षान्ते एकः विशेषाङ्क अवश्यमेव प्रकाश्यते। पत्रिकायाः वार्षिकं शुल्कं पञ्चाशत् रुप्यकाणि सन्ति।

व्रजगन्धा—व्रजमण्डलस्यैकमात्रं संस्कृतत्रैमासिकपत्रिका *व्रजगन्धा* 1985 वर्षतः रामाश्रमकृष्णपुरी-मथुरा-उत्तरप्रदेशतः निरन्तरं प्रकाश्यते। अस्याः पत्रिकायाः सम्पादकः डा. वासुदेवकृष्णचतुर्वेदिमहोदयः वर्तते। 'वन्दे व्रजवसुन्धराम्' इति

आदर्शोक्तिं वहत्ती एषा पत्रिका ब्रजक्षेत्रस्य प्रतिनिधित्व विदधति। गोलोकवासी पुण्यश्लोकानां प. श्री श्रीवरशास्त्रिणां स्मृतौ प्रकाशितायामस्यां पत्रिकायां लेख-कविता-हास्यपद्य-शोधनिबंधा-प्रकाश्यन्ते। पाठकानां पत्राणि पुस्तकानां समीक्षाऽपि प्रकाशिता भवति। पत्रिकायाः वार्षिकं शुल्कं पञ्चाशत् रुप्यकानि सन्ति।

लोकसंस्कृतम्—संस्कृतकार्यालयः श्रीअरविन्दाश्रमः पाण्डिचेरीतः *लोकसंस्कृतम्* त्रैमासिकपत्रिकायाः प्रकाशनं 1985 वर्षे प्रारब्धम्। अस्याः पत्रिकायाः वर्तमानसम्पादिका श्रीमती उषादेसाईमहोदयास्ति। सम्पादकमण्डल्यां चिन्मयीमाहेश्वरी-नरेन्द्रश्च वर्तते। अत्र बालरचना-कथा-कविता- विविधलेख-स्तम्भेषु नवीनरचनाः प्रकाश्यन्ते। शोधविषयकानां निबंधानां कृते एषा लोकप्रियास्ति। पत्रिकाया अष्टचत्वारिंशत् अङ्काः प्रकाशिताः। सम्प्रति संयुक्ताङ्करूपेण वर्षे वारद्वयं प्रकाशितं भवति फब्रुअरी मासे अगस्तमासे च। पत्रिकायाः वार्षिकं शुल्कं विंशतिरुप्यकाणि सन्ति।

दूर्वा—*दूर्वा* त्रैमासिकी पत्रिका मध्यप्रदेशसंस्कृतअकादमी- सिविललाईन-भोपाल, मध्यप्रदेशतः 1986 वर्षतः प्रकाश्यते। डा. राधावल्लभ त्रिपाठिमहोदयानां सम्पादकत्वे प्रकाशितायाम् अस्यां पत्रिकायां गवेषणात्मक-निबंधाः नूतनकाव्यसर्जनपद्यानि, नाटकानि-कथाः-चिन्तनानि-समीक्षाः प्रकाश्यते। पत्रिकायाः अनेके विशेषाङ्काः अस्याः विशेषं प्रकटयति तेषु-पाटलसुरभि-विश्वकविता-संस्कृतकुम्भकलि-बालसाहित्य स्वर्णिमस्वतंत्रता- कारगिलविजय-विशेषाङ्काः प्रमुखाः सन्ति। पत्रिका इयं नूतनसाजसज्जया संवलिता सुन्दरलिपिभिः रम्या नयनाभिरामा प्रतिभाति। पत्रिकायाः वार्षिकं शुल्कं चत्वारिशंत् रुप्यकाणि विंशति रुप्यकानि डाकव्ययार्थञ्च स्वीक्रियन्ते। पत्रिकायाः केचन् प्राक्तनाङ्का स्वमधुरमनोहर-सरसपद्यप्रकाशनैः विशिष्टतां भजते।

विश्वभाषा—विश्वसंस्कृतप्रतिष्ठानस्य मुखपत्रम् *विश्वभाषा* अन्तर्राष्ट्रीय त्रैमासिकसंस्कृतपत्रिका वर्तते। या 1986 वर्षतः काशीराज श्रीविभूतिनारायणसिंहशर्मदेवस्याध्यक्षे पं. गुलामदस्तगीर अब्बास अलिविराजदारमहोदयस्य प्रधानसम्पादकत्वे निरन्तरं प्रकाश्यते। अस्यां विभिन्न विषयकानां निबंधै सह स्थायिस्तम्भे बालजगत्-युवमंच-रसवतीत-अक्षरबंध-ग्रन्थसमीक्षा-ज्ञानशिविर-योगासन-प्रतिष्ठानवार्ता-संस्कृतवार्तादिशीर्षकेषु लेखाः समाचाराश्च प्रकाश्यन्ते। पत्रिकायाः वार्षिकं शुल्कं त्रिंशत् रुप्यकाणि सन्ति।

पत्रिकायाः प्रकाशनं विश्वसंस्कृतप्रतिष्ठानं-रामनगरदुर्गम् वाराणसीतः जायते। बुद्धपूर्णिमा-स्वातंत्र्यदिवसः दीपावलिगणतन्त्रदिवसश्च प्रकाशनदिनाङ्कः वर्तते पत्रिकायाः अस्याः। निरन्तरमेषा पत्रिका संस्कृतसंस्कृति-संरक्षणे तत्परा वर्तते। उज्जयिनीसिंहस्थमहापर्वणि आयोजितस्य विश्वसंस्कृतसम्मेलनस्यवसरे मध्यप्रदेशाङ्क विशेषाङ्कः प्रकाशितः।[14]

अनादिवाक्—संस्कृतसेवासंस्थानस्य त्रैमासिकं मुखपत्रम् *अनादिवाक्*। अस्याः पत्रिकायाः प्रकाशनं 1988 वर्षे आ. रामदयालु महोदयानां सम्पादकत्वे प्रारब्धम्। प्रकाशनस्थलं 59/8 मध्यमार्गः तुगलकाबाद विस्तारः नवदिल्ली वर्तते। संस्कृतभाषाभावयोः प्रचाराय प्रसाराय चेयं पत्रिका प्रारब्धा। द्वितीय वर्ष एव एषा संयुक्ताङ्करूपेण प्रकाश्यता प्रायः अस्तंगता सम्प्रति।

संस्कृतमञ्जरी—दिल्लीसंस्कृतअकादम्याः सचिव श्रीकृष्णसेमवालमहोदयानां सम्पादकत्वे *संस्कृतमञ्जरी* त्रैमासिकशोधपत्रिकायाः प्रकाशनं 1995 वर्षतः जायते। सम्प्रति एषा पत्रिका दिल्लीसंस्कृत-अकादम्याः नवकार्यालयात् पूर्व आर्यमहिलाविद्यालय प्लाट नं. 5 झण्डेवालान करौलबाग दिल्लीतः प्रकाश्यते।

संस्कृतसेवातत्परसेमवालमहोदयस्य सम्पादकत्वे नूनमेषा पत्रिका उत्तरोत्तरं प्रगतिपथमनुधावति। अस्यां पत्रिकायां विविधशोधनिबन्धाः कथा-पद्यानि अकादमीकार्यक्रमाणां विस्तृतं विवरणानि संस्कृतजगत् वार्ताऽपि सुविस्तृतं प्रकाश्यते। अत्र भारतस्य प्रसिद्धविदुषां सर्जनधर्मिसाधकानां नवोदितप्रतिभानां मानवसंवेदनानां सशक्तलेखनीनां संयुक्ता संस्कृतिः दृश्यते। अस्याः विशेषाङ्काः,सर्वैव पठनीया संग्रहनीया च वर्तन्ते तासु ज्ञानविज्ञानविशेषाङ्कः, शासनप्रवंधनपद्धतिविशेपांङ्कः—संस्कृतशिक्षण-व्यवस्थाङ्कश्च अस्याः पत्रिकायाः प्रौढ़पाण्डित्यं प्रकटीकरोति। अस्याः पत्रिकायाः वार्षिकमूल्यं शुल्कं वा द्वात्रिंशत् रुप्यकाणि वर्तन्ते। सुन्दरेण कर्गजेन सुलेखेन सुरम्या इयं पत्रिका नूनं धारणीया पठनीया चास्ति।

अमृतवाणी—मानवसेवासंस्थानस्य त्रैमासिकीसंस्कृतपत्रिका *अमृतवाणी* 1996 वर्षतः रमेशचन्द्रशाहामहोदयस्य प्रधानसम्पादकत्वे डा. कुमारचन्द्रमिश्रमहोदयस्य च सम्पादकत्वे वालेश्वरम् ओड़िसातः प्रकाश्यते। अस्याः पत्रिकायाः मुख्यं लक्ष्यं संस्कृतस्य लौकिकरूपं जनानां समक्षे स्थापनीयम्। आधुनिकपत्रिकाप्रकाशनप्रणालीमनुसरन्ती एषा विविधसाजसज्जिताधुनिकी

पत्रिकाइव प्रतिभाति। अत्र विविधविपयकाः समाचाराः राजनीतिका सांस्कृतिकाश्च वार्ताः कथा पद्यानि सुन्दरचित्रैः सह चित्रितानि प्रकाशितानि च। अत्राभिनेताभिनेतृणां च चित्राणि प्रकाशितानि। पत्रिकायाः वार्पिकं शुल्कं चत्वारिंशत् रुप्यकाणि वर्तन्ते।

स्वातंत्र्योत्तर भारते शोधपत्रिकासु सर्वप्राचीना सर्वजनप्रिया च सारस्वती-सुषमा 1942 वर्षतः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः प्रकाश्यते यस्यां प्रौढ़विद्वत्पूर्णशोधनिबन्धाः विविधविषयसंवलिता प्रकाशिताः वर्तन्ते। अस्या विशेषाङ्केषु द्वादशविशेषाङ्क विभिन्नानां शास्त्राणां सारग्राहकाः सन्ति। प्रकाशितासु पत्रिकासु काश्चन् एव त्रैमासिकपत्रिका शोधपत्रिका वक्तुं शकयन्ते यासु शोधप्रधाननिबन्धा प्रकाश्यन्ते तासु अन्यतमा सागरिका, विश्वसंस्कृतम्, स्वरमंगला, लोकसंस्कृतम्, अर्वाचीन संस्कृतम्, दूर्वा, संस्कृतमञ्जरीति।

अन्या अपि त्रैमासिकपत्रिका सन्ति तासु राउलकेलातः उत्कलोदयः, भद्रकतः जनभारती, लखनऊतः प्रभातम्, पुरीतः दिग्दर्शिनी, इलाहाबादतः मनीषासूत्रम्, दरभंगातः विश्वमनीषा, (कामेश्वरसिंहदरभंगा विश्वविद्यालयस्यशोधत्रैमासिकी) दिल्लीतः 'श्रेयः', मुजफ्फरपुरतः परमार्थसुधेति। एतासां विस्तृतं विवरणमप्राप्तमेव।

चातुर्मासिक-पत्रिका

सारस्वतम्—राष्ट्रपतिसम्मानितानां श्रीचन्द्रदीपशुक्लमहोदयानां प्रधान-सम्पादकत्वे 'सारस्वतम्' नाम्नी चातुर्मासिकी पत्रिका प्रकाश्यते। अस्याः पत्रिकायाः प्रकाशनं वाहरी वेगमपुर-पटनासिटी-पटना विहारमस्ति। पत्रिकायाः प्रकाशनं 1997 वर्षतः जातम्। अत्र विविधविषयका लेखाः पद्यानि-समाचाराः अथ चान्ते सम्पादकीयं प्रकाश्यते। पत्रिकायाः वर्षद्वयस्य अङ्कत्रयं भारतीयास्वाधीनता-स्वर्णजयन्तीवर्षे प्रकाशितम्। तमसो मा ज्योतिर्गमय इति शीर्षकमादधाना एतेन श्लोकेन संवलिता पत्रिकेयं। एकछत्रं चातुर्मासिकं गौरवं विदधति—

देवेन्द्रवाक् प्रसरताज्जगतीह नित्यम्।
लोकाः बुधाः सुकृतिनः सुयशोलभन्ताम्।।
सारस्वतं विजयताम् विबुध प्रयासैः।
सद्भावना भारतमस्तु सदा हि लोके।।

इतः पूर्वं 1906 वर्षे केरलग्रन्थमालानाम्नी चतुर्मासिकपत्रिका कालीकूटतः तथा 1930 वर्षे प्रकाशिते श्रीचित्रा त्रावणकोरतः प्राप्येते।

षाण्मासिकम्—याः का अपि षाण्मासिकपत्रिका प्रारब्धा वाः सर्वाः स्वतंत्रभारत एव।

संस्कृतप्रतिभा—साहित्यअकादमी-रवीन्द्रभवनम् नईदिल्लीतः *संस्कृत-प्रतिभा* नाम्नी षाण्मासिकशोधपत्रिका 1959 वर्षतः प्रारब्धा। पत्रिकायाः आद्यसम्पादकः डा. वी. राघवन् महोदयः आसीत्। विशुद्ध संस्कृतार्वाचीनप्रकाशनयुतायामस्यां प्रथमभागे सम्पादकीयम्, द्वितीयभागे अर्वाचीनखण्डकाव्यानि तृतीयभागे गद्यप्रबन्धाः, चतुर्थेभागे रूपकानि पञ्चमेभागे चानुवादाः प्रकाश्यन्ते। अन्तिमे पृष्ठे लेखकानां परिचयः मिलति। पत्रिकायाः सम्पादकाः मूर्धन्याः विद्वांसः भवन्ति। प्राक्तनाङ्केषु तदानीन्तनसम्पादकानां मौलिकाऽनुसन्धानप्रतिभायुता निबंधाः प्रकाशिताः सन्ति। सम्प्रति एषाऽपि पत्रिका अक्रमा जाता।

मागधम्—1967वर्षे बिहारराज्यस्य आराप्रदेशात् *मागधम्* नाम्नी पत्रिका प्रारब्धा। अस्याः पत्रिकायाः सम्पादकाः श्रीनेमीचन्द्रशास्त्रिमहोदया आसन्। अस्या प्रत्यङ्कः उदय इति नाम्ना सम्बोधितोऽस्ति। पत्रिकायां अर्वाचीन साहित्यकाराणां कवीनां च लेखाः पद्यानि प्रकाशितानि। अस्या पत्रिकायाः प्रत्यङ्कः शोधप्रबंधायते। पत्रिकैषा आगरानगरस्थ हरप्रसाददासजैन महाविद्यालयस्य संस्कृतप्राकृतविभागस्य तत्त्वावधाने प्रकाशितास्ति।

अध्ययनमाला—श्री लालबहादुरशास्त्रीविद्यापीठस्यानुसंधानप्रकाशनमासीत् षाण्मासिकी *अध्ययनमाला* पत्रिका। यस्यां विद्यापीठेऽध्यापनरतानां विदुषामध्ययनरतानाञ्च छात्राणां शोधविषयकनिबंधप्रकाशनेन सहैव भारतस्य विभिन्नभागेषु वर्तमानानामनुसन्धान विद्यापारंगतानां शोधकर्मरतानाञ्च निबंधाः प्रकाश्यन्ते। प्रथमं कुसुमञ्च अध्ययनमाला नाम्ना एव प्रकाशिताभूत। ततः परं स्व. म.म. श्रीपरमेश्वरानन्दशास्त्रिस्मृतिग्रन्थः, जीवनपरिमल-भारतभूषण-राघवान्हिक-रसमीमांसेति ग्रन्थरूपेण श्रीमहावीरचरितामृत ग्रन्थरूपेण प्रकाशिताः। अस्यैव प्रकाशनस्य षष्ठ सप्तकुसुमयोः विशेषाङ्करूपेण अन्वेषणा नाम्ना प्रकाशिताः। पत्रिकायाः सम्पादकाः विद्यापीठस्य प्राचार्या भवन्ति। अस्याः प्रकाशनं 1972 वर्षतः जातमासीत्। सम्प्रति प्रकाशनमस्याः स्थगितम्।

संस्कृत-विमर्शः—राष्ट्रीयसंस्कृतसंस्थानम् देहल्याः षाण्मासिकी शोधपत्रिका वर्तते।अस्याः पत्रिकायाः प्रकाशनं 1973 तमवर्षतः जातम्।अत्र विशुद्धशोधप्रधान-गवेषणात्मकाः लेखाः प्रकाश्यन्ते। यस्यां परम्परागत पाण्डित्य शैल्यां व्याकरणं दर्शन-मीमांसा-साहित्य-वेद-ज्योतिष-धर्मशास्त्र-विषयका अनुसन्धानात्मकाः लेखाः

प्रकाशिताः वर्तन्ते। अस्याः मुख्यसम्पादकाः संस्थानस्य मान्याः निदेशकाः भवन्ति। 1997 तमवर्षे बेंगलूरनगरे समायोजिते दशमविश्वसंस्कृतसम्मेलनस्य अवसरे। श्री कमलाकान्तमिश्रमहोदयानां प्रधानसम्पादकत्वे पत्रिकायाः विशिष्टाङ्कः प्रकाशितः। इतः पूर्वमप्यनेके विशेषाङ्काः पत्रिकायाः प्रौढ़पाण्डित्यं प्रकटयति। सम्प्रति एषा संयुक्ताङ्करूपेण संस्थानात् नवभवनात् 56-57 इन्स्टीट्यूशनल एरिया जनकपुरी नवदिल्लीतः प्रकाशमानस्ति पत्रिकायाः वार्षिकं शुल्कं पञ्चाशत् रुप्यकाणि सन्ति।

भास्वती–काशीविद्यापीठस्य संस्कृतविभागात् *भास्वती* नाम्नी शोधपत्रिकायाः प्रकाशनं 1976 तमवर्षे जातम्। अस्याः सम्पादकः श्री अमरनाथपाण्डेयमहोदयः आसीत्। अत्र विद्यापीठछात्रानां अध्यायकानाञ्च गवेषणात्मका शोधनिबंधा प्रकाश्यन्ते स्म। पत्रिकेयं 1982 पर्यन्तं प्रकाशिताऽभूत।

संस्कृत-वीणा–1986 वर्षतः *संस्कृत-वीणा* षाण्मासिकपत्रिकायाः प्रकाशनं कुरुक्षेत्रतः भवति स्म। पत्रिकायाः सम्पादकः डा. चित्तरंजनदयाल कौशलः। पत्रिकेयं 73/4 आचारवीथी कुरुक्षेत्रं हरियाणाप्रदेशात् प्रकाश्यते स्म। लध्वांकारयुता-पृष्ठ चतुष्टययुता पत्रिका नैव सततं प्राप्यते।

परिशीलनम्–उत्तरप्रदेशसंस्कृतसंस्थानस्य षाण्मासिकक्यनुसंधानप्रधान पत्रिकेंयं वर्तते। पत्रिकैषा 'संस्कृतभवनम्' नयाहैदरावाद लखनऊ उत्तर-प्रदेशतः संस्थानकार्यालयात् प्रकाशतामेति। 1990 वर्षतः पद्मभूषण बलदेव उपाध्यायमहोदयानां प्रथमसम्पादकत्वे प्रारब्धा यस्यां अनुसन्धानात्मिकाः श्रेष्ठा अप्रकाशिताः लेखाः प्रकाश्यन्ते। शोधच्छात्राणां कृते नूनमेषा पत्रिका सङ्ग्रहणीया पठनीया च। अस्या वार्षिकं शुल्कं विंशतिरुप्यकाणि एव वर्तन्ते।

आरण्यकम्–संस्कृतप्रचारपरिषदः षाण्मासिकशोधपत्रिका *आरण्यकम्* आरातः डॉ. गोपवन्धु मिश्रमहोदयानां सम्पादकत्वे प्रकाश्यते। 1992 वर्षतः प्रकाशितायाः अस्याः प्रकाशन सङ्केतः मारुतिमन्दिरम्-प्रकाशपुरी-आरा-विहार अस्ति। अस्यां पत्रिकायां विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा मौलिकनिबन्धाः प्रकाश्यन्ते। काव्य-नाटक-चरित्रवर्णन-हास्य-व्यङ्ग्यसम्वद्धाः नव्याः रचनाश्च पत्रिकायां स्थानं प्राप्नोति। पत्रिकायाः वार्षिकं शुल्कं त्रिंशत् रुप्यकाणि सन्ति। प्रत्यङ्कस्य च पञ्चदशरुप्यकाणि।

छन्दस्वती–"जीयात्सा ध्वनिभावरीतिमहिता छन्दस्वती भारती" इत्युद्घोषेण

षाण्मासिकी-पद्यपत्रिका *छन्दस्वती* 1997 वर्षतः प्रारब्धा। पत्रिकायाः प्रकाशनं छन्दस्वतीप्रकाशनं 188, कल्याणवीथी, मेलुकोटे कर्नाटकम् 571 431 वर्तते। अस्याः सम्पादकः विद्वान् उमाकान्तभट्टः सह-सम्पादकश्च विद्वान् भा. वं. रामप्रियः। अत्र सम्पादकस्यात्मनिवेदनासौ पद्ये एव वर्तते। ततश्च पत्रिकायां काव्यपादः शास्त्रपादः विमर्शपादः प्रकीर्णपादश्च स्तम्भेषु पद्यानि प्रकाशितानि भवन्ति। पद्यपूरणी समस्यार्तिः अत्र रमणीयानि मनोहरणानि सुन्दरपद्यानि प्रकाशितानि। अत्र पाठका अपि स्वमन्तव्यं पद्ये एवं प्रेषयन्ति। पत्रिकायाः वार्षिकं शुल्कं चत्वारिशंत् रुप्यकाणि प्रतयङ्कस्य च विंशति रुप्यकाणि वर्तन्ते।

प्रख्या—सागरविश्वविद्यालयस्य संस्कृतविभागस्य षाण्मासिकी शोधपत्रिका वर्तते प्रख्या। अस्याः पत्रिकायाः प्रकाशनं 1992 तमवर्षे प्रारब्धम्। त्रयः एव अङ्काः प्रकाशिता। सम्प्रति संस्कृतविभागाध्यक्षस्य डा. राधावल्लभत्रिपाठिनः सम्पादकत्वे प्रकाशमानाऽस्ति। पत्रिकायाः अङ्कः शोधायते।

शोधप्रभा—श्रीलालवहादुरशास्त्रिसंस्कृतविद्यापीठस्य वर्तते शोधपत्रिका 'शोधप्रभा' पूर्वं एषा निरन्तरं प्रकाशिता भवति स्म। अत्र शोधपूर्णगवेषणात्मकताः लेखा पद्यानि भाषणानि प्रकाश्यन्ते। 1998 तमवर्षस्य 'राष्ट्रीयचेतना-विशेषाङ्क' कुलपति श्रीवाचस्पति उपाध्यायमहोदयानां सम्पादकत्वे प्रकाशितम्। एष विशेषाङ्क अप्रैल 1997 वर्षानन्तरं प्रायः प्रकाशितम्।

प्राच्य ज्योति—कुरुक्षेत्रविश्वविद्यालयस्य संस्कृतविभागस्य शोधपत्रिका *प्राच्य-ज्योति* अति प्राचीना वर्तते। अत्र शोधपूर्ण लेखानां गवेषणात्मक निवन्धानां सारांशः प्रकाश्यते स्म। प्रायः सम्मेलनादिषु पठित शोधपत्रस्य सारः अत्र मिलति। एषा पत्रिका शोध-छात्राणामतीव उपयोगयुता। अत्र भाषावैज्ञानिकं साहित्यविषयकं दर्शन-वेद-धर्मशास्त्रविषयकानां लेखानां संक्षिप्तं रूपं मिलति।

एवमेव विभिन्नविश्वविद्यालयस्य संस्कृत विभागतः षाण्मासिकी पत्रिका प्रकाश्यत एव तासु **विद्यापीठ पत्रिका** (प्रयाग) **इतिहास चयनिका ऋतम्** (लखनऊ), **पुराणम्** (वाराणसी) **प्राच्यभारती** (असम) **संस्कृत-मन्दाकिनी** (पुरी) **सुरभारती** (हैदरावाद) **भारतीयविद्या** (मुम्वई) प्रभृतयः पत्रिकाः स्वशोधलेखैः विदुषां मनांसि रञ्जयन्ति।

वार्षिकपत्रिका—प्रायः भारतस्य विभिन्नेभ्यः विश्वविद्यालयेभ्यः तत्रत्यः संस्कृतविभागेभ्यः एका वार्षिका पत्रिका प्रकाश्यते। इयं परम्परा प्राक्तना वर्तते। परम्परेयं न तथा जीवति अद्यत्वे, यतः प्रकाशतामेति स्म तदपि स्थगितमेव नूतन

प्रकाशनमत्र नैव प्राप्यते। अत्र काश्चित् प्राचीनप्रकाशितानां सूचना वर्तते तस्याः प्रवाहः शुष्कः जातः।

तरङ्गिनी—1958 वर्षे उस्मानियाविश्वविद्यालयस्य संस्कृतविभागस्य वार्षिकी पत्रिकेयम्। अस्याः प्रकाशनं संस्कृतविभागाध्यक्षस्य डा. आर्येन्द्रशर्मणः प्रधानसम्पादकत्वे प्रारब्धम्। अत्र तत्रत्यानामेव छात्राणां प्राध्यापकानां वा लेखाः रचनाः प्रकाश्यन्ते स्म।

संस्कृतरङ्ग—डॉ. वी. राघवन् महोदयानां सम्पादकत्वे *संस्कृतरङ्गः* 1958 वर्षे प्रकाशिता। अत्र राघवन्महोदयानां नाटकानि लेखा प्रकाशिताः वर्तन्ते अन्येषां विदुषामपि लेखाः प्रकाश्यन्ते स्म।

ज्ञानवर्धिनी—लखनऊविश्वविद्यालयस्य ज्ञानवर्धिनीसभातः 1959 वर्षे डॉ. सत्यव्रतसिंहमहोदयानां सम्पादकत्वे पत्रिकेयं प्रारब्धा। अत्रापि विश्वविद्यालयीय छात्राणामेव रचनाः प्रकाशिता। पत्रिकाया एकाङ्क एव प्रकाशिता।

सुरभारती—1959 वर्षे काशीहिन्दूविश्वविद्यालयीय संस्कृत- महाविद्यालयस्य मुखपत्रिकेयं हस्तलिखिता च। प्राचार्यविश्वनाथशास्त्री सम्पादक आसीत्। अत्र प्राचीनभारतीयविद्यासम्बद्धाः लघुनिबंधाः प्राध्यापकानां च प्रौढ़लेखाः वर्तन्ते। धनाभावे अस्याः प्रकाशनं हस्तलिखितरूपेण जातं तत्रापि पंचप्रतयः एव प्रकाश्यन्ते स्म।

मेधा—रायपुरस्थ राजकीयदूधाधारीसंस्कृतविद्यालयस्य वार्षिक पत्रिकेयम्। 1961 वर्षतः प्रकाशितायाः पत्रिकायाः सम्पादकः प्राचार्य भवति स्म। विद्यालयस्य प्राध्यापकानां शोधनिबंधाः प्रकाशिताः। अत्र प्रकाशिताः केचन् निबंधाः महन्महत्वं स्वीकुर्वन्ति।

सुरभारती—बटोदरसंस्कृतमहाविद्यालयस्य मुखपत्रिकेयम् *सुरभारती*। अस्याः प्रकाशनः बड़ौदातः 1962 वर्षे प्रारब्धम्। अत्र तत्रत्यानां छात्राणां प्राध्यापकानां च लेखाः प्राप्यन्ते। पत्रिकायाः प्रकाशनं बटोदरसंस्कृतम् महाविद्यालय, मांडवी वेंकटरोड, बड़ौदा, गुजरातः आसीत्।

'प्रतिभा' 'प्राची' च—संस्कृतविश्वविद्यालयवाराणस्या वार्षिकशोधपत्रिके *प्रतिभा प्राची* चेति। अत्र विश्वविद्यालयस्य शोधच्छात्राणां शोधलेखाः प्राध्यापकानां च गवेषणात्मक प्रौढ़ लेखाः प्रकाश्यन्ते स्म।

मनीषा—श्रीलालबहादुरशास्त्री-केन्द्रीयसंस्कृतविद्यापीठस्य वार्षिक पत्रिकायाः प्रकाशनं 1875 तमवर्षे जातम्। स्नातकोत्तरविभागस्यास्यां पत्रिकायां छात्राणां

लेखाः प्रकाशिताः सन्ति सहैव प्राध्यापकानामपि। विद्यापीठादेव 'ज्ञान-रश्मि' नाम्ना वार्षिकपत्रिका 1978 तमवर्षे प्रकाशिता।

वैजयन्ती–राजस्थानसंस्कृतसंविद् संस्थया 1976 तमवर्षे एका वार्षिकी पत्रिका प्रारब्धा **वैजयन्ती**। अस्याः पत्रिकायाः प्रकाशनं यद्यपि शीघ्रमेव समाप्तम्। परमस्याः प्रत्यङ्कः विशेषाङ्करूपेण प्रकाशितः—प्रतिदर्शाङ्कः (1976) वेदाङ्कः (1977) इतिहासांक (1978) ज्योतिषांक (1979) आदयः।

मेधा–राजस्थानसंस्कृतविश्वविद्यालयस्य 'संस्कृतविभागात्' अस्याः पत्रिकायाः प्रकाशनं 1973 वर्षे प्रारब्धम्। विभागीयप्राध्यापकानां वित्तीय साहाय्येन एषा प्रकाश्यते। यदा-कदा अर्थाभावे अद्वयं सहैव प्रकाशितम्।

ज्ञानाञ्जलि–राजस्थानीयसंस्कृतशिक्षणसंस्थासु अन्यतमः जयपुरस्थ दादूसंस्कृतमहाविद्यालयः, तस्यैव वार्षिकी पत्रिका वर्तते *ज्ञानाञ्जलिः* यस्याः प्रकाशनं 1983 वर्षे प्रारब्धम्। अस्याः सम्पादकौ श्रीबक्षीरामस्वामी श्रीराम देव साहूचास्ताम्। पत्रिकायां प्रतिभावतां छात्राणां विदुषां च व्याकरण साहित्यसंस्कृत-भाषाविषयकाः लेखाः प्रकाश्यन्ते। पत्रिकायाः प्रकाशनं वित्तसाहाय्येन भवति।

श्यामला–हिमाचलकलासंस्कृतिभाषा अकादम्याः वार्षिकपत्रिका *श्यामला* अस्याः पत्रिकायाः प्रकाशनं 1989 वर्षतः डॉ. वंशीरामशर्मनः प्रबन्धसम्पादकत्वे प्रारब्धम्। योग्यविदुषाम् अनुसन्धानपूर्णान् गम्भीरविषयान् सरलीकृत्य लेखाः लिखिताः वर्तन्ते। अत्र हिमाचलप्रदेशीयानां विदुषां छात्राणां च लेखाः अधिकाः भवन्ति।

जयन्ती–केन्द्रीयसंस्कृतविद्यापीठम् जयपुरस्य वार्षिकपत्रिकायाः *जयत्याः* प्रकाशनं 1989 वर्षे प्रारब्धम्। अत्र विद्यापीठापाच्छाणां विदुषां च लेखाः प्रकाशिताः अपि च, वाराणसी-दिल्लीस्थाविदुषामपि लेखाः प्रकाशिताः। व्याकरण-साहित्य-दर्शनविषयकाः लेखाः स्वगाम्भीर्यं प्रकटयति अत्र।

आदर्श–गुरुकुलकांगड़ीविश्वविद्यालयस्य संस्कृतविभागस्य वार्षिक-पत्रिका *आदर्श*। अस्याः प्रकाशनं 1988 तमवर्षे हरिद्वारतः जातम्। अत्रापि विभागीयानां छात्राणां प्राध्यापकानां लेखाः प्रकाशितः।

लोकप्रज्ञा–लोकभाषाप्रचारसमितेः वार्षिकशोधप्रत्रिका *लोकप्रज्ञा*। अस्याः प्रकाशनं पुरीतः 1990 तमवर्षतः प्रारब्धम्। अत्र देशस्य विभिन्नविदूषां शोधलेखाः प्रकाश्यन्ते। पत्रिकायाः तृतीयोऽङ्का किञ्चित् विलम्वने श्रीवासुदेवशास्त्रीसम्माने प्रकाशितः।

विमर्श—लखनऊविश्वविद्यालयस्य संस्कृतप्राकृतभाषाविभागस्य शोधविमर्श गोष्ठ्याः वार्षिकपत्रिका *विमर्श* नाम्ना 1993 वर्षतः प्रकाश्यते। अस्याः प्रथमाङ्कत्रयं *विमर्श* नाम्नाप्रकाशिता चतुर्थाङ्कतः पत्रिकाया नाम परिवर्त्य *वाङ्मयींति* विहितम्। पूर्वं तावत्पत्रिकायामस्यां केवलं शोधच्छात्राणामेव शोधपत्राणि प्रकाश्यन्ते स्म, किन्तु अङ्काचतुष्टयात् विभागीयाध्यापकानां शोधवैज्ञानिकानां चापि महत्त्वपूर्णानि उच्चस्तरीय शोधपत्राणि प्रकाश्यमुपनीतानि।

स्वतंत्रभारते अनेकाः संस्कृतवार्षिकपत्रिकाः प्रकाशिताः। तासु सर्वप्राचीना बेंगलूरतः प्रकाशिता अमृतवाणी वर्तते। अस्याः प्रकाशनं सेण्टजोसफ-महाविद्यालयस्य संस्कृतसभया विद्वान् एम. रामकृष्णभट्टस्य सम्पादकत्वे प्रारब्धा। अत्र उच्चकोटेः शोधलेखा अर्वाचीनरचनाः प्रकाशिताः। पत्रिकायाः प्रकाशनं 1941 तः 54 वर्षं यावत् जातम्। भारतस्य प्रायः विभिन्नविश्वविद्यालयस्य संस्कृतविभागतः वार्षिकपत्रिका प्रकाश्यते। काश्चन् अद्यत्वेऽपि प्रकाश्यन्ते, काश्यन् अस्तंगताः तासु दिल्लीविद्यापीठ्स्य शिक्षा ज्योतिः बेंगलूरतः प्रज्ञालोकः, महाराजासंस्कृत- कॉलेजमैसूरतः चन्द्रिका दिल्लीतः युगप्रभा, मद्रासतः संस्कृतरङ्गा वृहद्गुजरातसंस्कृतपरिषदः सामनस्यम् प्रमुखाः सन्ति। सामनस्यम् पत्रिकायाः प्रकाशनमपि सम्प्रति संस्कृतगुजरातीभाषयां भवति।

स्वातंत्र्योत्तरभारते अनेकाः संस्कृतस्य पत्र-पत्रिकाः प्रकाशिताः। तासु काश्चन स्वतंत्रतायाः पूर्वं प्रकाशिताः प्रवहमानाः जाताः काश्चन् अवरुधाः तासां स्थानं नूतनप्रकाशनेन पूरिताः। काश्चन् स्वतंत्रभारते प्रारब्धाऽपि गत्यां सत्यामपि। सम्प्रति शून्यंगता दृश्यन्ते, अथ च अद्यत्वे नूतना पत्रिका प्रकाशतामेति। उनविंशतिशताब्द्यां पत्र-पत्रिकाप्रकाशनस्य यन्मूलमुद्धेश्यमासीत् तत्तु विंशति-शताब्द्यां परिवर्तितं, तत्रापि स्वातंत्र्योत्तर भारते तस्य विकसितं रूपं वयं पश्यामः।

संस्कृतपत्र-पत्रिकानामूलमुद्देश्यं संस्कृतभाषायाः संरक्षणं प्रचारः प्रसारश्च। संस्कृतं नाम अद्भुतं ज्ञानं समाजे विश्वे च तस्य ज्ञानस्य प्रसारः स्यात् येन मानवाः सुखशान्तियुक्ताः भवेयुः तस्य प्रचारः पत्रिका-माध्यमेन क्रियते यतोहि पत्रिकाः झटिति मानवमनः प्रभवन्ति। अत्र च येकेऽपि संस्कृतं मृतभाषा कथयन्ति तेषां मतं विमतं करोति एताः प्रकाशिताः संस्कृतस्य पत्र- पत्रिकाः दैनिकादारेभ्यः वार्षिकपर्यन्ताः। यथा विन्टरनित्समहोदयाः कथयन्ति[15]—"Sanskrit is not a 'dead language' even today. There are still at the present day a number of Sanskrit periodicals in India. To this very day poetry is

still composed and works written in Sanskrit."

मैक्समूलरमहोदया मृषाऽपवादं मर्षयन् कथयन्ति[16]—"संस्कृतमद्यापि सर्वत्र जनैः उच्यते। कन्याकुमारीतः कश्मीरं यावत् कच्छतः कामरूपपर्यन्तं संस्कृतं येनकेनाऽपि प्रकारेण जनसाधारणानां भाषास्ति"।

संस्कृतस्य पत्र-पत्रिकानां प्रकाशनं संस्कृतं प्रति निष्ठायै लोकजागरणाय, समाजहिताय, विश्वशांतिमूलाय, संस्कृतशिक्षणाय, धर्मप्रचाराय, दर्शनप्रचाराय, साहित्यसर्जनाय, अर्वाचीनग्रन्थप्रकाशनाय, संस्कृतप्रचाराय, गवेषणात्मक-निबन्धप्रकाशनाय, समाचारप्रकाशनाय सर्वजनहिताय च वर्तते।

परं पुनरपि संस्कृत-पत्रिका सम्पादकानां महती समस्या वर्तते। अद्यत्वे प्रायः ताः एव संस्कृतपत्रिकाः अवरोधरहिताः निरन्तरं प्रकाश्यन्ते याः सर्वकारीयसंरक्षणेन संरक्षिताः सन्ति। यासां पार्श्वे विपुलग्राहक-संख्यावर्तन्ते ताश्च। याः सर्वकारीयमनुदानं न प्राप्नुवन्ति तत्र अनवस्था दृश्यन्ते। एतासां समक्षं मुख्यसमस्या लेखकानामन्यमनस्कता, पाठकानाम् अरुचिः विज्ञापनानां च अप्राप्तिः। अनेकाः अर्थसङ्कटयुता लेखक-ग्राहक-पाठकाभावात् अस्तंगताः।

वस्तुतः संस्कृतभाषा न जनभाषा वर्तते न वा प्रान्तभाषा; प्राचीनेयं भाषा, यस्यां वर्तते सर्वविधं ज्ञानं संस्कारः संस्कृतिश्च। संस्कृत्या संस्कारिता एव जनाः ज्ञानयुक्ताः गरिमापूर्णाः भवन्ति।

संस्कारार्थं संस्कृतिज्ञानमावश्यकं तत्तु संस्कृतेनैव जायते। पुनश्च सम्पूर्णे भारते नाऽधिकाः जनाः संस्कृतं व्यवहरन्ति न वा भाषन्ते; अत्र संस्कृतज्ञाः एव कारणम्। तैः निष्ठया कृतज्ञतया च संस्कृतं संस्कृतिं रक्षयितुं सततं यतनीयम्। पत्रिकानां संवर्द्धनीय ग्राहकत्वं स्वीकारणीयम् अन्यान् च प्रेरणीयम्। स्वसमवायैः सह संस्कृतभाषणं करणीयम्। अत्र न्यूनता एव पत्रिकोत्कर्षघातका। प्रति संस्कृतज्ञैः कस्या अपि एकस्या पत्रिकायाः अवश्यमेव सदस्याः भवेयुः। पुनः पत्रिकाप्रकाशकैः परम्परामिमां जीवयितुं आधुनिकसन्दर्भे प्रतिस्पर्धा कार्या। स्वच्छ-शुद्ध-प्राञ्जललिपिभिः नयनाभिरामचित्राङ्कणैः पाठकापेक्षित-मनस्तोषसामग्रिभिः एव पत्रिका लोकप्रिया भवितुं शक्नोति तथैव भाव्यम्।

एतासु प्राचीन-पत्र-पत्रिकासु प्रकाशितानां साहित्यानां प्रकटीकरण-मावश्यकमस्ति। विद्वद्भिः लुप्तासु पत्रिकासु लिखिताः लेखाः रचनाश्च सङ्ग्रहणीया। यया संस्कृतस्य विपुलं ज्ञानं साहित्यं च वर्धिष्यते।

सन्दर्भ-सूची

1. Maxmüllar—*India what can it teach* us p. 72-73.
2. M. Winternitz—*History of Indian Literature*, Part I, p. 38-39.
3. डा. रामगोपाल मिश्र—*संस्कृतपत्रकारिता का इतिहास*, पृष्ठ 2-11.
4. M. Winternitz—*History of Indian Literature*, Part I, p. 72.
5. *नवप्रभातम्* (दैनिक) वर्ष-5, अंक 105, (23.09.95)
6. माळवमयूरः वर्ष-1, अंक-5
7. *Modern Sanskrit Literature*, p. 209.
8. *गाण्डिवम्* संस्कृतप्रगति विशेपांक-3 पृष्ठ-98
9. डा. रामगोपालमिश्र—*संस्कृत पत्रिकारिता का इतिहास*, पृष्ठ 70.
10. उपर्युक्तमेव, पृष्ठ 100.
11. चन्दामामा मई 1998 पृष्ठ 6.
12. राधावल्लभ त्रिपाठी, *संस्कृत साहित्य बीसवी शताब्दी*, पृ. 175
13. *अर्वाचीन संस्कृतम्*, कारगिलविशेपांकः वर्ष- 20, अंक-3, (31.07.99)
14. विश्वभापा वर्ष-06, अंक-01.
15. *History of Indian literature*, I.P. 45
16. *India what can it teach us*, p. 71.

राजस्थान के जैन मुनियों का संस्कृत लेखन

प्रेम सुमन जैन

संस्कृत साहित्य के उन्नयन में जैन आचार्यों का प्राचीन समय से ही विशेष योगदान रहा है।[1] भारत की आज़ादी के बाद विगत 50 वर्षों में भी जैन मुनियों ने संस्कृत में अनेक महत्वपूर्ण ग्रन्थ लिखे हैं। ऐसे जैन संस्कृत साहित्य में राजस्थान के क्षेत्र में अधिक विचरण करनेवाले जैन मुनियों द्वारा प्रणीत संस्कृत साहित्य की विशिष्ट छाप है। विषय और विधा की दृष्टि से भी यह साहित्य उल्लेखनीय है। इसकी पृष्ठभूमि में जैन आगमों में वर्णित तत्त्वविद्या तथा जैन सन्तों की संयम की साधना अवश्य है। किन्तु काव्यात्मक सौन्दर्य और भाषात्मक समृद्धि में वह अपने समकालीन लेखन से कम नही है।[2] नैतिक आदर्शों और राष्ट्रीय चरित्र का निर्माता होने का गौरव उसे प्राप्त है।

जैन मुनियों द्वारा कुछ संस्कृत ग्रन्थ यद्यपि आजादी के पूर्व में भी लिखे गये, किन्तु वे प्रकाश में आजादी के बाद ही पाठकों के समक्ष आये। अधिकांश जैन संस्कृत ग्रन्थ विगत 20-25 वर्षों में जैन मुनियों द्वारा लिखे गये हैं। राजस्थान के प्रमुख जैन मुनियों द्वारा प्रणीत संस्कृत लेखन का संक्षिप्त विवरण इस प्रकार है--

1.	आचार्य ज्ञानसागर	वीरोदय, जयोदय, सुदर्शनोदय, समुद्रदत्तचरित्र, दयोदय, मुनिमनोरंजनशतक, सम्यकत्वसार शतक आदि।
2.	आचार्य विद्यासागर	आठशतक ग्रन्थ :--निजानुभव शतकम्, श्रमण, निरंजन, भावना, सुनीति, परीषय-जय, मुक्तक एवं तीर्थशतकम्
3.	आचार्य घासीलाल	शान्तिसिन्धु महाकाव्यम्, लोकाशाहमहाकाव्यं
4.	आचार्य तुलसी	शिक्षा षण्णवति, कर्तव्य षट्त्रिशिंका
5.	मुनि नथमल	श्री भिक्षुमहाकाव्यम्, रत्नपालचरितम्, तुला अतुला

6.	चन्दन मुनि	अर्जुनमालाकारम्, संवरसुधा, अश्रुवीणा
7.	मुनि मोहनलाल शार्दूल	कर्करकाव्यम्, नेमिनाथं प्रति
8.	मुनि छत्रमल	देवगुरु द्वात्रिंशिका, तुलसी द्वात्रिंशिका
9.	मुनि सोहनलाल	मातृकीर्तनम्, भगवत्स्तुतिः
10.	मुनि छत्रशाल	आठ शतकम् ग्रन्थ (धर्मशतकम् आदि)
11.	आचार्य कुन्थुसागर	शान्तिसुधासिन्धु, श्रावक धर्मप्रदीप, सुवर्ण सूत्रम्
12.	मुनि अजितसागर	सूरि प्रवन्दे शिवसागरं तं

इन कवियों के ग्रन्थों में महाकाव्य, चरित्, चम्पूकाव्य नीतिग्रन्थ, स्तोत्र आदि सभी विधाएँ है। इनका संक्षिप्त मूल्यांकन आलेख में किया गया है।

आचार्य ज्ञानसागर का अवदान

आचार्य श्री ज्ञानसागर महाराज बीसवीं शती के मूर्धन्य साहित्यकार और जैन धर्म के महनीय दि. जैन-मुनि—आचार्य थे। आपका जन्म 1892 ईस्वी में राजस्थान प्रदेश के सीकर जिले के अन्तग्रत राणोली ग्राम में हुआ। उनके पिता चतुर्भुज एवं माता धृतवरी देवी थी। आप बचपन में भूरामल नाम से विख्यात रहे। आपकी उत्कृष्ट कवित्व शक्ति, प्रतिभा एवं काव्य साधना निम्नलिखित कृतियों में अंकित है—1. वीरोदय 2. जयोदय 3. सुदर्शनोदय 4. श्री समुद्रदत्तचरित्र 5. दयोदय 6. मुनिमनोरंजन शतक 7. प्रवचनसार 8. सम्यकत्वसार शतक।

आपको आचार्य पद की प्राप्ति 7 फरवरी 1969 ई. में हुई। जैन समाज ने 1972 में चरित्र चकवर्ती पद से सुशोभित किया। किन्तु शारीरिक दुर्बलता के कारण आपने अपने परमशिष्य मुनि श्री 108 विद्यासागर जी को 2 नवम्बर 1972 ई. को आचार्य पद सौंप दिया। आपने 7 जून 1973 को दिन में नसीराबाद में समाधि मरण द्वारा अपना शरीर त्याग दिया। आचार्यश्री का जीवनवृत्त तपस्या और त्याग के लिए समर्पित रहा। आपकी लोकोत्तर प्रतिभा एवं चिन्तन काव्य, साधना का परिशीलन उनकी कृतियों में सन्निविष्ट है।

1. वीरोदय—यह एक महाकाव्य है। यह ग्रन्थ 22 सर्गों में निबद्ध है। सम्पूर्ण ग्रन्थ में 989 पद्य हैं। इसमें जैनधर्म के चौबीसवें तीर्थंकर महावीर नायक के रूप में चित्रित हैं इसीलिए नायक के नाम पर वीरोदय इस रचना का नाम सर्वथा उपयुक्त है। सम्पूर्ण कथाक्रम महावीर पर केन्द्रित किया गया है। वीरोदयकार ने ग्रन्थ के प्रारम्भ में एवं अन्त में अपने उद्देश्य को स्पष्ट किया गया है। कवि

ने संसार के कल्याण, जैन धर्म के प्रचार प्रसार, सामाजिक बुराइयों के पलायन और मानवता की स्थापना से प्रेरित होकर ही यह रचित की है। यह काव्य एक ओर तो शैली की दृष्टि से कालिदास के काव्यों की श्रेणी में आ जाता है, और दूसरी ओर दर्शनपरक होने के कारण बौद्ध दार्शनिक महाकवि अश्वघोष के काव्यों के समकक्ष आ जाता है। इस काव्य का ऋतुवर्णन माघ के ऋतुवर्णन के समान ही प्रभावशाली है। *जयोदय* महाकाव्य जहाँ काव्यमर्मज्ञों के बौद्धिक विलास का साधन है, वहीं बीरोदय महाकाव्य सहृदयहृदयग्राह्य है। इस काव्य का पुनर्जन्मवाद और कर्मवाद मानव-मात्र को अच्छे-अच्छे कार्य करने की प्रेरणा देता है।

2. जयोदय–यह एक महाकाव्य है। यह ग्रन्थ 28 सर्गों में निबद्ध है, जिसकी श्लोक संख्या 3079 है। इस ग्रन्थ में हस्तिनापुर के अधिपति जयकुमार का जीवनवृत्त नायक के रूप में रेखांकित है। अतः नायक के नाम पर ग्रन्थ का नाम *जयोदय* रखा गया है। जयकुमार वास्तव में अपने पराक्रम, प्रताप, वैभव एवं गुणों से सर्वोत्तम के रूप में प्रतिष्ठित है। जयोदय नाम प्रसंगानुकूल है।[3] *जयोदय* के प्रथम पद्य से यह आभास मिलता है कि कवि ने आत्म कल्याण के लिए उक्त महाकाव्य का प्रणयन किया है। उक्त ग्रन्थ के 28 वर्गों में जयकुमार और उनकी धर्मपत्नी सुलोचना की कथा का विवेचन और अपरिग्रह व्रत का माहात्म्य निरूपित है।[4] *जयोदय* का उद्देश्य है अपरिग्रह व्रत की शिक्षा देना। पाठक को रुक्षता का अनुभव न हो, इसलिए कवि ने जयकुमार एवं सुलोचना के कथानक के माध्यम से अपना उद्देश्य पूरा कर लिया है। *जयोदय* काव्यशास्त्रीय, सामाजिक, राजनैतिक, धार्मिक और दार्शनिक दृष्टियों से कालिदासोत्तर काव्यों के मध्य में रखने के पूर्णतः योग्य है।[5]

3. सुदर्शनोदय–इस महाकाव्य में 9 नौ सर्ग हैं। जिनमें कुल 412 पद्य सम्मिलित हैं। इसमें चम्पापुर के सेठ सुदर्शन के जीवनवृत्त एवं मोक्ष प्राप्ति का चित्र अंकित है इसलिए सुदर्शनोदय यह नाम अत्यंत सार्थक है। सेठ सुदर्शन के माध्यम से ब्रह्मचर्य व्रत का माहात्म्य और शील की सर्वोच्चता दिखाना ही ग्रन्थकार का प्रमुख लक्ष्य है। इसी उद्देश्य से प्रेरित होकर सुदर्शनोदय की रचना की है। इस रचना के प्रारम्भ में आमुख शीर्षक में श्री गोविद नरहरि वैजापुरकर ने समीक्षा प्रस्तुत की है तथा दर्शनाध्यापक पं. श्री अमृतलाल जैन ने 'काव्य कसौटी' शीर्षक के द्वारा प्रस्तुत ग्रन्थ की मीमांसा की है। ग्रन्थारम्भ में कविवर आचार्य श्री ने प्रस्तावना में कथावस्तु के आदि स्रोत और सुदर्शन के जीवनवृत्त की पृष्ठभूमि

उपस्थित की है। इस काव्य के द्वारा कवि ने नमस्कार मन्त्र के महत्त्व से पाठक को अवगत कराना चाहा है। साथ ही पातिव्रत्य, एकपत्नीव्रत, सदाचार, सम्यक्चरित्र इत्यादि गुणों की भी शिक्षा दी है। इस काव्य की सबसे बड़ी विशेषता है इसके गीत। साहित्य, संगीत एवं दर्शन का अद्भुत सम्मिश्रण काव्य को उत्कृष्ट बनाने में सहायक है। दार्शनिकों एवं काव्यशास्त्रियों को एक साथ सन्तुष्ट करने वाला यह काव्य वास्तव में संस्कृत साहित्य की अमूल्य निधि है।

4. दयोदय चम्पू–यह एक चम्पू काव्य रचना है। यह सात लम्बों (अध्यायों) में विभक्त है, जिनमें 166 पद्य हैं। इसमें पद्य के साथ गद्य भी प्रयुक्त हैं इस ग्रन्थ में एक हिंसक धीवर के हृदय में दया का उदय और विकास वर्णित हुआ है। अतः इस कृति का नाम दयोदय रखा गया है जो सर्वथा उपयुक्त है। इस कृति की रचना का मुख्य लक्ष्य अहिंसा के माहात्म्य का प्रतिपादन करना है जिससे दयाभाव विकसित हो तथा सुख-शान्ति भी स्थापित हो। ज्ञानसागर जी का यह चम्पू भी एक शिक्षाप्रद काव्य है। सहज मुहावरेदार भाषा, सुकुमार शैली, स्वाभाविक अलंकार, अवसरानुकूल छन्द, अन्तर्द्वन्द्व और संवाद आदि से समृद्ध कलापक्ष इस काव्य में भावपक्ष को पूर्णरूपेण अभिव्यक्त करता है।

5. समुद्रदत्त चरित्र–यह एक खण्डकाव्य है। इसमें 9 सर्ग हैं, जिनके समस्त श्लोकों की संख्या 345 है। इसमें भद्रमित्र समुद्रदत्त नामक व्यापारी के जीवन चरित्र और उसकी सत्यप्रियता का विवेचन होने से ही श्री समुद्रदत्त चरित्र–यह ग्रन्थ का नाम रखा गया है। इसे भद्रोदय भी कहते हैं क्योंकि भद्रमित्र समुद्रदत्त ही कथानक का केन्द्र है। यह नाम नायक के नाम पर होने से सर्वथा उपयुक्त और सार्थक है। कवि ने अपनी क्षुल्लकावस्था में ही यह खण्डकाव्य भ्रष्टाचार के बढ़ते प्रभाव से चिन्तित होकर निबद्ध किया। अर्थात् सत्य की प्रतिष्ठा को अक्षुण्ण रूप से स्थापित करने के लिए ही भद्रमित्र का आश्रय लेकर लिखा है। इसमें सत्य की विजय का प्रतिपादन है।

6. सम्यकत्वसारशतकम्–यह एक शतक काव्य होने के कारण सौ पद्यों में निबद्ध रचना है। इसमें जिनशासन की आधारशिला सम्यकत्व का विशद् विवेचन आद्योपान्त हुआ है। इसमें हमें ग्रन्थकार की उदारवादी मनोवृत्ति और काव्य की रचना के प्रयोजन का भी आभास होता है। प्रस्तुत कृत्ति में आद्योपान्त सम्यकत्व का विवेचन है, सम्यकत्व सूर्य के उदित होने पर मिथ्यात्वरूपी अज्ञान रात्रि स्वयंमेव विलीन हो जाती है।

इस प्रकार आचार्य मुनि ज्ञानसागर जी 20 वीं शताब्दी के आदि जैनमुनि कवि हैं। उन्होंने उक्त—*जयोदय, वीरोदय, सुदर्शनोदय, श्रीसमुद्रदत्तचरित और दयोदयचम्पू*—पाँच संस्कृत-काव्य ग्रन्थरूप पुष्प सरस्वती को समर्पित किए हैं। कवि ने अपने इन काव्यों के माध्यम से जैनधर्म तथा सत्य, अहिंसा, ब्रह्मचर्य, अस्तेय और अपरिग्रह—इन पाँच महाव्रतों की शिक्षा समाज को दी है। अपने इस प्रयास से एक और वह कालिदास जैसे कवियों की श्रेणी में आते हैं, दूसरी ओर वह बौद्धदर्शन के महान कवि अश्वमेघ की समता होने के भी योग्य सिद्ध होते हैं। समीक्षकों ने यह ठीक ही निष्कर्ष दिया है कि महाकवि ज्ञानसागर के काव्यों में अन्त्यानुप्रास शैली एक ऐसी अभिनव वस्तु है जिससे कवि की मौलिकता में कोई सन्देह नहीं रह जाता हे। यह कवि द्वारा साहित्य समाज की अनूठी देन है। यह शैली हमें कालिदास, अश्वघोष, माघ, भारवि, श्रीहर्ष इत्यादि में नहीं मिलती है। इस शैली के माध्यम से कवि विरचित काव्यों में एक स्मरणीय प्रवाह दृष्टिगोचर होता है और दार्शनिक सिद्धांतजन्य रुक्षता भी नहीं चुभती है।

आचार्य विद्यासागर जी के शतक

